श्रीगणेशायनमः॥ अथव्रतकोद्यापनानुक्रमणिकाप्रारंभः॥

पो० १३ अग्न्यादिमंडलदेवता
१४ कलशस्थापनं
१५ अग्न्युत्तारणं
१७ प्राणप्रतिष्ठा
१७ सर्वव्रतेषु सामान्यपूजाविधि
१८ प्रथमं एकादशीव्रतोद्यापन
२५ गोदानप्रयोगः॥
२८ कृष्णैकादशीव्रतोद्यापन
३१ प्रतिपद्व्रतानि
३१ आरोग्यप्रतिपद्व्रतं
३२ विद्याप्रतिपद्व्रतं
३२ रोटकसोमनाथव्रतं
३२ द्वितीयाव्रतानि
यमद्वितीयाव्रतं
३३ श्रावणशुक्लद्वितीयायांमुकुल
न फलव्रतं
३४ बालचंद्रव्रतं
३४ तृतीयाव्रतानि
३४ मार्गशीर्षचैत्रशुक्लतृतीयायां अ०
सौभाग्यशयनव्रतं
३४ शुक्लतृतीयायां रंभातृतीयाव्रतं
३५ स्वर्णगौरीव्रतं॥
३७ हरितालिकाव्रतं
३७ हस्तगौरीव्रतं
३८ कोटीश्वरव्रतं १
३८ बृहद्गौरीव्रतं
३९ सौभाग्यसुंदरीव्रतं॥

परशुरामजयंतीव्रतं
अथ चतुर्थीव्रतानि
४१ संकष्टचतुर्थीव्रतं
४२ दूर्वागणपतिव्रतं
४३ सिद्धिविनायकव्रतं
४४ करकचतुर्थीव्रतं
अथ पंचमीव्रतानि
४५ ऋषिपंचमीव्रतं
४६ दशरथललितव्रतं
४७ नागपंचमीव्रतं
४८ उपांगललिताव्रतं
अथ षष्ठीव्रतानि
४९ ललिताषष्ठीव्रतं
५० कपिलाषष्ठीव्रतं
५४ स्कंदषष्ठीव्रतं
५४ अथ सप्तमीव्रतानि
५४ शीतलाव्रतं
५४ मुक्ताभरणव्रतं
५५ रथसप्तमीव्रतं
५५ अचलासप्तमीव्रतं
५७ पुत्रसप्तमीव्रतं
अथ अष्टमीव्रतानि
५८ बुधाष्टमीव्रतं
६० दशाफलव्रतं
६० जन्माष्टमीव्रतं
६३ ज्येष्ठाव्रतं
६४ दूर्वाष्टमीव्रतं
६५ महालक्ष्मीव्रतं
६७ अथ नवमीव्रतानि
रामनवमीव्रतं
६८ रामनामलेखनव्रतं
६९ अदुःखनवमीव्रतं
६९ अथ दशमीव्रतानि
६९ आशादशमीव्रतं
७१ दशावतारव्रतं
७२ विजयादशमीव्रतं
७३ दशादित्यव्रतं
७५ दशहराव्रतं
७५ अथ एकादशीव्रतानि
७५ निर्जलैकादशीव्रतं
७५ शयन्येकादशीव्रतं

व्रतोद्यापनकौमुदी

श्रीगणेशायनमः॥नत्वागणेशंसंतुष्टैयशंकरेणवितन्यते॥मुदापुराणविख्यातव्र
तोद्यापनकौमुदी॥तत्रतावत्सर्वव्रतोपयोगित्वात्॥किंचित्निर्णयादिकलिख्यते॥
तत्रव्रतलक्षणं॥अभियुक्तिव्रतप्रसिद्धिविषयसंकल्पविशेषएवव्रतं॥तत्रव्रतनिषि
द्धकालमाहहेमाद्रौगार्ग्यः॥अस्तगेचगुरौशुक्रेबालेवृद्धेमलिम्लुचे॥उद्यापनंउपा
रंभंव्रतानांनैवकारयेत्॥लल्लः॥नीचस्थेवक्रसंस्थेप्यतिचरणगतेबालवृद्धास्तगेवा॥
नीचस्थःमकरस्थः॥देविपुराणे॥सिंहसंस्थंगुरुंशुक्रंसर्वारंभेषुवर्जयेत्॥वसिष्ठः॥
सिंहस्थेतुमघासंस्थंगुरुंयत्नेनवर्जयेत्॥सिंहस्थगुरुवर्जनंनर्मदोत्तरभागेएव॥अ
न्यत्रतुसिंहांशकएववर्ज्यः॥मकरस्थेगुरावपिसर्वशुभंकार्यंवर्ज्यं॥विशेषमाहल १

ल्लः॥नर्मदापूर्वभागेतुशोणस्योत्तरदक्षिणे॥गंडक्याःपश्चिमेभागेमकरस्थेनदोष
भाक्॥अगस्त्यादयेपिव्रतानांग्रहणविसर्गौनस्तः॥नियतकालानवुभवत्येव॥अग
स्त्योदयकालश्चदिवोदासीये॥उदेतियाम्यांहरिसंक्रमाद्रवेःएकाधिकेविंशतिमेत्वग
स्त्यः॥ससप्तमेषवृषसंक्रमाच्चमयातिगर्गादिभिरभ्यभाणि॥व्रतारंभसमाप्तितिथिं
विशिनष्टिहेमाद्रौसत्यव्रतः॥उदयस्थातिथिर्याहिनभवेद्दिनमध्यभाक्॥साखंडानव्र
तानांस्यात्आरंभश्चसमापनं॥तद्व्यतिरिक्तायांआखंडायांप्रारंभसमापनेसंपूर्णतिथि
माह॥रविःयांतिथिंसमुदेतिअस्तंयातिचसासंपूर्णा॥नत्नद्रुतोकालव्यापिनीग्रात्या॥
व्यतीयातादिनिषिद्धयोगभद्रादुष्टवासरादिरहितातिथिःशुभकार्येग्रात्या॥व्रतसयाम

ते॥अभर्तृकस्त्रीणामपिव्रतादिष्वधिकारः॥तदुक्तंस्कांदे॥भर्तृहीनातुयानारीसंयता
विजितेंद्रिया॥दिनभद्रायदारात्रौरात्रिभद्रायदादिवा॥नसाज्याशुभकार्येषुप्राहुरेवंपुरा २
तनाइति॥अथव्रताधिकारिणः॥स्कांदे॥निजवर्णाश्रमाचारनिरतःशुद्धमानसः॥
अलुब्धःसत्यवादीचसर्वभूतहितेरतः॥श्रद्धावान्पापभीरुश्चमंददंभविवर्जितः॥
अवेदनिंदकोधीमान्अधिकारीव्रतादिषु॥निजवर्णाश्रमाचारइत्यनेनचतुर्णांअ
धिकारोवगम्यते॥अत्रस्त्रीणामप्यधिकारः॥भारते॥मामुपाश्रित्यकौंतेययेपिस्युः
पापयोनयः॥स्त्रियोवैश्यैःशूद्रैःस्त्रीभिर्महेश्वरः॥पूजनीयोभक्तिमद्भिःम्लेच्छैरन्यै २
श्चमानवैरिति॥सभर्तृकाणांस्त्रीणांभर्त्राद्याज्ञांविनानाधिकारः॥ ॥तथाचमदनरत्नेमा

र्कंडेयपुराणे॥ब्राह्मणेक्षत्रियैर्वैश्यास्तथाशूद्रास्तेपियांतिपरांगतिमिति॥क्वचित्म्ले
च्छानामप्यधिकारः॥हेमाद्रौदेवीपुराणे॥नारीस्वच्छंदननुज्ञाताभर्त्रापित्रासुतेनवा॥निष्फ
लंतुभवेत्तस्याःयत्करोतिव्रतादिकमिति॥भर्त्राद्याज्ञयातुसर्वव्रतेष्वधिकारः॥स्त्रीणांव्रत
ग्रहणेविशेषोहेमाद्रौहरिवंशे॥स्नानंचकार्यंशिरसःस्नाताफलमवाप्नुयादिति॥व्रता
दीनांतुसंकल्प्यंदानंचस्वयमाहरेत्॥वैदिकंतांत्रिकंकर्मआचार्यद्वारतश्चरेदिति॥ ॥
अथव्रतधर्माः॥भारते॥गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः॥उपवासंतुगृह्णीयात्तद्य
द्वासंकल्पयेद्बुधः॥पात्राभावेहस्तेनापिजलंगृहीत्वासंकल्पयेदिति॥अनंतरंकृत्यमा
हमदनरत्नेदेवलः॥अभुक्त्वाप्रातराहारंस्नात्वाचम्यसमाहितः॥सूर्यायदेवताभ्यश्च

निवेद्यव्रतमाचरेत्॥ अत्रप्रातर्व्रतमाचरेदित्येवान्वयः॥ अन्येतुपूर्वदिनेएकभुक्तंनक्तं
वाकृत्वासायंसंध्योत्तरंव्रतसंकल्पयेदित्याहुः॥ सर्वव्रतेषुसामान्यधर्माः भविष्ये॥ क्षमास
त्यदयादानंशौचंइंद्रियनिग्रहः॥ देवपूजाग्निहवनंसंतोषस्तेयवर्जनं॥ सर्वव्रतेष्वयंधर्मसा
मान्योदशधास्थितः॥ देवलः॥ ब्रह्मचर्यंअहिंसाचसत्यंआमिषवर्जनं॥ तानिचत्वारिचरित
व्यानिनित्यशः॥ व्रताद्यारंभेवृद्धिश्राद्धंकार्यं॥ तदाहशातातपः॥ तानिष्ठ्वापितॄन्श्राद्धेकर्मकु
र्यादनंतरमिति॥ गृहीतव्रतानाचरणेदोषमाह॥ पूर्वव्रतंगृहीत्वायोनाचरेत्काममोहितः॥
जीवन्भवतिचांडालोमृतश्वनरकंव्रजेदिति॥ तत्प्रायश्चित्तंउक्तंस्कांदे॥ क्रोधात्प्रमादात्लो
भाद्वाव्रतभंगोभवेद्यदि॥ दिनत्रयंनभुंजीतमुंडनंशिरसोथवा॥ प्रायश्चित्तमिदंकृत्वापुनरेव

व्रतीभवेदिति॥ उपवासमाहवसिष्ठः॥ उपवासःसविज्ञेयःसर्वभोगविवर्जनमितिनिराहा
रोवाउपवासः॥ उपवासेदंतधावनंकाष्ठेननिषिद्धं॥ तदभावेद्वादशगंडूषान्कुर्यात्॥ तदु
क्तंवासिष्ठे॥ उपवासेतथाश्राद्धेनकुर्याद्दंतधावनं॥ तदभावेतुगंडूषान्कुर्याद्द्वादशैव
हि॥ हारीतः॥ पतितपाखंडादिनास्तिकादिसंभाषणाश्लीलादिकउपवासादिषुव्रतादिके
षुवर्जयेदिति॥ पतितादेर्दर्शनेतुविष्णुपुराणे॥ तस्यावलोकनात्सूर्यंपश्येत्स्वर्णादौ
स्नानमाचरेत्॥ अयुतंशुचिपदंजपेत्॥ याज्ञवल्क्यः॥ यदिवाक्यमलोपस्यात्व्र
तदानक्रियादिषु॥ व्याहरेद्वैष्णवंमंत्रस्मरेद्वाविष्णुमव्ययं॥ यमः॥ मानसेनियमे
लुप्तेस्मरेद्विष्णुंअनामयमिति॥ बृहन्नारदीये॥ रजस्वलांचचांडालंमहाघातकिनं

तथा॥सूतिकां पतितं चैव उच्छिष्टरजकादिकं॥व्रतादिमध्ये शृणुयाद्येषां ध्वनिमु
त्तमं॥अष्टोत्तरसहस्रं तु जपेद्वै वेदमातरमिति॥ ॥वेदमाता गायत्री॥दक्षः॥संध्या
हीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥गौडनिबंधे मार्कंडेयपुराणे सूर्योदयं विना नैव व्रतदा
नादिकः क्रम इति॥क्रमः॥उपक्रमः॥छंदोगपरिशिष्टे॥सदोपवीतिना भाव्यं सदा बद्धशि
खेन चेति॥मार्कंडेयपुराणे॥अधोवायुसमुत्सर्गप्रहासे अन्यभाषणे॥मार्जारमूषक
स्पर्शे आक्रुष्टे क्रोधसंभवे॥निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत्॥मार्कंडेयपुराणे॥
शिरःस्नातश्च कुर्वीत दैवं पित्र्यमथाह्निकमिति॥वायुपुराणे॥स्नानं संध्यातर्पणादि जपहो
मामरार्चनं॥उपवासवता कार्यं सायंसंध्याहुतीर्विना॥आपस्तंबः॥त्रिमात्रः स्त्र प्रयोक्त ४

व्यः कर्मारंभेषु सर्वदा॥त्रिमात्रः प्रणवः स्त्रीणां विशेषः॥पाद्मे॥गर्भिणी सूतिकादिश्च
कुमारी चापि रोगिणी॥यदाऽशुद्धा तदान्येन कारयेत्प्रयता स्वयमिति पाद्मे॥पूर्वं संकल्पितं यच्च
व्रतं सुनियतव्रतैः॥तत्कर्तव्यं नरैः शुद्धं देवार्चनविवर्जितमिति॥केन कारयेदित्यपेक्षायां पैठीनसिः॥
भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतमिति॥वायुपुराणे॥उपवासे त्वशक्तश्चेत्पुत्रादन्यांश्च का
रयेत्॥उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत्॥नारी च पतिमुद्दिश्य एकादश्यामुपोषिता॥पुण्यं
शतगुणं यायादित्याह गालवो मुनिः॥मातामहादीनुद्दिश्य एकादश्यामुपोषणे॥कृतेन तु ते पलं विप्राः
समग्रं फलमाप्नुयुः॥एते प्रतिनिधयो न काम्ये॥मंडनः॥काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके भवे
त्॥काम्येष्वुपक्रमादूर्ध्वं केचित्प्रतिनिधिं विदुरिति॥हविष्याणि कात्यायनः॥हविष्येषु यवा मु

ख्याःतदनुव्रीह्यःस्मृताः॥माषकोद्रवगोरादीन्सर्वाभावेविवर्जयेत्॥अग्निपुराणे॥व्रीहि
षष्टिकमुद्गाश्चमठरःसलिलंपयः॥श्यामाकाश्चैवनीवारागोधूमाद्यव्रतेहिताः॥करःसैंधव
सामुद्रेगव्येचदधिसर्पिषी॥पयोनुद्धृतसारंचपनसाम्रहरीतकी॥पिप्पलीजीरकंचैवनागरंचै
वतिंतिणी॥कदलीलवलीधात्रीफलान्यगुडमैक्षवं॥अतैलपक्वंमुनयोहविष्याणिप्रचक्षते॥
मनुः॥मुन्यन्यानिपयःसोमोमांसंयच्चानुपस्कृतं॥अक्षारलवणंचैवप्रकृत्याहविरुच्यते॥अनु
पस्कृतंअपक्वं॥उपयुक्तवस्तुनिवृत्तादौलिख्यंते॥आदित्यपुराणे॥सुवर्णरजतंमुक्ताराजावर्तंप्र
वालकं॥पंचरत्नकमाख्यातं॥कनकंकुलिशंनीलंपद्मरागंचमौक्तिकं॥एतानिवापंचरत्नानि॥
कुलिशंहीरकं॥स्मृत्यंतरे॥अभावेसर्वरत्नानांहेमसर्वत्रयोजयेदिति॥पल्लवाः॥ब्रह्मांडपुराणे॥अ ५

श्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः॥पंचगव्यं॥स्कांदे॥गोमूत्रंगोमयंक्षीरंदधिसर्पिर्यथाक्रम
मिति॥पंचामृतंशिवधर्मे॥पंचामृतंदधिक्षीरंसितामधुघृतंनृपेति॥कात्यायनः॥आज्यंक्षीरंम
धुतथामधुरत्रयमुत्तममिति॥सर्वौषध्यः॥छंदोगपरिशिष्टे॥कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं॥
वचाचंपकमुस्तंचसर्वौषध्योदशस्मृताइति॥तत्रैव॥आपःक्षीरंकुशाग्राणिदध्यक्षततिलास्त
था॥यवःसिद्धार्थकाश्चेतिस्यर्घोष्टांगःप्रकीर्तितइति॥पंचरात्रे॥रजांसिपंचवर्णानिमंडलार्थंवि
कारयेत्॥शालितंडुलजश्चूर्णंरक्तंकौसुंभसैंदुरं॥हरितालोद्भवंपीतंकृष्णंदग्धयवोद्भवं॥रजांसि
पंचवर्णानिहरितंपीतकृष्णयुगिति॥कौतुकसंभवानिभाविष्ये॥दूर्वायवांकुरश्चैवबालकंचू
तपल्लवाः॥हरिद्राद्वयसिद्धार्थशिखिपत्रोरगत्वचः॥कंकणौषधयश्चैवकौतुकाख्योद्भवास्मृ

ताइति॥ समप्रदो मात्स्ये॥ गजाश्वरथ्यावल्मीकसंगमाध्रदगोकुलात्॥ मृदं आनीय कुंभेषु प्र
क्षिपेच्चत्वरादपि॥ भविष्ये॥ सुवर्णरजतंताम्रं आरकूटं तथैव च॥ लोहं त्रपु तथा सीसं धानवः सप्त
कीर्त्तिताइति॥ तत्रैव सप्तधान्यानि॥ यवगोधूमधान्यानि तिलाः कंकुस्तथैव च॥ श्यामाकश्चण
कश्चैव सप्तधान्यमुदाहृतमिति॥ कलशलक्षणं विष्णुधर्मे॥ हैमराजतताम्राश्च मृन्मया लक्षणा
न्विताः॥ पंचाशांगुलवैपुल्या उत्सेधे षोडशांगुलाः॥ द्वादशांगुलमूलास्युर्मुखं अष्टांगुलं भवेदि
ति॥ प्रतिमाद्रव्यं तत्प्रमाणं भविष्ये॥ सौवर्णी राजती ताम्री वृक्षजा मार्त्तिकी तथा॥ पिष्टजापि
ष्टलेपोत्था निजवित्तानुसारतः॥ आमापात्पलपलपर्यंता कर्त्तव्या शाठ्यवर्जितैः॥ अंगुष्ठपर्वा
दारभ्य वितस्त्यवधिका स्मृताइति॥ मात्स्ये॥ अनुक्तसंख्या यत्र स्यात् शतं अष्टोत्तरं स्मृतं॥ अष्टा ५

विंशतिरष्टौ वा यथाशक्ति विधीयते इति॥ ब्राह्मे॥ यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुकारि यत्॥
यवानामिव गोधूमा व्रीहीणामिव शालयः॥ आज्यं द्रव्यं अनादेशे सर्वहोमे विधीयते॥ मंत्रे देव
ताया अभावे प्रजापतिरिति स्थितिः॥ समस्तव्याहृतिर्मंत्रः॥ गारुडे॥ प्रणवादिनमोंतं च चतु
र्थ्यंतं च सत्तमा॥ देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्त्तितः॥ द्रव्यप्रतिनिधिरुक्तो हेमाद्रौ॥ दध्य
लाभे पयः कार्यं मध्वलाभे तथा गुडः॥ घृतहोमे गव्यं मुख्यं तदलाभे माहिषं आज्यं वा॥ तद
लाभे तैलं॥ कौसुंभं सार्षपं चेति॥ कात्यायनः॥ अनंतगर्भिकं साग्रं कौशं द्विदलमेव च॥ प्रादे
शमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥ अथेध्मा॥ पलाशाश्वत्थखदिररोहितोदुंबराणां॥ तदभा
वे कंटकवर्जं सर्ववनस्पतीनां॥ समिद्धो होतव्यं अग्नौ॥ मंदाग्नौ आमयावी स्यादिदोषदर्शनात्॥

७ नकुर्यात्॥ अग्निधमनं पाणिशूर्पादिभिः क्वचित्॥ मुखेनैव धमेत्॥ अग्निं यतो वेदाविनिःसृता
इति॥ अथ धूपः॥ भविष्ये॥ अगरुं चंदनं मुस्तां सुहृक्कं च घृणं तथा॥ समभागं तु कर्त्तव्यं धूपोयं अ
मृताह्वयः॥ घर्षणं कस्तूरी॥ सुवर्णादिमानं॥ पंचगुंजात्मको माषः॥ तत्षोडशाकर्षः॥ कर्षचतु
ष्टयपलं॥ धान्यमानं॥ पलं च कुडवं प्रस्थ आढको द्रोण एव च॥ धान्यमानेषु बोद्धव्याः क्रमशोमी
चतुर्गुणाः॥ अन्यदपि॥ पलद्वयं प्रसृतं तद्द्विगुणं कुडवं तच्चतुर्गुणं प्रस्थः तच्चतुर्गुणं आढकः त
च्चतुर्गुणं द्रोणः द्रोणद्वयं कुंभः षोडशद्रोणाः खारी इति॥ होमद्रव्यमानं॥ पदार्थवंशे॥ कर्षप्रमा
ण्यं स्याद्भुक्तिमात्रं पयः स्मृतं॥ उक्तानि पंचगव्यानि भुक्तिमात्राणि साधुभिः॥ तत्समं मधुदुग्धे
त्रयासमात्रमुदाहृतं॥ दधिप्रसृतमात्रं स्यात् लाजास्युर्मुष्टिसंमिताः॥ पृथुकास्तत्प्रमाणास्युः ८

सक्तवोपि तथाविधाः॥ पपलार्द्धं गुडमानं गुडमानं च शर्करापि तथाविधा॥ ग्रासार्द्धमात्रमन्ना
नां इक्षुः पर्वप्रमाणकः॥ एवं स्यात् सर्वपुष्पेषु च तथा धूपादिकं न्ययेत्॥ मातुलिंगं चतुः खंडं पनसं द
शधाकृतं॥ अष्टधा नारिकेरं च चतुर्धा कदलीफलं॥ त्रिधाकृतं तथा॥ नैदुं लौथां बैल्वं कपित्थं खं
डितं द्विधा॥ व्रीहियो निमुष्टिमानस्युर्मुद्गा माषा यवास्तथा॥ तंडुलास्तु तदर्धं तु कोद्रवा मुष्टिसंमि
ताः॥ लवणं भुक्तिमात्रं स्यान्मरीचान्येकविंशतिः॥ खंडत्रयं तु मूलानां फलानां स्वप्रमाणतः॥ अ
न्येषां ग्रासमात्रं तु प्रसृतिः पायसस्य तु॥ अक्षनालुपवा प्रोक्तास्तंदुलाव्रीहयस्तथा॥ एषां केषां
चिद्द्रव्याणां मध्य संभवे आज्यमुपादेयं भरद्वाजमतात्॥ चंद्रचंदनकाश्मीरकस्तूरी यक्षकर्दमा
त्॥ पलोपक्षं मितानेतान् गुग्गुलं बदरास्थिवत्॥ द्रव्यं स्रुवेण होतव्यं पाणिमाकठिणं द्रवि॥ ॥

[illegible] अथऋत्विग्वरणमाह॥ ब्रह्मानिहोत्रिणं विप्रं सुरूपं च गु
[illegible] णान्वितं॥ सपत्नीकं च संपूज्य भूषयित्वा च भूषणैः॥ पुरोहितं सुखतमं
कृत्वान्यांश्च तथर्त्विजः॥ अहमोयरसंछंनान्स्रग्विणः शुचिभूषितान्॥ अंगुलीयकानि च तथा
कर्णवेष्टान्प्रदापयेत्॥ वस्त्रयुग्मं तथोष्णीषं कुंडले कंठभूषणं॥ एतानि चैव सर्वाणि प्रारंभे स
र्वकर्मणां॥ पुरोहिताय दत्वाथ ऋत्विग्भ्यः संप्रदापयेत्॥ इति॥ वृत्तानां मधुपर्कमाह विश्वामि
त्रः॥ संपूज्य मधुपर्केण ऋत्विग्भ्यः कर्म कारयेत्॥ अपूज्य कारयन्कर्म किल्बिषेणैव युज्यते॥ ऋ
त्विक्संख्या मात्स्ये॥ ॥होमालंकारिणः कार्याः पंचविंशतिसंख्यया॥ दक्षिणा च समं सर्वाना चा
र्यो द्विगुणं भवेदिति॥ ॥अथ सर्वतोभद्रं मंडलं॥ स्कांदे॥ प्रागुदीच्यां गता रेखा कुर्यादेकोनविंश ८
ति॥ खंडेंदुस्त्रिपदे कोणे शृंखला पंचभिः पदैः॥ एकादशपदा वल्ली भद्रं तु नवभिः पदैः॥ चतुर्विंश
त्पदा वापी परिधिर्विंशतिः पदैः॥ मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतं॥ श्वेतेंदुः शृंखला कृ
ष्णा वल्ली नीलेन पूरयेत्॥ भद्रारुणा सिता वापी परिधिः पीतवर्णकैः॥ बाह्यांतरदलाः श्वेताः कर्णि
का पीतवर्णका॥ परिध्यावेष्टितं पद्मं बाह्ये सत्वरजस्तमः॥ तन्मध्ये स्थापयेद्देवान्ब्रह्माद्यांश्च सुरा
सुरान्॥ इति सर्वतोभद्रं॥ ॥अथाष्टलिंगतोभद्रं॥ ॥आग्नेये॥ चतुर्विंशतिरालेख्या रेखाः प्रा
ग्दक्षिणायताः॥ कोणेषु शृंखलाः पंचपदा वल्ल्यस्तु पार्श्वतः॥ पदैर्नवभिरालेख्याश्चतुर्भिर्लघुशृं
खलाः॥ लघुवल्ल्यः पदैः षड्भिः ततोष्टादशभिः पदैः॥ कृत्वा लिंगानि बाह्यस्तु स्त्रयोदशभिरंत
रा॥ तथा वीथीं दर्यैनैव पीठं कुर्याद्विचक्षणः॥ तस्याः पादाः पंचपदा द्वाराण्यपि तथैव च॥ एकाद

तिपदं मध्येपद्मं स्वस्तिकमुच्यते॥ कोणेषु शृंखला: कार्या: पदैस्त्रिभिरत: परं॥ पदैश्चतुर्भिर्दि
क्षु स्युर्भद्राण्येवं समंतत:॥ एकादशपदावल्यो मध्येष्टदलमालिखेत्॥ पद्मं नवपदं स्येवं लिंगतो
भद्र उच्यते॥ शृंखला: कृष्णवर्णेन वल्ली नीलेन पूरयेत्॥ रक्तेन शृंखलास्तध्वी नली पीतेन पूरये
त्॥ लिंगानि कृष्णवर्णानि श्वेतानान्यथवापि का॥ पीठं सप्रादं श्वेतेन पीतेन द्वारपूरणं॥ मध्येस्यु:
शृंखला: रक्ता वल्ली नीलेन पूरयेत्॥ भद्राणि पीतवर्णानि पीता पंकजकर्णिका॥ दलानि श्वेत
नियदा चित्राणि कल्पयेत्॥ तिस्रो रेखा बहि: कार्या सितरक्तासिता: क्रमात्॥ इति॥ ॥अथ
द्वादशलिंगतो भद्रं लेंगे॥ ॥ अंगुदीच्यायतो रेखा: षड्विंशद्विभकल्पयेत्॥ पदानि द्वादशशतं पं
चविंशतिरेव च॥ खंडेंदुस्त्रिपदा कोणे शृंखला: षट्पदे स्मृता॥ त्रयोदशपदा वल्ली भद्रं तु नवभि: १

पदै:॥ त्रयोदशपदा वापी लिंगं अष्टादशै स्मृतं॥ लिंगत्रयस्य पंक्तौ तु शोभा काष्ठाश्चतुर्दश॥ तेषा
मुपरि पंक्तौ कोष्ठा: सप्तदशैव तु॥ पूजां पंक्तिस्त्व विज्ञेया पतित: परिकल्पिता॥ पूजा पत्त्यंतरा पं
क्तौ कोष्ठाश्च्यशीतिसंख्यया॥ परिधि: संतु विज्ञेयो मंडलयोरंतराद्बयो:॥ परिध्यंतरकोष्ठेषु सर्वतो
भद्रमालिखेत्॥ विशेष्यात्र विज्ञेय: शृंखला: षट्पदा भवेत्॥ त्रयोदशपदा वल्ली भद्रं तु नवभि: प
दै:॥ पंचविंशसदा वापी परिधि: षोडशात्मक:॥ मध्ये नवपदं पद्मं कर्णिकाकेसरान्वितं॥ सत्वरजस्त
मो वर्णा: परितो मंडलस्य तु॥ त्रय: परिधय: कार्यास्तत्र द्वाराणि कारयेत्॥ सितेंदु: शृंखला कृष्णा
वल्ली नीला प्रकीर्तिता॥ भद्रं वै चारुणं ज्ञेयं वापी स्यात् श्वेतवर्णिका॥ लिंगानि कृष्णवर्णानि पार्श्वतो
द्वादशैव तु॥ परिधि: पीतवर्णस्यात् कमलं पंचवर्णकं॥ ॥अथ चतुर्लिंगतो भद्रं लेंगे॥ रेखास्त्व

दद्शा प्रोक्तश्चतुर्लिंगसमुद्भवे॥ कोणेंदुस्त्रिपदः श्वेतः त्रिपदैः कृष्णशृंखला॥ वल्ली सप्तपदानि
लाभद्रं रक्तं चतुष्पदं॥ भद्रपार्श्वे महारुद्रं कृष्णं अष्टादशैः पदैः॥ शिवस्य पार्श्वतो वापि कुर्यात्संच
पदासिता॥ पदं एकं तथा पीतं भद्राचादयोस्त मध्यतः॥ शिरसि शृंखला याश्च कुर्यात् सीतं पदत्र
यं॥ लिंगानां स्कंदतः कोष्ठा विंशती रक्तवर्णिकं॥ ॥ एकलिंगतोभद्रं गौरीतिलके॥ तिर्यगू
र्ध्वगता रेखाः कार्याः स्निग्धाः त्रयोदश॥ कोणेंदुस्त्रिपदः कार्यः शृंखला त्रिपदा स्मृता॥ वल्ली तिष
ट्पदा नीलाभद्रं रक्तं प्रकल्पयेत्॥ पदैर्द्वादशभिः स्पष्टं उत्तरे पूर्वदक्षिणे॥ पश्चिमायां महारुद्रं अ
ष्टाविंशति कोष्ठकैः॥ लिंगपार्श्वे तथा मूर्ध्नि अष्टौ कोष्ठाः सुपीतकाः॥ लिंगमेकं तथा गौर्यास्तिस्र
स्युरत्र मंडले॥ पूजयेन्मंडलं चैतन्नूतस्य गौरी प्रसीदति॥ अथ मुद्राः॥ तंत्रांतरे॥ देवतानेन संतुष्टा स १०

र्वदा संमुखी भवेत्॥ अंगुष्ठे निक्षिपेत्सेयं मुद्रा त्वाहवनी मता॥ संग्रथ्य निक्षिपेत्सेयं मुद्रा त्वासनसंज्ञि
का॥ अधोमुखी त्वियं चेस्यात् स्थापनी मुद्रिका मता॥ उच्छ्रितावुच्छ्रितौ कुर्यात् संमुखीकरणी भवेत्॥
प्रसृतांगुलिकौ हस्तौ मिथः श्लिष्टौ तु संमुखौ॥ कुर्यात्स्वहृदये स्वेयं मुद्रा प्रार्थनसंज्ञिका॥ इत्येवस
र्वदेवानां पूजने षट् प्रदर्शयेत्॥ शिवपूजायां लिंगमुद्रा॥ उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बंधये
त्॥ वमांगुलीर्दक्षिणाभिरंगुलीभिश्च वेष्टयेत्॥ लिंगमुद्रेयमाख्याता शिवसान्निध्यकारिणी॥
श्रीकामः श्रीर्किं र्ब्रिं कुर्वीत राज्यकामस्तु नेत्रयोः॥ मुखे लक्ष्म्याद्यकामस्तु पादयो मुखकामकृत्॥
इति ज्ञानमालायां॥ नक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपं॥ न दूर्वया यजेद्देवीं न सूर्यं बिल्वपत्रकैः॥
उन्मत्तमर्कपुष्पं च विष्णोर्वर्ज्यं सदा बुधैः॥ अक्षतास्तु यवा प्रोक्ता इति॥ तंत्रांतरे॥ महाभिषेकं स

५९ र्वत्रशं खेनैव प्रकल्पयेत्॥ सर्वत्रैव प्रशस्तोयः शिवसूर्यार्चनं विनेति॥ ॥अथव्रतोद्यापनानुक्तौ वि
धिः॥ नंदीपुराणे॥ कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितं॥ उद्यापनं विना यत्तु तद्व्रतं निष्फलं
भवेत्॥ यत्र चोद्यापनं नोक्तं व्रतानुगुणतश्चरेत्॥ वित्तानुसारतो दद्यात् अनुक्तोद्यापने व्रते॥ गां
वकांचनं दद्यात् व्रतस्य परिपूर्तये॥ गौः प्रत्यक्षा॥ तन्मौल्यं वा॥ गवामभावे निष्कस्यान्तदर्धपादं
वच॥ सुवर्णस्य रौप्यस्य वा॥ उक्तोद्यापने तु॥ आदौ मध्ये तथा चांते व्रतस्योद्यापनं भवेदिति॥ व्रतारं
भे संपूर्णता विधिः॥ भविष्ये॥ कृष्ण उवाच॥ किंचित् भग्नं प्रमादेन यद्व्रतं व्रतिनां स्थितं॥ तत्संपूर्णं
भवेत्सर्वं व्रतेनानेन पांडव॥ यस्य व्रतस्य यो देवः तद्रूपं हेमनिर्मितं॥ द्विभुजं पंकजारूढं कार्यं प्रहसि
ताननं॥ स्नापयेत्सप्रसादं प्राघृतक्षौद्ररसांबुभिः॥ गंधचंदनपुष्पैश्च पूजां कुर्यात्समाहितः॥ तोय ५९

पूर्णस्य कुंभस्य मुखे विन्यस्य देवतां॥ धूपदीपाक्षतैर्वस्त्रैरत्नैर्बहुप्रकारकैः॥ अर्घ्यं दद्याच्च तेनाम्ना
मंत्रेणानेन पांडव॥ उपवासस्य दानस्य प्रायश्चित्तं कृतं मया॥ शरणं च प्रपन्नास्मान् कुरुष्वाद्य व
यं पुनः॥ प्रसन्नो भयभीतभिन्नचर्यव्रतस्य च॥ कुरु प्रसादं संपूर्णं व्रतं संजायतां मम॥ यच्च छिद्रं न प
छिद्रं यच्छिद्रं व्रतकर्मणि॥ तत्सर्वं त्वत्प्रसादेन संपूर्णं जायतां मम॥ पूर्वदक्षिणपश्चाच्च उत्तरे च बलिं
हरेत्॥ उपयद्गुत्वात्सर्वेभ्यो दिक्पालेभ्यो नमोनमः॥ इदं अर्घ्यं इदं पाद्यं तेभ्यस्तेभ्यस्तेभ्यो नमो
नमः॥ पादौ तु जानुनी चैव कटिं शीर्षं क वक्षसि॥ कुक्षिं च हृदयं पृष्ठं वा चं चक्षुः शिरोरुहान्॥ पू
जयित्वास्य देवस्य ततः पश्चात् क्षमापयेत्॥ पूजितस्त्वं यथाशक्त्या नमस्तेस्तु सुरोत्तम॥ ऐहिकामु
ष्मिकी देवकार्यासिद्धिर्मम प्रभो॥ एवं क्षमापयित्वा तु देवं विप्राय दापयेत्॥ दानं पूर्वामुखो विप्रः

१२ दातावैचोनरामरव ः॥इद्रंव्रतंमयाखंडंव्रतंआसीत्सुराद्विज॥तत्सर्वंपूर्णमेवास्तुतवमूर्तिप्रदान
तः॥ब्राह्मणोपिप्रयच्छेतमंत्रेणानेनतेव्रतं॥संपूर्णस्यात्प्रसादेनदेवदेवस्यशार्ङ्गिण ः॥ब्राह्मणा
यत्प्रभाषंतेतन्मन्यंतेदिवौकस ः॥सर्वदेवमयाविप्रानतद्वचनमन्यथा॥व्यासवाल्मीकावचना
त्पराशरवसिष्ठयोः॥गर्गगौतमधौम्यात्रिवसिष्ठांगिरसस्तवचनोनारदादीनांपूर्णभवतु
तेव्रतं॥एवंविधिविधानेनगृहीत्वाब्राह्मणोव्रजेत्॥ततः पंचमहायज्ञान्निर्वपेद्भोजनादिकं॥
एवंयःकुरुतेभक्त्याव्रतमेतन्नरोत्तम॥तस्यसंपूर्णतांयातित्तद्व्रतंयत्सुराकृतं॥खंडंसंपूर्णतां
यातिप्रसन्नेव्रतदेवतेइति॥ ॥अथाचार्यकृत्यं॥कृताचार्योदर्भेष्वासीनोदर्भान्धारयमाणः
प्राणानायम्यदेशकालौसंकीर्त्यअमुकव्रतोद्यापनेयजमानेनवृतोहंआचार्यकर्मक १२

रिष्ये॥गणपतिंसंपूज्य॥शरीरशुध्यर्थपवनपावनभूतशुध्यादिपुरुषसूक्तन्यासांश्चकुर्यात्॥
उत्तरीयापवमानपावनादिकृत्वापुरुषसूक्तन्यासान्आरभेत्॥तद्यथा॥सहस्रशीर्षेतिषोड
शर्चस्यसूक्तस्य॥नारायणऋषिः॥पुरुषोदेवता॥अनुष्टुप्छंदः॥अंत्यात्रिष्टुप्॥न्यासेदे
पूजायांचविनियोगः॥ॐसहस्रशीर्षा॰वामकरायनमः॥पुरुषएवेदं॰दक्षिणकराय॰एता
वानस्य॰वामपादाय॰त्रिपादूर्ध्व॰दक्षिणपादाय॰तस्माद्विरा॰वामजान्वे॰यत्पुरुषेण॰॥
दक्षिणजान्वे॰तंयज्ञं॰वामकट्यै॰तस्माद्यज्ञा॰दक्षिणकट्यै॰तस्माद्यज्ञात्सर्वहुतऋ॰नाभ्यै॰॥
तस्मादश्वा॰हृदया॰यत्पुरुषं॰कंठाय॰ब्राह्मणो॰वामबाहवे॰चंद्रमामन॰दक्षिणबा॰नाभ्या॰॥
मुखाय॰सप्तास्या॰नेत्राभ्यां॰यज्ञेन॰मूर्ध्नेन॰अथपंचांगन्यासः॥ब्राह्मणोस्येतिहृदयाय

१३ नमः॥ चंद्रमा॰। शिरसे स्वा॰। नाभ्या आसीत् इति शिखायै वौ॰। सप्तास्यासन् इति कवचाय हुं॥ यज्ञे
न यज्ञमयजन्त इति नेत्रत्रयाय वौषट्। सहस्रशीर्षा इत्यस्त्राय फट्॥ ततः पुरुषसूक्तेन त्रिवारं व्यापकं कुर्यात्॥ ततः भागाभूमिं गत्वा सर्वतः सर्ष
पान् विकिरेत्॥ यदत्र संस्थितं भूतमिति मंत्रद्वयेन ततः साधितपंचगव्येन कुशैः सर्वत्र प्रोक्षणं॥
शुचीवो हव्या आपो हि ष्ठेति तृचेन कार्यं ततः कृतांजलिः॥ स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयं प
ठेत्॥ देवाः आयांतु यातुधाना अपयांतु विष्णो देवयजमानं रक्षस्वेति वदेत्॥ ततः सर्वतोभ
द्रलिंगतोभद्रे वा ब्रह्मादिदेवताः स्थापयेत्॥ ॥तद्यथा॥ मध्ये ब्रह्मजज्ञानं गौतमो वामदेवो
ब्रह्मा त्रिष्टुप्॥ ब्रह्मावाहने विनियोगः॥ ब्रह्मजज्ञानं॰। ब्रह्मणे नमः॥ ब्रह्माणं आवाहयामि॥
एवं सर्वत्र॥ मंडलाद्बहिः प्रागादिक्रमेण लोकेशान्॥ त्रातारं गर्ग इंद्रस्त्रिष्टुप्॥ इंद्रावाहने॰। त्रा १३

तारमिंद्र॰। इंद्रं आवाह॰। अग्निं दूतं काण्वो मेधातिथिरग्निर्गायत्री॥ अग्न्यावा॰। अग्निं दूतं वृणी॰।
अग्निं आ॰। दक्षिणस्यां॥ यमाय सोमं यमो यमोनुष्टुप्॥ यमावाह॰। यमाय सोमं॰। यमं॰। निर्ऋत्यां॥ मो
षुणो घोरः कण्वो निर्ऋतिर्गायत्री॥ निर्ऋत्यावा॰। मोषुणः॰। निर्ऋतिं॰। पश्चिमे॥ तत्त्वायामि शुनःशे
पो वरुणस्त्रिष्टुप्॥ वरुणावा॰। तत्त्वायामि॰। वरुणं॰। वायव्यां॥ वायो शतं गौतमो वामदेवो वायुरनुष्टु
प्॥ वाय्वावा॰। वायो शतं॰। वायुं आ॰। उत्तरे॥ आप्यायस्व गौतमः सोमो गायत्री॥ सोमावा॰। आ
प्याय॰। सोमं॰। ईशान्यां॥ तमीशानं गौतम ईशानो जगती॥ ईशाना॰। तमीशानं॰। ईशानं॥ ई
शानेंद्रमध्ये॥ अस्मे अत्रेर्मैत्रावरुणो वसवस्त्रिष्टुप्॥ वस्वावा॰। अस्मे अत्र॰। वसून्॰। इंद्राग्नि
मध्ये॥ आरुद्रास इत्यस्य श्यावाश्व एकादशरुद्रो जगती॥ एकादशरुद्रावा॰। आरुद्रास॰। एकादशरु

१४ द्रान्॰। अग्निंयममध्ये॥ त्यांनुस्तोमदोमत्स्योद्वादशादित्यागायत्री॥ द्वादशादित्याआ॰। त्यांनुक्ष
त्रि॰। द्वादशादित्यान्॰। यमनिर्ऋतिर्मध्ये॥ मरुतोयस्यराहूगणोमरुतोगायत्री॥ मरुताआ॰। म
रुतो॰। मरुतः॰। निर्ऋतिवरुणमध्ये॥ ओमासोमधुछंदाविश्वेदेवागायत्री॥ विश्वेदेवाआ॰। ओ
मास॰। विश्वांदेवान्॰। वरुणवायुमध्ये॥ यज्ञेनयज्ञमितिनारायणःपुरुषस्त्रिष्टुप्॥ साध्यादे
वाआ॰। यज्ञेन॰। साध्यान्देवान्॰। वायुसोममध्ये॥ अश्विनावर्तिराहूगणोगोतमोश्विनाउष्णि
क्॥ अश्व्याआ॰। अश्विना॰। अश्विनौ॰। सोमेशानमध्ये॥ यदक्रंदोदीर्घतमास्कंदस्त्रिष्टुप्॥ स्कं
दआ॰। यदक्रंद॰। स्कंदं॰। ब्रह्मेंद्रमध्ये॥ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री॥ विष्णाआ॰। इदंवि
ष्णु॰। विष्णुं॰। ब्रह्माग्निमध्ये॥ गणानांत्वागृत्समदोगणाधिपतिर्जगती॥ गणपत्याआ॰। गणा १४

नांत्वा॰। गणपतिं॰। ब्रह्मयममध्ये॥ आयंतुनःप्रजापतिःपितरस्त्रिष्टुप्॥ पित्राआ॰। आयंतुनः
पि॰। पितॄन्॰। ब्रह्मनिर्ऋतिमध्ये॥ अप्सरसांमैत्रावरुणिगंधर्वाप्सरसोनुष्टुप्॥ गंधर्वाप्सरसःआ॰।
अप्सरसां॰। गंधर्वाप्सरसआ॰। ब्रह्मवरुणमध्ये॥ अज्ञानंप्रजापतिःसप्तमातरोनुष्टुप्॥ सप्तमात्रा॰।
अज्ञानंसप्तमा॰। सप्तमातृःआआ॰। ब्रह्मवायुमध्ये॥ नमोअस्तुसर्पेभ्योविश्वेदेवाःसर्पाअनुष्टु
प्॥ सर्पाआ॰। नमोअस्तुस॰। येअंतरि॰। नमः॥ सर्पान्आ॰। ब्रह्मसोममध्येतामग्निवर्णांसोभ
रिर्दुर्गास्त्रिष्टुप्॥ दुर्गाआ॰॥ तामग्निवर्णां॰। दुर्गाआ॰। ब्रह्मेशानमध्ये॥ इमंमेगंगेसिंधुक्षित्प्रिय
मेधागंगायमुनासरस्वत्योजगती॥ गंगाआ॰। इमंमेगंगे॰। गंगादिनदीःआ॰। ततःमंडलात्
पश्चिमानदलादारभ्यदलाग्राष्टकेषु। ऐशान्यां॥ अदितिर्द्यौःस्योदक्षोनुष्टुप्॥ दक्षाआ॰। अदि

१५ निर्ऋजं॰।दक्षंआ॰।पूर्वे॥सहस्रशीर्षेतिनारायणःपुरुषोनुष्टुप्॥नारायणाय॰।सहस्रशीर्षा॰।
पुरुषंआ॰।आग्नेय्यां॥जातवेदसेकश्यपोदुर्गात्रिष्टुप्॥दुर्गायै॰।जातवेदसे॰।दुर्गांआ॰।दक्षि
णस्यां॥उदीरतांशंखस्वधात्रिष्टुप्॥स्वधायै॰।उदीरता॰।स्वधांआ॰।नैर्ऋत्यां॥परंमृत्योःसंकु
शुकोमृत्युस्त्रिष्टुप्॥मृत्योराय॰।परंमृत्यो॰।मृत्युंआ॰।पश्चिमे॥आयंगौःसर्पराज्ञीसर्पागायत्री॥
सर्पाय॰।आयंगौः॰।शेषंआ॰।वायव्यां॥धाम्नोधाम्नोराजन्सप्तसागराअष्टी॥सप्तसागराय॰
धाम्नोधाम्नो॰।सप्तसागरान्आ॰।उत्तरे॥मरुतोयस्यराहूगणोमरुतोगायत्री॥मरुतआ॰।मरुतो
यस्यहि॰।मरुतःआ॰।मध्येब्रह्मणःपादमूले॥आतूनइंद्रेतिकाण्वोगणपतिर्गायत्री॥गणप
तये॰।आतूनइंद्र॰।गणपतिंआ॰।कर्णिकाधःस्योनामेधातिथिर्भूमिर्गायत्री॥भूम्यावाहने॰। १५

स्योनापृथिवि॰।भूमिंआ॰।तदुपरिमेरवेनमः॥मेरुंआ॰।ततःपरितःपूर्वादिक्रमेण॥पूर्वे॥अ
ग्निमीळेइतिऋग्वेदंआ॰।दक्षिणस्यांइषेत्वेतियजुर्वेदंआ॰।पश्चिमे॥अग्नआयाहिवीतयइ
तिसामवेदंआ॰।उत्तरेशन्नोदेवीतिअथर्ववेदंआ॰।मंडलबाह्येपूर्वादिक्रमेणदिक्पालायुध
वाहनानि॥पूर्वे॥वज्राय॰।आग्नेयादि॥शक्तये॰।दंडाय॰।खड्गाय॰।पाशाय॰।अंकुशाय॰।
गदायै॰।त्रिशूलाय॰।पुनः।तद्बाह्येपूर्वादिः॥ऐरावतायनमः॥मेषाय॰।महिषाय॰।प्रेताय॰।म
कराय॰।एणाय॰।शिबिकायै॰।वृषभाय॰।पुनःपूर्वामारभ्यतद्बाह्ये॥गौतमाय॰।भरद्वाजा
य॰।विश्वामित्राय॰।कश्यपाय॰।जमदग्नये॰।अत्रये॰।वसिष्ठाय॰।अरुंधत्यै॰।तद्बाह्येपूर्वा
दि॥आदित्यादिग्रहान्॥पूर्वेसूर्यं॰।एवमग्रेपि॥सोमं॰।भौमं॰।बुधं॰।गुरुं॰।शुक्रं॰।शनिं॰।रा

१६ दं॰ पूर्वेशांतराले॥ केतुं॰ तद्वास्येशक्रयः पूर्वादि॥ ऐंद्री॰ कौमारी॰ ब्राह्मी॰ वाराही॰ चामुंडा॰ वै
ष्णवी॰ माहेश्वरी॰ विनायकी॰ ॥ लिंगतोभद्रेतु भैरवाष्टकं त्वत्स्यंते स्थापयेत्॥ असितांग भैरवं आ॰
रुरुभैरवं॰ चंडभैरवं॰ क्रोधभैरवं॰ उन्मत्तभैरवं॰ कालभैरवं॰ भीषणभैरवं॰ संहारभैरवं॰ स्थाप्य॥
तदस्तमिवा वरुणा॰ गृह्णाबै प्रतिष्ठापूजयेत्॥ ॥तद्यथा॥ देशकालौ संकीर्त्य ब्रह्मादिस्थापितदेवता
नां षोडशोपचारैः पूजनमहं करिष्ये॥ स्वयामतः जलपूर्णकलशं प्रतिष्ठाप्य॥ संपूज्य गंगाद्यावाह्य॥
ततः दक्षिणतः शंखं संपूज्य पंगं संपूज्य॥ आत्मानं पूजासामग्रीं च संप्रोक्ष्य तन्मंत्रैर्नाममंत्रैर्वा पुरु
षसूक्तेन च पूजयेत्॥ ततः मंडलोपरि अक्षतपुंजे कलशं प्रतिष्ठापयेत्॥ ॥तद्यथा॥ ॐ मही द्यौरिति
भूमिं स्पृष्ट्वा॥ ॐ ओषधयः संवदंते तिय वान् क्षिप्त्वा॥ आकलशेष्विति कलशं निधाय॥ इमं मे गंगे॰ १६

गंपद्वारां॰ या ओषधीरिति सर्वोषधीः॥ कांडात्कांडादिति दूर्वा॥ अश्वत्थेवेति पंचपल्लवान्॥ स्योना
पृथिवीति मृदः॥ याः फलिनीरिति पूगीफलं॥ सहिरत्नानीति रत्नानि॥ हिरण्यरूप इति हिरण्यं॥ यु
वा सुवासा इति वस्त्रेणावेष्ट्य॥ पूर्णादर्वीति परिधान्य पूर्णपात्रं न्यसेत्॥ तत्वायामीति वरुणं आ
वाह्य पूजयेत्॥ कलशस्य मुखे विष्णुरित्यावाह्य प्रार्थयेत्॥ देवदानवसंवादे मथ्यमाने महोदधौ॥
उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः॥ त्वयि ति
ष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः॥ आदित्या वस
वो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तु
मीहे जलोद्भव॥ सांनिध्यं कुरु देवेश प्रसन्नो भव सर्वदा॥ ततः प्रतिमा अग्न्युत्तारणं कुर्यात्॥ तद्यथा॥

१७ देशकालौ संकीर्त्य अस्यदेवस्य पूज्यत्वाधिकारसिध्यर्थं अग्न्युत्तारणं करिष्ये॥ अग्निः सप्तिमि
तिसप्तर्चस्य सूक्तस्य सौचिको निम्बेदेवास्त्रिष्टुप्॥ अग्न्युत्तारणे वि०। सप्तिं वाजं भरं ददाति॥ अ
ग्निः सप्ति०। अश्वयंतुर्जयत्यनुवाकेन वा॥ ॥अथ प्राणप्रतिष्ठा॥ ॥अस्य श्री प्राणप्रतिष्ठामंत्रस्य
ब्रह्मविष्णुमहेश्वरा ऋषयः॥ ऋग्यजुःसामाथर्वाणि छंदांसि॥ चैतन्यरूपा परा प्राणशक्तिर्दे
वता॥ आंबीजं॥ ह्रीं शक्तिः॥ क्रौं कीलकं॥ देवस्य प्राणप्रतिष्ठापने वि०। ॐ आं ह्रीं क्रौं अं कं खं
गं घं ङं० ॐ क्रौं ह्रीं आं पृथिव्यप्तेजो वाय्वाकाशात्मने आं अंगुष्ठाभ्यां०। ॐ आं ह्रीं क्रौं इं चं छं जं झं ञं
आं शब्दस्पर्शरसरूपगंधात्मने ईं तर्जनीभ्यां०। ॐ आं ह्रीं क्रौं उं टं ठं डं ढं णं ऊं क्रौं ह्रीं आं श्रोत्रत्व
क्चक्षुजिह्वाघ्राणात्मने उं मध्यमा०। ॐ आं ह्रीं क्रौं एं तं थं दं धं नं ऐं क्रौं ह्रीं आं वाक्पाणिपादपा १७

यूपस्थात्मने ऐं अनामिका०। ॐ आं ह्रीं क्रौं ॐ पं फं बं भं मं ॐ क्रौं ह्रीं आं वचनादानगतिविसर्गानं
दात्मने औं कनिष्ठि०। ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं ळं क्षं अः क्रौं ह्रीं आं मनोबुध्यहंकारचित्तवि
ज्ञानात्मने अः करतलकरपृष्ठाभ्यां०। एवं हृदयादि॥ ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं क्षं अः क्रौं ह्रीं
आं देवस्य प्राण इह प्राणाः॥ ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं क्षं अः क्रौं ह्रीं आं देवस्य जीव इह स्थि
तः॥ ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं क्षं अः क्रौं ह्रीं आं देवस्य सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुश्रो
त्रजिह्वाघ्राणपाणिपादपायूपस्थ इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ असुनीते इति ऋचं पठेत्॥
गर्भाधानादिपंचदशसंस्कारसिध्यर्थं पंचदश प्रणवावृत्तिं करिष्ये॥ गणना कुर्यात्॥ ततः॥ र
क्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पं

१८ चबाणान्॥ बिभ्राणा स्रुक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखक
री प्राणशक्तिः परा नः॥ ततः चत्वारि वागिति पठेत्॥ ततः कलशस्थपूर्णपात्रोपरि सावरणं देवं त
तं देवताप्रकाशमंत्रेण संस्थाप्य पूजयेत्॥ पात्रांतरे वा पंचामृतस्नानपर्यंतं संपूज्य तदनंतरं क
लशे स्थापयेदिति वा॥ ॥अथ पूजाविधिः सर्वतंत्रेषु सामान्यतः उच्यते॥ ॥आगच्छ देवदेवे
श तेजोराशे जगत्पते॥ क्रियमाणां मया पूजां गृहाण सुरसत्तम॥ नानारत्नसमानीतं कार्तस्व
रविभूषितं॥ आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां॥ पुरुष एवेदमासनं॥ पाद्यं गृहाण देवेश स
र्वक्षेमकर प्रभो॥ भक्त्या समर्पितं देव लोकनाथ नमोस्तु ते॥ एतावानस्येति पाद्यं॥ नमस्ते देवदे
श नमस्ते धरणीधर॥ नमस्ते जगदाधार अर्घ्यं नः प्रतिगृह्यतां॥ त्रिपादूर्ध्व अर्घ्यं॥ कर्पूरवासितं १८

तोयं मंदाकिन्याः समाहृतं॥ आचम्यतां जगन्नाथ मया दत्तं च भक्तितः॥ तस्माद्विराळजायत आचमनीयं॥
शर्करारससंयुक्तं पयोदधिघृतं मधु॥ पंचामृतं मयानीतं स्नानार्थं परमेश्वर॥ पंचामृतस्नानं॥ आ
प्यायस्वेति पयःस्नानं॥ दधिक्राव्णेति दधिस्नानं॥ घृतं मिमिक्षे इति घृतस्नानं॥ मधुवातेति मधुस्ना
नं॥ स्वादुः पवस्वेति शर्करास्नानं॥ आपोहिष्ठेति शुद्धोदकेन स्नाप्य॥ पंचोपचारैः संपूज्य महाभिषे
कं कुर्यात्॥ गंगा च यमुना चैव नर्मदा च सरस्वती॥ तापी पयोष्णी कृष्णा च ताभ्यः स्नानार्थमाहृतं॥
तोयमेतत्सुखस्पर्शं स्नानाय प्रतिगृह्यतां॥ यत्पुरुषेण स्नानं॥ रुद्रेण पुरुषसूक्तेन श्रीसूक्तेन च तत्त
देवताप्रकाशकसूक्तेन मंत्रेण मूलमंत्रेण वा महाभिषेकं कुर्यात्॥ सर्वभूषाधिके देव लोकलज्जानि
वारणे॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां॥ तं यज्ञमिति वस्त्रं॥ देवदेव नमस्तेस्तु त्राहि मां भ

११ वसागरात ।। ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ।। तस्माद्यज्ञात्सर्वहुतः संभृतमिति यज्ञोपवीतं ।।
श्रीखंडं ० तस्माद्यज्ञात्सर्वहुतऋचः इति मिति गंधं ।। माल्यादीनि ० तस्मादश्वा इति पुष्पं ।। वनस्पति ०
यत्पुरुषं व्यदधुः धूपं ।। साज्यं ० ब्राह्मणोस्येति दीपं ० अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं ।। भक्ष्य
भोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यतां ।। चंद्रमा मनसो नैवेद्यं ।। इदं फलं ० फलं सम ० पूगीफलं मह
द्दिव्यं ० नाभ्या आसीदिति तांबूलं ।। हिरण्यगर्भ ० सप्तास्यासन् ० दक्षिणां ।। चंद्रादित्यौ च धरणी
विद्युदग्निस्तथैव च ।। त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यतां ।। नीराजनं ।। नमस्ते पुंडरीका
क्ष नमस्तेस्य मरप्रियः ।। नमस्ते जगदादानंदेवदेव नमोस्तु ते ।। यज्ञेन यज्ञमिति पुष्पांजलिः ।।
अन्यान्यपि तत्तद्देवतासूक्तानि पठित्वा पुष्पांजलिः ।। यानि कानि ० इति प्रदक्षिणां ।। नमः सर्व ११

हितार्थाय जगदाधार हेतवे ।। साष्टांगोयं प्रणामस्ते प्रयत्नेन मया कृतः ।। इति नमस्कारः ।। यन्म
या भक्तिसंयुक्तं पत्रं पुष्पं फलं जलं ।। प्रकल्पितं च नैवेद्यं तद्गृहाण जगत्पते ।। इति सर्वपदार्थसम
र्पणं ।। इति सामान्यपूजाविधिः ।। ।। इति श्रीमत्चित्पावनकुलाब्धिसंभवघारोपनामकब
ड्डाळसूरिसूनुशंकरविरचितायां व्रतोद्यापनकौमुद्यां सर्वव्रतसाधारणपरिभाषाप्रकरणं स
माप्तिं अफाणीत् ।। ।। अथ व्रतोद्यापनानि लिख्यंते ।। तत्र तावत्सर्वव्रतानां मध्ये एकादश्याः
प्राधान्यात् प्रथमं एकादशीव्रतोद्यापनमुच्यते ।। अथ एकादशीव्रतोद्यापनं चिकीर्षुः ।। दश
म्यां एकाशन उक्तनियमवान् द्वितीयेह्नि प्रातः नद्यादौ भस्मगोमयमृत्तिकास्नापुरःसर स्नात्वा
स्नानांगतर्पणं कृत्वा अहतेवाससी परिधाय तिलकादि धृत्वा शरीरशुद्ध्यर्थं ब्रह्मकूर्चं पुरः

२० सः रंपंच ऽगव्यंप्राश्य ॥ स्वगृह्यविधिना नित्यकर्म निर्वर्त्य ॥ कूष्मांडहोमाग्निना आज्यान्नं पाचयि
त्वा ॥ मध्याह्ने द्विजाधिकान् शुचीन् अध्यात्मविदः उक्तगुणसंपन्नान् द्विजान् उपवेश्य ॥ स्वयं द
र्भेष्वासीनो दर्भान् धारयमाणो देवब्राह्मणवंदनपुरःसरं सपत्नीकः प्रधानसंकल्पं कुर्यात् ॥ त
द्यथा ॥ देशकालौ संकीर्त्य मम अखिलपापक्षयपूर्वक धर्मार्थकाममोक्षचतुर्विधपुरुषार्थ
सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अमुककामनया वा मया आचरितं यत् शुक्लैकादशीव्रतं तथा कृ
ष्णैकादशीव्रतं तत्संपूर्णफलावाप्तये शुक्लकृष्णैकादशीव्रतोद्यापनाख्यं कर्म करिष्ये ॥ पृथक्पृ
थक् वा शुक्लकृष्णैकादश्योः संकल्पः कार्यः ॥ पित्रादीनां चेत् तर्हि तेषां ऊहः कार्यः ॥ तदंगविहितं
गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यब्रह्मसदस्यर्त्विग्वर्णनं च करिष्ये ॥ २०

इति संकल्प्य ॥ स्वगृह्यविधिना कुर्यात् ॥ केचिद् गणेशपूजनपूर्वकं पुण्याहवाचनमेव वदंति ॥
आचार्यवरणं ॥ यजमानः स्वगोत्रादि उच्चार्य ॥ अमुकगोत्रं अमुकशर्माणं ब्राह्मणं एकादशीव्र
तोद्यापनाख्ये कर्मणि विहितकर्मकर्तुं आचार्यत्वामहं वृणे ॥ वृतोऽस्मीति प्रतिब्रूयात् ॥ आचार्य
स्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत ॥ ॥ इति प्रार्थ्य
मधुपर्कादिना पूजयेत् ॥ संवृतवयाः ॥ ततः पूर्ववत् ब्रह्माणं वृत्वा ॥ यथा चतुर्मुखो ब्रह्मा सर्वलोकपि
तामहः ॥ तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥ इति संप्रार्थ्य पूर्ववत् पूजयेत् ॥ ततः सदस्यं ॥
त्वन्नो गुरुः पिता माता त्वं प्रभुस्त्वं परायणं ॥ आयद्विमोक्षणार्थाय सादस्यं त्वामहं वृणे ॥ वृत्वा पूर्व
वत् पूजयेत् ॥ इति संप्रार्थ्य पूर्ववत् पूजयेत् ॥ ततः ॥ ऋत्विजः ॥ भगवन्सर्वधर्मज्ञ सर्वधर्मभृतां वरः ॥ वि

नतेममयज्ञेस्मिन्नृत्विक्‌त्वंभवसुव्रत॥इत्वापूर्ववत्पूजयेत्॥प्रार्थयेच्च॥अस्ययागस्यनिष्पत्तौ
भवंतोभ्यर्थितोमया॥सुप्रसन्नैश्चकर्तव्यंकर्मेदंविधिपूर्वकमिति॥ततःआचार्यःसंकल्पंकृत्वा
पूजासामग्रींगृहीत्वायजमानदेशंगत्वापूर्वोक्तप्रकारेणसर्वतोभद्रब्रह्मादिदेवताआवाह्यसंपूज्य॥
तत्रअष्टदलपद्मेदेवताआवाहयेत्॥तद्यथा॥प्रणवस्यपरब्रह्मऋषिः॥परमात्मादेवतादेवीगा
यत्रीछंदः॥व्याहृतीनांक्रमेणजमदग्निभरद्वाजभृगवोऋषयः॥अग्निर्वायुःसूर्योदेवता॥देवी
गायत्रीदेवीउष्णिक्‌॥देवीबृहत्यश्छंदांसि॥पुरुषावाहनेविनियोगः॥तत्रकर्णिकायां॥भूःपु
रुषंआ०॥भुवःपुरुषंआ०॥स्वःपुरुषंआ०॥भूर्भुवस्वःपुरुषंआ०॥ततःसौवर्णप्रतिमायां॥सह
स्रशीर्षानारायणःपुरुषोनुष्टुप्‌॥पुरुषावाह०॥सहस्रशीर्षालक्ष्मीयुतपुरुषमध्येआ०॥स्थाप्यप

रितःअग्निं॥इंद्रं॥प्रजापतिं॥विश्वान्देवान्‌॥ब्रह्माणं॥वासुदेवं॥रामं॥श्रियं॥आवाह्यनाम
मंत्रेण॥ततःपूर्वपश्चिमोत्तरदलाभ्यंतरेषु॥स्त्रीचतुःसहस्रसहितांरुक्मिणीं०।स्त्रीचतुःसह
स्रसहितांसत्यभामां०।स्त्रीचतुःसहस्रसहितांजांबवतीं०।स्त्रीचतुःसहस्रसहितांकालिंदींचावा
ह्य॥ततःआग्नेयादिकोणेषुक्रमेण॥शंखं०।चक्रं०।गदां०।पद्मंचावाह्यपुरतः॥सामध्वनिशरीर
स्त्वंवाहनंपरमेष्ठिनः॥विषपापहरोनित्यमतःशांतिंप्रयच्छमे॥इतिगरुडंआवाह्य॥परितःपू
र्वादिक्रमेण॥इंद्राद्यष्टौलोकपालांस्तत्तन्मंत्रैर्णैर्वाआवाह्य॥तदस्तु०।गृहाणेवं०।पूर्वोक्तप्रकारेणपू
जयेत्॥पुष्पानंतरंअंगपूजांकुर्यात्॥दामोदराय०।पादौपू०।एवंसर्वत्र॥माधवायनमः॥जा
नुनीपू०।कामपतये०।गुह्यंपू०।वामनाय०।कटिंपू०।पद्मनाभाय०।नाभिंपू०।विश्वमूर्त्तये०।उद

रं पू०॥ ज्ञानगम्याय०॥ हृदयं पू०॥ श्रीकंठसंगिने न०॥ कंठं पू०॥ सहस्रबाहवे०॥ बाहो पू०॥ योगयोगिने
न०॥ चक्षुषी पू०॥ उरुगायन०॥ ललाटं पू०॥ नाकसुरेश्वराय०॥ नासां पू०॥ श्रवणेशायन०॥ श्रवणे पू०॥
सर्वकामदाय०॥ शिखां पू०॥ सहस्रशीर्ष्णे न०॥ शिरः पूजयामि॥ सर्वरूपिणे०॥ सर्वांगं पू०॥ धूपं स०॥
दीपं स०॥ नैवेद्यांश्च चतुर्विंशत्सथ दद्यादनुक्रमात्॥ भक्त्या चतुर्विंशतिषु तिथिष्वपि परंतप॥
इच्छया वा तदा दद्यात् यदै वोद्यापनं भवेत्॥ मोदकान् गुडकान् चूर्णान् घृतपूरकमंडकान्॥ सो
होलिकादिकं सारः सेवासक्तुः फलानि च॥ वटकान् पायसं दुग्धं शालिदध्योदनं तथा॥ इडीरिकाः
पूरिकाश्च अपूपान् गुडमोदकान्॥ तिलपिष्टं खंडपिष्टं लाजदुग्धं सशर्करं॥ रंभाफलं च सघृतं सु
द चूर्णं गुडोदनं॥ एवं क्रमेण नैवेद्यं दद्याद्दिनस्य तुष्टये॥ नमस्कारो विस्तरं चिरोषार्घ्यं दद्यात्॥ नैजसे २२

पात्रजलं नारिकेरं बीजपूरं अक्षतान पुष्प चंदनादि फलं हिरण्यं निक्षिप्य जानुभ्यां धरणीं गत्वा इ
मं मंत्रं उदीरयेत्॥ नारायण जगन्नाथ लक्ष्मीकांत दयानिधे॥ गृहाणार्घ्यं मया दत्तं व्रतसंपूर्तिहेतवे इ
ति॥ मूलमंत्रेण पूजयेदिति वा॥ ततः ब्राह्मणान् संपूज्य॥ गीतशास्त्रपुराणकथाश्रवणादिना जाग
रपूर्विकां रात्रिं निनयेत्॥ ततः प्रातः आचार्यः नित्यकर्म निवर्त्य मंडलस्थदेवताः पंचोपचारैः संपूज्य॥
होममारभेत्॥ तद्यथा॥ देशकालौ संकीर्त्य॥ शुक्ल एकादशीव्रतोद्यापनांगभूतं विहितहवनं करिष्ये॥
इति संकल्प्य॥ समचतुरस्रं अरत्निमात्रं होमानुसारेण अधिकं वा चतुरंगुलोत्सेधं सन्मृदा स्थंडिलं निष्पा
द्य॥ तत्र यजमानशाखया तदभावे ऋत्विक्शाखया अग्निप्रणयनादिकं विदध्यात्॥ तदुक्तं मानवसंहिता
यां॥ कर्तुः शाखोक्तमार्गेण आचार्यस्याथ वा पुनः॥ कुर्यादग्निप्रणयनं हवनादिविधिं तथा॥ ततः अ

२२ न्वादध्यात्॥ तद्यथा॥ एकादशीव्रतोद्यापनहवनेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥ इतिसंकल्प्य॥
श्रद्धएहीत्यादि॥ चक्षुः शाखिनां॥ अग्निमन्वाहिनेष्मोजातवेदस्समित्यारभ्यचक्षुषीआज्येनेत्यंतमुक्त्वा॥
अत्रप्रधानं॥ पुरुषंपुरुषसूक्तेनप्रत्यृचंआज्येनअमुकावृत्तिसंख्यया॥ अग्निंइंद्रंप्रजापतिंवि
श्वान्देवान्ब्रह्मादिन्नाज्येनएकवारं॥ वासुदेवंरामंश्रियंविष्णुनाममंत्रेणघृताक्तपायसद्र
व्येणएकवारं॥ पुनः। विष्णुंविष्णोर्नुकमितिमंत्रेणषण्मंत्रैः प्रत्यृचंघृताक्तपायसद्रव्येण॥
अग्निंवायुंसूर्यंप्रजापतिंचएकवारंघृताक्तपायसद्रव्येण॥ केशवादिदामोदरांतंद्वादशदेवताः
नाममंत्रैः एकवारंपायसद्रव्येण॥ स्त्रीचतुःसहस्रसहितांरुक्मिणींस्त्रीचतुःसहस्रसहितांस
त्यभामांस्त्रीचतुःसहस्रसहितांजांबवतींस्त्रीचतुःसहस्रसहितांकालिंदींशंखंचक्रंगदांपद्मं २२

गरुडंइंद्राद्यष्टौलोकपालान्ब्रह्मादिमंडलदेवताश्चएकैकयाज्याहुत्यायक्ष्ये॥ शेषेणस्विष्ट
कृतमित्यादिपयसिस्थालीपाकविधिनाचरुंश्रपयित्वा॥ पवित्रंतेविततमितिप्रापणंउद्धरेत्॥
आज्यभागांतंकृत्वाप्रधानदेवताहिमयेत्॥ सहस्रशीर्षा०१६॥ अग्नये० इंद्राय० प्रजापत० विश्वे
भ्योदेवेभ्य० ब्रह्मणे० इत्याज्येन॥ अथघृताक्तपायसेन॥ वासुदेवाय० श्रियै० विष्णवे० विष्णो
र्नुकंतदस्यप्रियमप्रतद्विष्णुरितितिसृणांदीर्घतमाविष्णुस्त्रिष्टुप्॥ हवनेवि०॥ विष्णोर्नुकं०॥ त
दस्यप्रियं०॥ प्रतद्विष्णुः०॥ परोमात्रयाविचक्रमेत्रिर्देवइतितिसृणांवसिष्ठोविष्णुस्त्रिष्टुप्॥ ह
वने०॥ परोमात्रया०॥ विचक्रमे०॥ त्रिर्देवः०॥ भूः स्वाहा॥ भुवः स्वा०॥ स्वः स्वाहा॥ भूर्भुवि०॥ अथके
वलपायसेन॥ केशवायनमः स्वाहा॥ नारायणा०॥ माधवा०॥ गोविंदाय०॥ विष्णवेन०॥ मधुसू

२४ दनाय॰।त्रिविक्र॰।वामना॰।श्रीधराय॰।हृषीकेशा॰।पद्मनाभा॰।दामोदरा॰।अथकेवलाज्ये
ना।।स्त्रीचतुःसहस्रसहितायैरुक्मिण्यैनमः॰।स्त्रीचतुःसहस्रसहितायैसत्यभामायैनमः॰।
स्त्रीचतुःसहस्रसहितायैजांबवत्यै॰।स्त्रीचतुःसहस्रसहितायैकालिंद्यै॰।शंखायनमस्वाहा।।
चक्राय॰।गदायै॰।पद्माय॰।गरुडाय॰।इंद्राय॰।अग्नये॰।यमाय॰।निर्ऋतये॰।वरुणाय॰।वाय
वे॰।सोमाय॰।ईशानाय॰।तत्तन्मंत्रैर्वाहुत्वा।।ततः ब्रह्मादिमंडलदेवताःतत्तन्मंत्रैर्नाममंत्रैर्वा
केवलाज्येनहोमयेत्।।ॐब्रह्मणेन॰।इंद्राय॰।अग्नये॰।यमाय॰।निर्ऋतये॰।वरुणाय॰।वायवे॰।
सोमाय॰।ईशानाय॰।अष्टौवसू॰।एकादशरुद्रा॰।द्वादशादि॰।मरु॰।विश्वेभ्योदेवे॰।साध्ये॰।अ
श्विन्यां॰।स्कंदाय॰।विष्णवे॰।गणपतये॰।पितृभ्यः॰।गंधर्वाप्सरोभ्यः॰।सप्तमातृ॰।सर्वे॰।दुर्गा २४

यै॰।गंगादिनदीभ्यो॰।दक्षाय॰।नारय॰।स्वधायै॰।मृत्यवे॰।शेषाय॰।समुद्रेभ्य॰।मरुद्भ्यः॰।गणप
तये॰।पृथिव्यै॰।भैरवे॰।ऋग्वेदाय॰।यजुर्वेदा॰।सामवेदा॰।अथर्व॰।वज्राय॰।शक्तये॰।दंडाय॰।
खड्गाय॰।पाशाय॰।अंकुशाय॰।गदायै॰।त्रिशूला॰।ऐरावताय॰।मेषाय॰।महिषा॰।प्रेताय॰।
मकराय॰।एणाय॰।शिबिकायै॰।वृषभाय॰।गौतमाय॰।भरद्वाजाय॰।विश्वामित्राय॰।कश्यपा
य॰।जमदग्न॰।अत्रये॰।वसिष्ठाय॰।अरुंधत्यै॰।सूर्याय॰।सोमाय॰।भौमाय॰।बुधाय॰।गुरवे॰।
शुक्राय॰।शनैश्चराय॰।राहवे॰।केतवे॰।ऐंद्र्यै॰।कौमार्यै॰।ब्राह्म्यै॰।वाराह्यै॰।चामुंडायै॰।वैष्ण
व्यै॰।माहेश्वर्यै॰।वैनायक्यै॰।ततःस्विष्टकृतं।।ततःयजमानःदेवायप्रापणनिवेदयेत्।।अने
नमंत्रेण।।त्वामेकमाद्यंपुरुषंपुराणंनारायणंविश्वसृजंयजमानः।।त्वय्येषभागोविहितोविधेयो

२५ गृहाण हव्यं जगतामधीश॥ इति निवेद्य तिष्ठेत्॥ ततः अग्निं त्रिवारं चतुर्वारं वा प्रदक्षिणीकृ
त्य॥ ॥भिंधि विश्वा ऽअपद्विष इति धरण्यां जानुनी निपात्य॥ ऋचसूक्तं पुरुषसूक्तं जप्त्वा॥ अ
ष्टौ पदानि प्रतिदिशं गच्छेत्॥ एभिर्मंत्रैः॥ कृष्णाय वासुदेवाय हरये परमात्मने॥ शरण्याय प्रमेया
गोविंदाय नमो नमः॥ नमः स्थूलाय सूक्ष्माय व्यापकाव्यापकाय च॥ अनंताय जगद्धात्रे ब्रह्मणेनं
तमूर्तये॥ अव्यक्तायाखिलेशाय चिद्रूपाय गुणात्मने॥ नमो मूर्ताय सिद्धाय पराय परमात्मने॥ दे
वदेवाय वद्याय पराय परमेष्ठिने॥ कर्त्रे विश्वस्य गोप्त्रे च संहर्त्रे चेतनेनमः॥ ॥अथ दं बाय विचे
दि॥ तत्रापणं॥ आनीय मूर्ध्नि कृत्वा घोषयत्॥ केंवेष्णवाः केंवेष्णवाः इति उच्चैः वदेत्॥ ततः
समानाः प्रतिवदेयुः॥ वयंवैष्णवाः वयंवैष्णवा इति॥ ततः तेभ्यः समानेभ्यो हविर्भिर्दत्वा॥ स्वयं॥ २५

ॐ नमो भगवते वासुदेवायेति मंत्रेण इदं अमृतं अहं प्राश्नामि॥ इति प्राश्य॥ आचम्य प्राणानाय
म्य॥ यजमानः आचार्यो वा॥ सिद्धये स्वाहेति अग्नौ आज्यं च जुहुयात्॥ ततः यतइंद्र भयामहइत्यने
न आत्मानं अभिमंत्रयेत्॥ ततः आचार्य रज्जुप्रहरणं कृत्वा प्राग्प्रश्चित होमशेषसमापयेत्॥ ॥
ततः॥ यजमानः तिथ्यादि संकीर्त्य कृतस्य एकादशी व्रतोद्यापनस्य सांगतासिध्यर्थं आचार्यादीन्
वस्त्रतांबूलदक्षिणादिभिः पूजयिष्ये॥ इति संकल्प्य॥ विध्युक्तप्रकारेण संपूज्य दक्षिणादिभिः सं
तोष्य॥ अचार्याय श्वेतां सवत्सां सालंकारां गां दद्यात्॥ तद्यथा॥ यजमानः॥ एकादशी व्रतोद्या
पनपूर्तिकामः नारायणप्रीतये आचार्याय गोदानमहं करिष्ये॥ इति संकल्प्य॥ आचार्यं सं
पूज्य गोपूजामारभेत्॥ तद्यथा॥ गोपूजां करिष्ये इति संकल्प्य॥ गवामंगे आदौ देवतान्यासं

२५ कुर्यात्॥ ब्रह्मविष्णुभ्यांनमः ब्रह्मविष्णुन्यासादि॥ एवमग्रेपि॥ ललाटाग्रेमहादेवाय०॥ नासावं
शेषण्मुखाय०॥ कर्णयोः अश्विभ्यां०॥ चक्षुषोः शशिभास्कराभ्यां०॥ दंतेषुवायुभ्यः॥ जिह्वा
यांवरुणाय०॥ हुंकारेसरस्वत्यै०॥ गंडयोः यमधर्मराजाभ्यां०॥ ओष्ठयोः संध्याद्वयाय०॥ ग्रीवायांइं
द्राय०॥ कुक्षिदेशेरक्षोभ्यो०॥ उरसिसाध्येभ्य०॥ चतुष्पादेषुधर्माय०॥ खुरमध्येगंधर्वेभ्यो०॥ खुरपार्श्वे
अप्सरेभ्यो०॥ पृष्ठेएकादशरुद्रेभ्यो०॥ सर्वसंधिषुवसुभ्यो०॥ श्रोणितटेपितृभ्यो०॥ लांगूलेषुसोमाय०॥
वालेषुआदित्यरश्मिभ्यो०॥ गोमूत्रेगंगायै०॥ गोमयेयमुनायै०॥ क्षीरेसरस्वत्यै०॥ दधिनिनर्मदायै०॥ स
सर्पिषुहुताशनाय०॥ रोमसुदेवानां०॥ अष्टाविंशतिकोटिभ्यः०॥ उदरेपृथिव्यै०॥ पयोधरेषुचतुःसा
गरेभ्योनमः॥ ततः उपकल्पयेद्इतिध्यायेत्॥ सर्वभेदिसर्वहितेपवित्रेपापनाशिनी॥ गृहाणेदंनमस्या २५

दत्तंपाद्यंत्रैलोक्यवंदिते॥ भूर्भुवःस्वः रुद्ररूपिण्येगवेपाद्यं०॥ सर्वदेवमयिदेविसर्वतीर्थमयेशुभे॥ गृ
हाणार्घ्यंमयादत्तंसौरभेयिनमोस्तुते॥ अर्घ्यं०॥ देहस्थितासिरुद्राणिशंकरस्यसदाप्रिये॥ धेनुरूपे
णसादेवीममपापंव्यपोहतु॥ आचमनीयं०॥ यालक्ष्मीःसर्वलोकेषुयाचदेवेष्ववस्थिता॥ धेनुरूपे
ण०॥ स्नानं०॥ आच्छादनंगवेदद्यात्सम्यक्शुद्धंसुशोभनं॥ सुरभिर्वस्त्रदानेनप्रीयतांपरमेश्वरी॥ वस्त्रं०॥
श्रीखंडमितिगंधं॥ ततोअलंकारान्॥ शृंगभूषणार्थसुवर्णं॥ चरणभूषार्थरजतं॥ भालभूषार्थआ
दर्शं॥ नेत्रभूषार्थंरत्नद्वयं॥ कंठभूषार्थंघंटां॥ पुष्पस्रजंच॥ सर्वावयवभूषार्थंपट्टकूलं॥ पृष्ठभूषा
र्थंताम्रं॥ पुच्छभूषार्थंमुक्ताफलस्रजं॥ कुंकुमकर्पूरकस्तूरिकासुगंधद्रव्याणि॥ सप्तधान्यानिध
नपूर्णकुंभंचपरितःकल्पयेत्॥ माल्यादीनीतिपुष्पं॥ वनस्पत्यो०॥ धूपं०॥ साज्यंच०॥ दीपं०॥ सुरभिस्त्वं

२७ जगन्मातर्देविविष्णुपदेस्थिते॥सर्वदेवमयेग्रासंमयादत्तमिमंग्रस॥गोग्रासं॥फलं॥तांबूलं॥
दक्षिणां॥पंचगावःसमुत्पन्नामथ्यमानेमहार्णवे॥तासांमध्येतुयानंदातस्यैदेव्यैनमोनमः॥नम
स्कारः॥गावोमेअग्रतःसंतुगावोमेसंतुपृष्ठतः॥गावोमेहृदयेनित्यंगवांमध्येवसाम्यहं॥इति
प्रदक्षिणीकुर्वन्प्रार्थयेत्॥उपह्वयेऽ॰वैदिकमंत्रान्पठेच्च॥ततोयजमानःसजलतिलकुशाक्षतं
गोपुच्छंगृहीत्वास्वगोत्रादिउच्चार्यःआचार्यगोत्रादिकंउच्चार्यइमांगांसवत्सांयथाशक्तिविभू
षितांव्रतसंपूर्त्तासिद्धिद्वारामहाविष्णुप्रीत्यर्थंतुभ्यमहंसंप्रददे॥इतिसतिलंजलंतद्धस्तेनिक्षिप
त्॥नममेतित्यागंकुर्यात्॥प्रतिगृहीतासावित्रेणयजुषाप्रतिगृह्य॥ॐस्वस्तीत्युक्त्वास्वस्वशा
खायांकामस्तुतिंपठेयुः॥गौरस्मारयतुइत्यादिपठित्वा॥यज्ञसाधनभूतायाविश्वस्याघौघनाशि २७

नी॥विश्वरूपधरोदेवःप्रीयतामनयागवा॥अनेनगोदानेनमहाविष्णुःप्रीयतां॥ततःगोदानस्य
सांगतासिध्यर्थंहिरण्यगर्भेतिमंत्रेणसुवर्णदक्षिणांतेनदद्यात्॥ततःआगावोअग्मन्नितिमंत्रेण
प्रदक्षिणांकुर्यात्॥इतिगोदानं॥ततःयजमानःद्वादशसंख्याकान्ब्राह्मणान्केशवादिद्वादश
देवतास्वरूपान्विभाव्यकेशवादिद्वादशनामांकितान्दद्यात्॥तत्रमंत्रः॥पक्वान्नपूरितंकुंभंद
क्षिणावस्त्रसंयुतं॥ददामिद्विजवर्यायदेवोनप्रीयतामिति॥देवपदस्थानेकेशवादिनाम्नांऊहःका
र्यः॥ततःपीठदानं॥इमंपीठंसोपस्करंलक्ष्मीनारायणप्रतिमायुतंमहाविष्णुप्रीतयेतुभ्यमहंसंप्र
ददेइति॥आचार्यायदद्यात्॥ततआचार्यः॥उत्तिष्ठब्रह्मणस्पतेइतिपीठदेवताःउत्थाप्यपात्रांत
रेघृतकलशोदकेनसपत्नीकंयजमानंसमुद्रज्येष्ठाइत्यादिभिर्वैदिकैर्मंत्रैः॥सुरास्त्वामित्यादिभिःपौराणि

२८ कैर्मंत्रैर्वैष्णवसूक्तैश्चअभिषिंचेत्॥ततःस्नातःयजमानःअग्निंसंपूज्य॥यस्यस्मृत्या०मंत्रही
नमितिक्षमाप्य॥अभ्यारमिदद्वयो०यांतुदेवगणाःसर्वेइतिविसर्जयेत्॥ततःकृतस्यकर्मणःसां
गतासिध्यर्थंब्राह्मणान्यथाशक्तिभोजयिष्येयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजे॥तेन
श्रीकर्मांगस्वरूपीपरमेश्वरःप्रीयतां॥ततःसदन्नेनदक्षिणादिनाब्राह्मणादिनासंतोष्य॥आशि
षोगृहीत्वाव्रतसंपूर्णतांवाचयेत्॥जपछिद्रंतपछिद्रंयछिद्रंव्रतकर्मणि॥सर्वंभवतुमेछिद्रंब्राह्म
णानांप्रसीदतः॥इतिसंप्रार्थ्य॥अछिद्रंभवतुतेव्रतमितिब्राह्मणाप्रतिवदेयुः॥ततःतान्नमस्कृ
त्यइष्टजनैःसहसोत्सवभुंजीत॥ ॥इतिशुक्लैकादशीव्रतोद्यापनंसमाप्तं॥ ॥अथकृष्णैका
दशीव्रतोद्यापनलिख्यते॥यजमानःदेशकालौसंकीर्त्यआत्मनःपापक्षयार्थंपूर्वकृएकविंश २८

तिपुरुषानुद्धर्तुकामनयालक्ष्मीनारायणप्रीतयेचआचरितस्यकृष्णैकादशीसांगतासिध्यर्थंकृ
ष्णैकादशीव्रतोद्यापनाख्यंकर्मकरिष्ये॥इतिसंकल्प्य॥पूर्वोक्तप्रकारेणगणेशपूजामारभ्यआ
चार्यवरणांतंकर्मकुर्यात्॥ततःआचार्यःपूर्वोक्तप्रकारेणसर्वतोभद्रब्रह्मादिदेवताआवाह्य
संपूज्य॥तदुपरितिलपूर्णंसंकर्षणादिद्वादशनामांकितंतिलपूर्णराजतपूर्णपात्रयुतंकलशंप्र
तिष्ठाप्य॥तत्रोपरिअष्टदलंविलिख्य॥कर्णिकायांभूःपुरुषमित्याद्यावाह्य॥मध्येसहस्रशीर्षे
तिसौवर्णलक्ष्मीनारायणप्रतिमांआवाह्य॥ततःपूर्वादिदिक्षुप्रत्येकंचतुःसहस्रस्त्रीसहितांरु
क्मिणींसत्यभामांजांबवतींकालिंदींचावाह्य॥ततःआग्नेयादिविदिक्षुगणपतिंदुर्गांक्षेत्राधिप
तिंवास्तोष्पतिंचावाह्य॥पुनःपूर्वादिदिक्षुब्रह्मजज्ञानमितिब्रह्माणं॥विष्णोर्नुकमितिविष्णुं॥ब

२९ लभद्रं॥ प्रद्युम्नं॥ त्र्यंबकमितित्र्यंबकं॥ वसुदेवं॥ रामं॥ अनिरुद्धं॥ वामभागे श्रियं॥ पु
रतः॥ राजतं गरुडं॥ पुनः आग्नेयादिकोणेषु॥ शंखं॥ चक्रं॥ गदां॥ पद्मं॥ पुनः पूर्वादिक्र
मेण॥ विमलां॥ उत्कर्षिणीं॥ ज्ञानं॥ क्रियां॥ योगं॥ प्रह्वं॥ सत्यं॥ ईशानं॥ एषु भागे॥ अनु
ग्रहं॥ पुनः पूर्वादिक्रमेण॥ इंद्राद्यष्टौ लोकपालान् तत्तन्मंत्रैर्नाममंत्रैर्वा आवाह्य॥ पूर्वोक्त
प्रकारेण षोडशोपचारैः संपूज्य॥ पुराणपठनादिना रात्रिं निनयेत्॥ प्रातः पुनः पीठदेवताः
संपूज्य॥ पूर्वोक्तप्रकारेण अग्निं प्रतिष्ठाप्य॥ अन्वादध्यात्॥ अत्र प्रधानं॥ संकर्षणादिकृष्णां
तद्वादशदेवताः घृताक्तपायसेन एकैकया कृत्वा पुरुषं विष्णुं अष्टोत्तरसहस्रसंख्याक घृता
क्ततिलाज्याहुतिभिः॥ अष्टोत्तरशतसंख्याभिर्वा॥ अग्निं वायुं सूर्यं प्रजापतिं प्रत्येकं स्वीच २९

तुः सहस्रसंहितायां रुक्मिणीसत्यभामां जांबवतीकालिंदी एकवारं पायसेन॥ वासुदेवं रामं
श्रियं विष्णुं विष्णोर्नुकमिति षण्मंत्रैः प्रत्येकं पायसेन॥ गणपतिं दुर्गां क्षेत्राधिपतिं वास्तोष्प
तिं ब्रह्माणं बलभद्रं प्रद्युम्नं त्र्यंबकं अनिरुद्धं गरुडं शंखचक्रं गदापद्मं॥ विमलाद्याः अनुग्रहांतदे
वताः इंद्राद्यष्टौ लोक ब्रह्मादि मंडलदेवताश्च एकैकया आज्याहुत्या यक्ष्ये॥ शेषेण स्विष्टकृतमि
त्यादि पर्यासं स्थालीपाकविधिना चरुं श्रपयित्वा॥ पवित्रंते विततं ब्रह्मणस्पत इति मंत्रेण प्राशणं
उद्धृत्य॥ आज्यभागांतं कृत्वा प्रधानदेवताहोमयेत्॥ ॥ॐ संकर्षणाय नमः स्वाहा॥ वासुदेवा
य॰ प्रद्युम्नाय॰ अनिरुद्धाय॰ पुरुषोत्तमाय॰ अधोक्षजाय॰ नारसिंहाय॰ अच्युताय॰ जनार्दना
य॰ उपेंद्राय॰ हरये॰ कृष्णाय॰ घृताक्तपायसेन॥ एकवारं॥ सहस्रत्रीर्षाघृताक्ततिलैः॥ भूः स्वा॰

३० भुवः स्वा॰ स्वः स्वा॰ भूर्भुवः स्वः॰ प्रत्येकं स्त्री चतुः सहितायै रुक्मिण्यै सत्यभामायै जांबवत्यै कालिं
दै॰ वासुदेवाय॰ रामाय॰ श्रियै॰ विष्णोर्नुकं॰ तदस्य प्रियं॰ प्रतद्विष्णु॰ परोमात्रया॰ विचक्रमे॰
त्रिर्देवः॰ केवलपायसेन॥ ॥अथाज्येन॥ गणपतये॰ दुर्गायै॰ क्षेत्राधिपतये॰ वास्तोष्पतये॰
तत्तन्मंत्रैर्वा॰ ब्रह्मणे॰ बलभद्राय॰ प्रद्युम्नाय॰ त्र्यंबकाय॰ अनिरुद्धाय॰ गरुडाय॰ शंखाय॰
चक्राय॰ गदायै॰ पद्माय॰ विमलायै॰ उत्कर्षिण्यै॰ ज्ञानायै॰ क्रियायै॰ योगायै॰ प्रव्ह्यै॰
सत्यायै॰ ईशानायै॰ अनुग्रहायै॰ इंद्रायेत्यादि लोकपालेभ्यः॰॥ ब्रह्मादिमंडलदेवताभ्यः॥
इति हुत्वा॥ ततः स्विष्टकृतं हुत्वा॥ ततः पूर्वोक्तप्रकारेण देवाय प्रापणनिवेदनमारभ्य प्रायश्चि
त्तहोमांतकर्म निवर्त्य॥ आचार्याय कृष्णां गां दत्वा॥ द्वादश ब्राह्मणान् संकर्षणादि कृष्णांतरद्वाद ३०

शनामभिः संपूज्य॥ तेभ्यः दक्षिणादियुतान् तिलपूर्णान् संकर्षणादि द्वादशनामांकितान् कल
शान् दद्यात्॥ पीठं दत्वा॥ सदन्नेन ब्राह्मणान् यथाविभवं संभोज्य दक्षिणादिभिः प्रतोष्य॥ व्रतसं
पूर्णतां वाचयित्वा शिष्योगृही स्वाइष्टजनैः सह भुंजीत॥ ॥इति कृष्णैकादशी व्रतोद्यापनं॥ ॥
इदं शुक्लकृष्णैका व्रतोद्यापनं बोधायनसूत्रानुसारेण लिखितं॥ ॥पुराणोक्तं तु सर्वतोभद्रे ब्रह्मा
दिदेवतास्थापनपूर्वकं कलशं प्रतिष्ठाप्य तत्र अष्टदलपद्मसुवर्णघटिकातल लक्ष्मीनारायण प्रतिमां इ
दं विष्णुरिति मंत्रेण प्रतिष्ठाप्य पुरतः राजतं गरुडं परितः लोकपालाद्यष्टकं स्थाप्य पुरुषसूक्तेन षोड
शोपचारैः संपूज्य पुराणपठनादिना रात्रिं निनयेत्॥ प्रातः अग्निं प्रतिष्ठाप्य तं कृत्वा॥ इदं विष्णुरिति मं
त्रेण घृताक्तपायसेन घृताक्ततिलैश्च प्रत्येकं अष्टोत्तरसहस्रशतं हुत्वा कपिलां गां दत्वा चतुर्विंशति ब्रा

२९ ह्मणान् केशवादिनामभिः संपूज्य केशवादिनांकितान् चतुर्विंशतिकलशान् पक्वान्नपूरितान् व
स्त्रदक्षिणायुतान् दद्यादिति॥ उद्यापनं तु प्रबोधिन्यां मार्गशीर्षभीमतिथौ॥ माघे वैशाखे वि
नसमद्वौशुभे तिथौ वा कुर्यादिति पाद्मात्॥ इति श्रीमत्तुंगकर्याव्रतोद्यापनं कौमुपां एकादशी
व्रतं॥ ॥अथ प्रतिपद्व्रतानि॥ ॥चैत्रशुद्धप्रतिपदि आरोग्यव्रतं॥ ॥भविष्ये॥ तत्र संवत्सरावसा
ने पंचदश्यां उपोषितः प्रतिपदि प्रातः स्नात्वा तिथ्यादि संकीर्त्य आत्मनः आरोग्यादिप्रतिकामनया
सूर्यप्रीत्यर्थं आरोग्यप्रतिपद्व्रतं करिष्ये॥ इति संकल्प्य॥ पंचवर्णनिर्मितपद्मभास्करं सांगं संपूज्य पा
यसादि उपहारं निवेद्य सदन्नेन ब्राह्मणान् संतर्प्य दिनचतुर्थभागे स्वयं घृतं एकमवग्रासं भक्षयित्वा अ
वशिष्टान्नं त्यजेत्॥ ब्राह्मणास्तु मंस्राबाघृतवर्जं भुंजीत॥ एवं त्रयोदशवर्षं कृत्वा उद्यापनप्रकारेण अं २९

तेसौवर्णीं सूर्यप्रतिमां संपूज्य ब्राह्मणान् संभोज्य व्रतपूर्तये गां ब्राह्मणाय दद्यादिति आरोग्यव्रतं॥
॥ ॥अथ विद्याव्रतं॥ स्कांदे॥ चैत्रशुद्धप्रतिपदि तिथ्यादि संकीर्त्य आत्मनः सांगविद्याप्राप्तिकामः ब्र
ह्मप्रीत्यर्थं विद्याव्रतं करिष्ये॥ इति संकल्प्य॥ पंचवर्णरचिते अष्टपत्रपद्मे तु कर्णिकायां ब्रह्मज्ञान
मिति ब्रह्माणं॥ पूर्वपत्रे ऋग्वेदं॥ दक्षिणे यजुर्वेदं॥ पश्चिमे सामवेदं॥ उत्तरे अथर्ववेदं॥ आग्नेये अंगानि॥
नैर्ऋत्ये धर्मशास्त्राणि पुराणि वायव्ये॥ ईशान्यां न्यायविस्तारान्॥ तत्तन्मंत्रैः आवाह्य पूजयेत्॥ ब्रा
ह्मणान् संभोज्य स्वयं उपवासं कुर्यात्॥ एवं द्वादशमासस्थशुक्लप्रतिपत्सु कुर्यात्॥ अंते सर्वतोभद्रस्थ
कलशे सौवर्णब्रह्माणं संपूज्य गां दत्वा विप्रान् सदन्नेन भोजयेदिति स्वयमपि आशिषो गृहीत्वा भुंजी
यादिति॥ ॥इति विद्याव्रतं समाप्तं॥ अथ रोटकसोमनाथव्रतं॥ ॥भविष्ये॥ श्रावणशुद्धप्रतिपत्सोमवा

२२ रयुतायदा॥ तदा कार्यं प्रथमसोमवारेवा॥ सार्द्धमासत्रयं कार्यं॥ अधिकसौभाग्यपूर्णसंपतिकामः सो
मेशप्रीत्यर्थं रोटकसोमनाथव्रतं करिष्ये इति संकल्प्य॥ कार्त्तिकशुक्लचतुर्दशी पर्यंतं प्रत्यहं बिल्वदलैः सां
बं संपूज्य॥ कार्त्तिकशुक्लचतुर्दश्यां उपोष्य रात्रौ देवं पंचामृतपुरःसरं नानापुष्पादिभिः संपूज्य॥ प्रातः पु
रुषाहारसंमितरोटकपंचकं कृत्वा द्वौ ब्राह्मणाय एकं देवाय द्वौ आत्मने एवं वर्षपंचकं कृत्वा अंतेरा
जतं सांबं उद्यापनविधिना संपूज्य हेमरौप्यरोटकौ यथाशक्ति कृत्वा आचार्यं संपूज्य व्रतपूर्त्तयेत
स्मै दत्वा॥ गां च दत्वा ब्राह्मणान् भोजयेदिति॥ इति रोटकसोमनाथव्रतं समाप्तं॥ इति श्रीमत् शांकर्यां
प्रतिपद्व्रतानि॥ अथ द्वितीयाव्रतानि॥ तत्र भविष्ये॥ अपराह्णव्यापिन्यां कार्यं॥ दिनद्वये व्याप्तौ अव्या
प्तौ परैव॥ यमद्वितीयाव्रतं॥ ॥ कार्त्तिकशुद्धद्वितीयायां प्रातःसाभ्यंगस्नात्वा॥ आत्मनः अवैधव्या २२

पात्रायुष्यवृद्धिप्राप्तिकामनया यमपूजां करिष्ये॥ इति संकल्प्य॥ पटे चंदनादिना यमं चित्रगुप्तं यमदूतांश्च वि
लिख्य पूजयेत्॥ ततः भ्रातृभगिनीभिः यमाय अर्घ्यो देयः॥ अर्घ्यमंत्रस्तु॥ एह्येहि मार्तंड जपाशहस्त
यकालादिभिरन्वितेश॥ भ्रातृद्वितीयांकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते॥ भ्राता भगिनीवस्त्रा
दिना प्रतोष्य तद्गृहे भुक्त्वा ततः भगिनी आशिषः प्रार्थयते॥ मार्कंडेय महाभाग सप्तकल्पांतजीवन॥
चिरंजीवी यथा त्वं हि तथा मे भ्रातरं कुरु इति॥ ॥ इति यमद्वितीयव्रतं समाप्तं॥ ॥ अथ सुकृतफलव्र
तं॥ ॥ भविष्ये॥ श्रावणशुद्धद्वितीयायां भृगुवारयुतायां चंद्रोदयव्यापिन्यां कार्यं व्रतग्रहणं॥ देशका
लौ संकल्प्य॥ मम अखिलपापक्षयपूर्वक पुत्रपौत्रसौभाग्याद्यभिवृद्धिद्वारा लक्ष्मीनारायणप्रीतये
वर्षत्रयाचरितस्य सकृतफलव्रतस्य संपूर्णतासिद्ध्यर्थं तदुद्यापनाख्यं कर्म करिष्ये॥ इति संकल्प्य॥

२३ पूर्वोक्तप्रकारेणआचार्यःसर्वतोभद्रस्थकलशेसौवर्णंविष्णोर्नुकमितिमंत्रेणनारायणसकुपिवे
तिलक्ष्मींचसंपूज्यसुवर्णफलयुतंवंशपात्रस्थवायनकंपुरतःस्थाप्यरात्रिंनिनयेत्॥प्रातःअग्निंप्र
तिष्ठाप्यअन्वादध्यात्॥नारायणंलक्ष्मींचतिलसर्पिर्भ्यांअष्टोत्तरशतसंख्याकाहुतिभिःप्रतिद्र
व्यंब्रह्मादिमंडलदेवताश्चएकैकयाज्यायक्ष्ये॰।स्थापनमंत्राभ्यांहोमयेत्॥ततःआचार्यंसंपूज्य
वायनंदद्यात्॥पंचामृतयुतानिगोधूमानिउदुंबरफलसहितानिअनेनमंत्रेणदद्यात्॥पुत्रपौत्रस
मृध्यर्थंसौभाग्यादिरोग्यसिद्धये॥वायनकंसंप्रदास्यामिव्रतसंपूर्णहेतवे॥लक्ष्मीनारायणौदेवौअ
स्मात्संसारसागरात्॥रक्षंतुसकलापापापुण्यंसर्वंददातुमे(?)च॥श्रीवर्णेचद्वितीयायांसुभद्रार्चित
माधव॥सकृत्दानफलंमत्यंसफलाश्चमनोरथाः॥श्रीकृष्णःप्रतिगृह्णातुश्रीकृष्णोवैददातिच॥ २३

श्रीकृष्णस्तारकोभाभ्यांश्रीकृष्णःप्रीयतामिति॥ततःकपिलांगांदत्वाचतुर्विंशतिब्राह्मणान्सद
न्नेनसंतर्प्यआशिषोगृहीत्वास्वयंभुंजीत॥इतिसकलफलव्रतंसमाप्तं॥ ॥अथबालचंद्रव्रतं॥भ
विष्ये॥मार्गशीर्षशुद्धद्वितीयायांचंद्रोदयव्यापिन्यांकार्यं॥देशकालौसंकीर्त्य॥आत्मनःअवैधव्यपु
त्रपौत्रसौभाग्यलक्ष्मीप्राप्तिकामनयासोमराजप्रीत्यर्थंद्वादशवर्षपर्यंतंआचरितंयत्बालचंद्रव्रतं
तस्यसंपूर्णतासिद्ध्यर्थंउद्यापनाख्यंकर्मकरिष्ये॥ ॥ततव्रताचार्यःसर्वतोभद्रस्थकलशेसौवर्णं
आप्यायस्वेतिमंत्रेणविधुंसंपूज्य॥क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर॥गृहाणार्घ्यंमयादत्तं
रोहिण्यासहितःशशिन्॥इतिअष्टांगार्घ्यंदत्वाप्रार्थयेत्॥सोमराजनमस्तुभ्यंक्षीराब्धिमथनो
द्भव॥व्रतेनक्रियमाणेनतुष्टोभवनिशांपते॥ततःअग्निंप्रतिष्ठाप्य॥अन्वादध्यात्॥सोमराजंपा

२४ ऌशसमित्तिलयवाज्यैअष्टोत्तरशतसंख्याकाहुतिभिः प्रतिद्रव्यब्रह्मादिदेवताश्च एकैकयाज्याहु
त्यायक्ष्ये॥ स्थापनमंत्रेणकृत्वागांवायनंचदत्वाब्राह्मणान्भोजयेदिति॥ इतिव्रतोद्यापनकौमुद्यां
द्वितीयाव्रतानि॥ ॥अथतृतीयाव्रतानि॥ तत्रभविष्ये॥ पूर्वाह्णव्यापिन्यांचैत्रशुद्धतृतीयांसौभाग्य
शयनव्रतं॥ द्वादशअष्टौसप्तवावर्षाणिकार्यं॥ प्रातःशुक्लतिलैस्नात्वादेशकालौसंकीर्त्य॥ आत्मनःभ
र्त्रासहएकशय्यासनशयनभोगसौभाग्यपुत्रपौत्राद्यभिप्राप्तयेउमामहेश्वरप्रीत्यर्थंसौभाग्यशय
नव्रतंकरिष्येइतिसंकल्प्य॥ उमामहेश्वरयोः प्रतिमांसौवर्णींपूजाविधिनापंचामृतपुरःसरंतत्तन्मं
त्राभ्यांपीठेसंपूज्यअंगपूजामारभेत्॥ पाटलायैनमः॥ शिवायैनमः॥ पादौपूजयामि॥ एवंसर्वत्र॥
जयायै॰ शिवायन॰ गुल्फौ॰ त्रिगुणा॰ भवान्यै॰ जंघायुगं॰ रुद्राय॰ जयायै॰ जानुनी॰ हरिके २८

शाय॰ वरदायै॰ ऊरू॰ ईशानाय॰ रत्यै॰ कटिं॰ शूलिने॰ कोटरायै॰ कुक्षिद्वयं॰ शूलपाणये॰ मं
गलायै॰ उदरं॰ सर्वात्मने॰ ईशान्यै॰ कुचद्वयं॰ वेदात्मने॰ रुद्राण्यै॰ कंठं॰ त्रिपुरघ्ना॰ विश्वायै॰
करद्वये॰ हराय॰ भवान्यै॰ नाशयुगं॰ उग्राय॰ ललितायै॰ भ्रूयुगं॰ शर्वाय॰ देव्यै॰ कर्णौ॰ श्रीकं
ठाय॰ शिवायै॰ केशान्॰ भीमाय॰ सर्वात्मने॰ शिरः पूजयामि॥ इतिसंपूज्य॥ पुरतःसौभाग्याष्टकं
स्थापयेत्॥ घृतनिष्पावकुसुंभक्षीरजीरकतृणराजवृक्षुलवणधान्यानि॥ चैत्रे गोशृंगोदकंप्राश्य॥
भूमौस्वपेत्॥ पुनःप्रभातेसंपूज्य॥ देवंद्विजदांपत्यंवस्त्रादिनासंपूज्य॥ सौभाग्याष्टकयुतंसुवर्णप्रति
माद्वयंसदक्षिणाकंललितीप्रीयतामितिवदन्ब्राह्मणायदद्यात्॥ एवंप्रतिमासंतृतीयायांप्राशनेदानमंत्रेपु
ष्पेचविशेषः॥ चैत्रादिद्वादशमासेषुक्रमेण॥ गोशृंगोदकं॥ गोमयं॥ मंदारकुसुमं॥ बिल्वपत्रं॥ दधिकु

२५ शोदकं॥क्षीरं॥दधदाज्यं॥गोमुत्रं॥घृतं॥कृष्णतिलान्॥पंचगव्यं॥ललिता॥विजया॥भद्रा॥भवानी॥कुं
मुदा॥शिवा॥वासुदेवी॥गौरी॥मंगला॥कमला॥सती॥उमा॥पुष्पाणि क्रमेण॥मल्लिका॥अशोकं॥
कमलं॥कौसुंभं॥नीलोत्पलं॥मालती॥कुब्जकं॥करवीरं॥बाणं॥चंपकं॥सिंदूरवारं॥जयां॥एते
षां अभावे करवीरं सर्वत्र॥व्रतांते सर्वोपस्कारयुते शयने हैमं उमामहेश्वरं गोयुग्मं च देवं पुरतः सं
पूज्य॥ततः वस्त्रादिना दंपती संपूज्य दद्यात्॥सुखसंतानवृध्यर्थं शयनं ते द्विजोत्तम॥ददामि व्रतपूर्त्यर्थं
प्रीयेतां मे उमेश्वरौ॥इति अन्या अपि दंपतीः यथाविभवं संपूज्य गां च सवत्सां दत्वा ब्राह्मणान् सदन्ने
न संतर्प्य आशिषो गृहीत्वा स्वयं भुंजीत॥इति सौभाग्यशयनव्रतं॥ ॥अथ स्कांदे॥मध्याह्नव्यापि
न्यां चैत्रशुक्लतृतीयायां अरुंधतीव्रतं॥तिथ्यादि संकीर्त्य॥आत्मनः अवैधव्यसौभाग्यपुत्रपौत्रावा २५

प्तिकामनया अरुंधतीव्रतं करिष्ये॥पूर्वं त्रिरात्रोपोषिता नक्ताशीवा॥वृताचार्यः सर्वतोभद्रमंडले
जीरकपुंजे लवणान्विते वस्त्रयुग्मवेष्टिते कलशे हैमवसिष्ठअरुंधतीप्रतिमे नाममंत्रेण प्रतिष्ठाप्य॥उ
पचारैः संपूज्य॥अथांगपूजां कुर्यात्॥वेदवंद्यायै० पादौ पू०॥लोकवंद्यायै० जानुनी०॥संपत्तिदायै० कटिं०॥
गंभीरनाभ्यै० नाभिं पू०॥लोकधात्र्यै० स्तनौ०॥जगत्त्र्यै० कंठं पू०॥शांत्यै० बाहू०॥वरदायै० हस्तौ०॥धृ
त्यै० मुखं पू०॥अरुंधत्यै० शिरः०॥वसिष्ठप्रियायै० सर्वांगं०॥उत्तरार्घ्यं॥अरुंधति महाभागे वसिष्ठ
प्रियवादिनि॥सौभाग्यं देहि मे देवि गृहाणार्घ्यं०॥ततः नमस्कारः॥पुत्रान् देहि धनं देहि सौभाग्यं देहि सु
व्रते॥अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते॥ततः सुवासिनीः संपूज्य मातः नमस्कारमंत्रेण नाम
मंत्रेण वा होमः॥होमं कुर्यात्॥अत्र प्रधानं॥अरुंधतीं समित्तिलाहुतिभिः प्रतिद्रव्यं अष्टोत्तरशतसं

३५ ख्याकाहुतिभिः ब्रह्मादिदेवताभ्यैकैकयाज्याहुत्या यक्ष्ये॥ ततः होमं समाप्य॥ आचार्यं संपूज्य॥ घृतपू
रितं कांस्यपात्रं सदीपं पीठं च दत्वा चतुर्विंशति द्वादश वा यथाशक्ति वा मिथुनानि संपूज्य मोदकपोलिकापू
रिकावटकघृतपाचितपक्वान्नादिपूरितं सवस्त्रं सशूर्पं वायनं तेभ्यो दत्वा गां च दद्यात्॥ ॥इति अरुंध
तीव्रतं समाप्तं॥ ॥प्रातः शुक्लतिले स्नात्वा आत्मनः सौभाग्यादिपुत्रपौत्रसंपत्तिप्राप्तिकामनया चरि
तस्वर्णगौरीव्रतोद्यापनं करिष्ये॥ व्रताचार्यः उक्तप्रकारेण लिंगतोभद्रे षोडशपलताम्रमयतिलपूरितपू
र्णपात्रयुते मृन्मये कलशे हैमे हरगौरीप्रतिमे त्र्यंबकं गौरीर्मिमायेति मंत्राभ्यां संपूज्य पुराणपठनादि
ना रात्रिं निनीय प्रातः अग्निं प्रतिष्ठाप्य अन्वादध्यात्॥ उमामहेश्वरौ तिलयवाज्याहुतिभिः प्रतिद्रव्यं अष्टो
त्तरशतसंख्याकाहुतिभिः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ ततः आचार्याय गां दद्यात्॥ षो ३५

डश दंपतीः संपूज्य वंशपात्रस्थषोडशविधषोडशसंख्याकपक्वान्नयुतं वायनं ताभ्यो दत्वा दक्षिणादि
भिः प्रतोष्य आशिषो गृह्णीयात्॥ ॥इति स्वर्णगौरीव्रतं समाप्तं॥ ॥अथ भविष्यस्कंदयोः मुहूर्त
मात्रेपि रविविद्धायां भाद्रपदशुक्लतृतीयायां हरितालिकाव्रतं॥ तिथ्याद्युल्लिख्य मम समस्तपापक्ष
यपूर्वकसप्तजन्मसौभाग्यादिविविधभोगप्राप्तिद्वारा उमामहेश्वरप्रीत्यर्थं हरितालिकाव्रतोद्यापना
ख्यं कर्म करिष्ये॥ ततः व्रताचार्यः उक्तविधिना लिंगतोभद्रे द्रोणपरिमितव्रीहिस्थकलशे राजतं शिवं
हैमीं गौरीं पुरतः राजतं वृषभं उक्तमंत्रैः प्रतिष्ठाप्य संपूजयेत्॥ तत्र मंत्रः॥ मंदारमालांकुलितालकायै
कपालमालांकितशेखराय॥ दिव्यांबरायै च दिगंबराय नमः शिवायै च नमः शिवाय॥ ततन्मंत्रैर्यत
तः प्रार्थयेत्॥ नमः शिवाय सांबाय पंचवक्त्राय शूलिने॥ नंदिभृंगिमहाकालगणयुक्ताय शंभवे॥

२७ श्रियायै हरकान्तायै प्रकृत्यै स्रष्टिहेतवे ॥ नमस्ते ब्रह्मरूपिण्यै जगद्धात्र्यै नमो नमः ॥ येन कामेन देवि
त्वं पूजितासि महेश्वरी ॥ तं पूर्णं कुरु मे कामं सौभाग्यं च प्रयच्छ मे ॥ ततः सुवासिनीः संपूज्य रात्रिं
निनयेत् ॥ ततः अग्निं प्रतिष्ठाप्य ॥ अन्वादध्यात् ॥ प्रधानं उमामहेश्वरं च प्रतिद्रव्यं अष्टोत्तरशत
संख्याकाभिः तिलयवाज्याहुतिभिर्यक्ष्ये ॥ ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये ॥ ततः सं
पूजिताचार्याय गां दत्वा षोडश द्वादश वा युग्मानि संपूज्य सौभाग्यद्रव्य वस्त्र दक्षिणा युतानि सम्पूर्णा
नि षोडश वायनानि दद्यात् ॥ तत्र मंत्रः ॥ सौभाग्यारोग्य कामानां सर्वसंपत्समृद्धये ॥ गौरी गिरिशतु
ष्ट्यर्थं वायनं ते ददाम्यहं ॥ ॥ इति हरितालिका व्रत समाप्तं ॥ ॥ अथ भविष्ये ॥ हस्तऋक्षगते सूर्ये
त्रयोदश वर्षात्मकं हस्तगौरी प्रीत्यर्थं तु आचरित हस्तगौरी व्रत पूर्णता सिद्ध्यै तदुद्यापनाख्यं कर्म क २७

रिष्ये ॥ व्रताचार्यः लिंगतोभद्र उक्त प्रकारेण कलशोपरि च गौरीहरं गणेशं च सौवर्णं सुवर्ण पु
ष्पादिना तत्तन्मंत्रैः संपूज्य सुवासिनीः संपूजयेत् ॥ अग्निं प्रतिष्ठाप्य ॥ अन्वादध्यात् ॥ गौरीहरं गणे
शं च अष्टोत्तरशत तिलाज्याहुतिभिः ब्रह्मादि देवताः एकैकयाज्याहुत्या यक्ष्ये ॥ वायनं त्रयोदश विध
त्रयोदश संख्याक पक्वान्नपूरितं सौवर्णपात्रं वैणवं वा कृत्वा त्रयोदश दंपतीः सुवासिनीर्वा संपूज्य ता
भ्यो दद्यात् ॥ तत्र मंत्रः ॥ पक्वान्नपूरितं विप्र व्रत संपूर्ति हेतवे ॥ वायनं ते प्रयच्छामि गौरी गिरिशतुष्टये ॥
गां च दद्यात् ॥ इति हस्तगौरी व्रत संपूर्णं ॥ ॥ अथ कोटीश्वरी व्रतं ॥ भाद्रपद शुद्ध तृतीयायां भविष्ये ॥
तत्तु वर्षचतुष्टयं कार्यं ॥ तत्र विधिः ॥ आत्मनः दुर्भगत्व नाशन सुभगत्व प्राप्तिकामनया गौरी प्रीत्यर्थं
कोटीश्वरी व्रतं करिष्ये ॥ आखंडानां तंदुलानां तिलानां वा लक्षं एकं पयसि पक्त्वा तदन्नेन देवीं निर्माय उ

२८ क्तप्रकारेपीठेसंपूज्यरक्तवस्त्रंदत्वाविशेषपूजांकुर्यात्॥तत्रमंत्रः॥नमोनमस्तेदेवेशलक्षेश्वरिनमो
स्तुते॥कोटीश्वरिनमस्तुभ्यंनमस्तेहरिवल्लभे॥ततःअर्घ्यं॥नमोलक्षेश्वरेदेविकोटीश्वरिनमोस्तुते॥
गृहाणार्घ्यंमयादत्तंदुर्गेदेविनमोस्तुते॥ततःसुवासिनीःसंपूजयेत्॥व्रतांतेगांचदद्यात्॥
इतिकोटिश्वरीव्रतोद्यापनंसमाप्तं॥ ॥अथभविष्ये॥चंद्रोदयव्यापिन्यांभाद्रपदकृष्णतृतीयायां
बृहद्गौरीव्रतं॥तच्चवर्षपंचकंकार्यं॥तिथ्यादिसंकीर्त्य॥भर्त्रायुर्वृद्धिपुत्रपौत्रसौभाग्यादिप्राप्तिकाम
नयाचरितबृहद्गौरीव्रतोद्यापनाख्यंकर्मकरिष्ये॥व्रतांचार्यःउक्तप्रकारेणआलवालेसांगबृहती
वृक्षंसंस्थाप्यसंपूज्यतत्पुरतःपीठेदेवीउमांगौरीर्निमायेतिसंपूज्यतत्पुरतःचतुरस्रबीजयुतंसौ
वर्णबृहतीफलंसंपूज्य॥अर्घ्यंदद्यात्॥क्षेमसंपत्करेदेविसर्वसौभाग्यदायिनी॥सर्वकामप्रदेदेवि ३८

गृहाणार्घ्यं॥चंद्रोदयोत्तरंअर्घ्यं॥गगनांगणसंदीपलक्ष्मीबंधोनिशाकर॥गृहाणार्घ्यंमयादत्तंरोहि
ण्यासहितःशशिन्॥ततःअग्निंप्रतिष्ठाप्य॥अन्वादध्यात्॥गौरींअष्टोत्तरशतसंख्याकघृताक्ततिला
हुतिभिःब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये॥ततःपंचविप्रान्सुवासिनीःसंपूज्यकंचुकीताटं
ककंठसूत्रसौभाग्यद्रव्यसिंदूरजीरकगोधूमपिष्टजातबृहतीफलपंचकयुतानिसूत्रवेष्टितवंश
पात्रयुग्मयुतानिसवस्त्रदक्षिणानिपंचवायनानिदत्वागांचदत्वासदन्नेनब्राह्मणान्संतर्प्य॥तत्
सुवर्णनिर्मितबृहतीफलंकंठेधृत्वाइष्टजनैःसहभुंजीत॥ ॥इतिबृहद्गौरीव्रतंसमाप्तं॥ ॥
अथभविष्ये॥मार्गशीर्षमासेकृष्णतृतीयायांसौभाग्यसुंदरीव्रतं॥तच्चतुर्थ्युतायांकार्यं॥
तिथ्यादिसंकीर्त्यआत्मनःसर्वदुःखव्याधिदारिद्र्यादिनाशनपूर्वकसुखसौभाग्यपुत्रपौत्रासु

रूपतादिप्राप्तिद्वारागौरीप्रीत्यर्थंसौभाग्यसुंदरीव्रतंकरिष्ये॥इतिसंकल्प्य॥ततः उमामहेश्वरंसौवर्णरा
२९ जतंवाकृत्वाएकलिंगोद्भवेमंडलेवक्ष्यमाणद्रव्यैः द्वादशमासेषुप्रतितृतीयायांसंपूजयेत्॥मार्गशीर्षकृ
ष्णतृतीयायांप्रातःअपामार्गदंतकाष्ठंसौभाग्यसुंदरीदेवतानामद्रोणपुष्पं॥दाडिमीफलेनार्घ्यं॥मोदक
नैवेद्यं॥यक्षकर्दमलेपः॥अगरुधूपः॥घृतदीपः॥सर्वासुतृतीयासुएवंपूजांकृत्वास्वयंकर्पूरंप्राशयेत्॥ए
वंसर्वत्र॥पौषे॥बेलिकादंतकाष्ठं॥राज्यसौभाग्यदादेवता॥मरुवकपुष्पं॥धात्रीफलेनार्घ्यं॥घृतशर्करा
न्वितवटकान्नैवेद्यं॥स्वयंकंकोलंप्राशयेत्॥माघेबदरीदंतकाष्ठं॥रूपसौभाग्यासुंदरीनाम॥चूतपुष्पं॥ना
रीकेरेणार्घ्यं॥शष्कुलीनैवेद्यं॥कस्तूरीभक्षणं॥फाल्गुने॥बिल्वदंतकाष्ठं॥सौभाग्यसुंदरीनाम॥कांचना
रपुष्पं॥घृतशर्करान्वितसक्तुनैवेद्यं॥बीजपूरेणार्घ्यं॥चंदनोदकप्राशनं॥चैत्रे॥जंबूदंतकाष्ठं॥सुरव २९

सौभाग्यसुंदरीनाम॥दमनकपुष्पं॥शर्कराघृतयुतमंडकंनैवेद्यं॥बिल्वफलेनार्घ्यं॥अर्जुनपत्रभ
क्षणं॥वैशाखे॥मालतीदंतकाष्ठं॥पतिसौभाग्यदानाम॥सितारक्तैकपद्ममल्लिकापुष्पं॥शर्कराघृ
तकर्पूरयुतदधिभक्तनैवेद्यं॥कदलीफलेनार्घ्यं॥सुवर्णोदकप्राशनं॥ज्येष्ठे॥यूथिकादंतकाष्ठं॥ला
वण्यसुभगानाम॥कदलीफलार्घ्यं॥घृतपूरिकानैवेद्यं॥मौक्तिकांबुप्राशनं॥आषाढे॥अशोकका
ष्ठं॥पतिसौभाग्यसुंदरीनाम॥बिल्वपत्रं॥जंबूफलार्घ्यं॥पायसंनैवेद्यं॥विद्रुमांबुप्राशनं॥श्रावणे॥
बिल्वकाष्ठं॥सर्वेश्वरीनाम॥जातीपुष्पं॥शुष्ककसारंनैवेद्यं॥कदलीफलार्घ्यं॥रजतांबुप्राशनं॥भा
द्रपदे॥मातुलिंगकाष्ठं॥सौभाग्यसुंदरीनाम॥उत्पलंपुष्पं॥कर्कोटकीफलेनार्घ्यं॥शाकवर्तीन्यंनैवे
द्यं॥माणिक्यांबुप्राशनं॥आश्विने॥प्लक्षकाष्ठं॥पुत्रसौभाग्यसुंदरी॥शतपत्रपुष्पं॥नारिंगकूष्मां

४० शार्घ्यं॥ घृतशर्करान्वितगणकनैवेद्यं॥ औदुंबरांबुप्राशनं॥ कार्तिके॥ औदुंबरकाष्ठं॥ संयोग
सुंदरीनाम॥ केतकीपुष्पं॥ सुगंधशालीनैवेद्यं॥ अक्रोडेनार्घ्यं॥ लवंगप्राशनं॥ एवं चीर्णे व्रते मार्गशी
र्षकृष्णतृतीयायामुद्यापनं॥ पूर्वोक्तसंकल्पं कृत्वाचार्यं वृत्वा मंडले उमामहेश्वरमूर्तिं पूर्वं पूजितां
रक्तवस्त्राद्युपचारैः संपूज्य प्रागुक्तपुष्पादिकं समर्प्य॥ जागरादिना रात्रिं निनयेत्॥ ततः अग्निं प्र
तिष्ठाप्यान्वादध्यात्॥ अत्र प्रधानं॥ उमामहेश्वरौ मधुत्रययुतैः कुसुंभकुसुमैः किंशुकैर्वा शतपत्रै
र्वा अष्टोत्तरशतसंख्याकाहुतिभिः प्रतिदैवतं तत्तन्मंत्राभ्यां ब्रह्मादिदेवताश्च एकैकयाज्याहु
त्या यक्ष्ये॥ ततः अष्टोत्तरचत्वारिंशा मिथुनानि वस्त्रादिभिः संपूज्य तेभ्यः कुंकुमलवणगुडनारि
केरनागवल्लीदूर्वाकज्जलसिंदूराष्टकं शूर्पस्थं दत्वा॥ आचार्याय मंडलं गां च दत्वा प्रार्थयेत्॥ पू ४०

जितासि मया देवि सर्वसौभाग्यसुंदरि॥ दत्वा मत्प्रार्थितान्कामानागच्छ देवि यथासुखं॥ ततः ब्राह्मणान्
सदन्नेन संतर्प्याशिषो गृहीत्वा स्वयं भुंजीत॥ इति सौभाग्यसुंदरीव्रतं समाप्तं॥ ॥अथ परशुरामजयं
ती॥ ॥वैशाखशुक्लतृतीयायां निशाद्ययामव्यापिन्यां॥ भविष्ये॥ तिथ्यादि संकीर्त्य॥ अखिल
पापक्षयपूर्वकचतुर्विधपुरुषार्थसिद्धिद्वारा चरितपरशुरामजयंतीव्रतोद्यापनं करिष्ये॥ इति संकल्प्य॥
व्रताचार्यः सर्वतोभद्रस्थकलशे हैमं परशुरामं विष्णोर्नुकमिति मंत्रेण संपूज्य रात्रौ जागरणं कृत्वा प्रातः
अग्निं प्रतिष्ठाप्य अन्वादध्यात्॥ परशुरामं घृताक्तपायसद्रव्येण अष्टोत्तरशतसंख्याकाहुतिभिः॥ ब्रह्मा
दिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ ततः पीठं गां दत्वा ब्राह्मणान्भोजयेदिति॥ परशुरामजयंतीव्रतं स
माप्तं॥ ॥इति तृतीयाव्रतानि समाप्तानि॥ ॥अथ चतुर्थीव्रतानि॥ ॥संकष्टचतुर्थीव्रतं चंद्रोदयव्या

थिन्यां कार्यं॥ दिनद्वये तव्यापिनो अव्यापिनो वा पूर्वा॥ मासपक्षाद्युल्लिख्य॥ विद्याधनतत्पुत्रारोग्य
मुक्तिसंकष्टनाशकामेन स्त्री तु भर्त्रादिकामनया आचरितसंकष्टचतुर्थीव्रतोद्यापनं करिष्ये॥ व्रता
चार्यः उक्तप्रकारेण सर्वतोभद्रस्थकलशे हैमं गणेशं प्रतिष्ठाप्य पूजयेत्॥ ध्यानं॥ लंबोदरं चतुर्बाहुं
त्रिनेत्रं रक्तवर्णकं॥ नानारत्नैः सुवेषाढ्यं प्रसन्नास्यं विचिंतयेत्॥ आवाहनं गणेशाय आसनं विघ्नना
शिने॥ पाद्यं॥ लंबोदरायेति अर्घ्यं चंद्रार्धधारिणे॥ विश्वप्रियायाचमनं स्नानं वै ब्रह्मचारिणे॥ शूर्पक
र्णाय वस्त्रं च उपवीतं कुब्जाय च॥ चंदनं रुद्रपुत्राय पुष्पं च गुणशायिने॥ विकटायेति धूपं च दीपं रुद्रप्रि
याय च॥ नैवेद्यं विघ्ननाशाय तांबूलं सिद्धिदाय च॥ फलं संकष्टनाशाय एकदंताय दक्षिणा॥ नीराज
नं वामनाय प्रदक्षिणा हरसूनवे॥ पुष्पांजलिं कुमाराय नमो विद्याधराय च॥ ततः शूर्पे पायसं संपूर्णं रक्तव

स्त्रेण वेष्टितं॥ गणेशाय निवेदयेत्॥ ततः चंद्रार्घ्यं॥ तदानीं पंचम्यां वा होमं कुर्यात्॥ प्रधानं॥ गणप
तिं गणानां त्वेति मंत्रेण तद्गायत्र्या दूर्वा रक्ताक्षताज्यमोदकपायसद्रव्यैः प्रतिद्रव्यं अष्टोत्तरसहस्र
मष्टोत्तरं शतं मष्टाविंशतिर्वा तत्संख्याकाहुतिभिर्यक्ष्ये॥ ब्रह्मादिदेवताश्च केवलमोदकैर्वा॥ एवं हो
मं समाप्य एकविंशति ब्राह्मणानेकविंशतिनामभिः वस्त्रादीनां संपूज्य एकविंशतिपक्वान्नैः संत
र्पयेत्॥ गणंजयः॥ गणपतिः॥ हेरंबः॥ धरणीधरः॥ महागणपतिः॥ यक्षेश्वरः क्षिप्रप्रसा
दनः॥ अमोघसिद्धिः॥ अमृतः॥ चिंतामणिः॥ निधिः॥ सुमंगलः॥ बीजं॥ आशापूरकः॥
वरदः॥ शिवः॥ काश्यपः॥ नंदनः॥ वाचासिद्धिः॥ ढोंढी विनायकः॥ ततः आचार्यः शूर्पस्थैक
विंशतिमोदकवायनं रक्तवर्णवेष्टितं दद्यात्॥ मंत्रः॥ विप्रवर्य नमस्तुभ्यं मोदकान्वै ददाम्यहं॥

४२ आपदुद्धरणार्थाय गृह्णाण द्विजसत्तम॥ गणेशं प्रार्थयेत्॥ अबुद्धिमतिरिक्तं वा द्रव्यहीनं मयाकृ
तं॥ तत्सर्वं पूर्णतां यातु विघ्नराजनमोस्तु ते॥ ततः गां सोपस्करं पीठं च आचार्याय दत्वा आशिषो
गृहीत्वा इष्टजनैः सह स्वयं भुंजीत॥ ॥इति संकष्टचतुर्थीव्रतोद्यापनं समाप्तं॥ श्रीगणेशा॥ का
र्त्तिकना शुक्लचतुर्थ्यां दूर्वागणपतिव्रतं॥ भविष्ये॥ तिथ्यादि उल्लिख्य अमुक सौभाग्यपुत्रपौत्रधनै
श्वर्याद्यभिवृद्धिद्वारा श्रीगणपतिव्रतोद्यापनं च करिष्ये॥ तच्च वर्षपंचकं वर्षत्रयं वा कार्यं॥ तत्र वि
धिः॥ सर्वतोभद्रस्थ रक्तवेष्टितताम्रकलशे हैमपीठे हैमीं दूर्वां निधाय तत्र हैमं गणेशं पूजयेत्॥
विशेषः पूजायां॥ बिल्वपत्रं अपामार्गं॥ शमी॥ दूर्वाः॥ तुलसीपत्रैः॥ मोदकनैवेद्यं॥ प्रार्थनामं
त्रः॥ गणेश्वर गणाध्यक्ष गौरीपुत्र गजानन॥ व्रतं संपूर्णतां यातु त्वत्प्रसादादिभानन॥ प्रतिमादा ४२

नमंत्रः॥ गृहाण भगवन् ब्रह्मन् गणराज सदक्षिणं॥ व्रतं त्वद्वचनादद्य संपूर्णं यातु सुव्रत॥ एवं पंच वा वर्षाणि
कृत्वोद्यापनमारभेत्॥ पूर्ववत्पूजयित्वा॥ दूर्वायुक्तैर्दशभिर्मंत्रैर्गणेशं पूजयेत्॥ पंचगव्यस्नपनं॥ दशमंत्राः॥
गणाधिपाय०। उमापुत्राय०। अघनाशिने०। विनायकाय०। ईशपुत्राय०। सर्वसिद्धिप्रदायकाय०। एकदंत०। इभ
वक्त्राय०। मूषकवाहनाय०। कुमारगुरवेन०। ततः व्रतपूर्त्यै आचार्याय गां दत्वा भुंजीत॥ ॥इति दूर्वागण
पतिव्रतं समाप्तं॥ ॥भाद्रपदशुक्लचतुर्थ्यां मध्याह्नव्यापिन्यां सिद्धिविनायकव्रतं॥ माघे मार्गशीर्षे श्रावणे
वा प्रतिमासं शुक्लचतुर्थ्यां वा प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने संकल्पं कृत्वा पूजयेत्॥ देशकालौ संकीर्त्य मम
विजयपुत्रादिकामसिद्धिद्वारा श्रीसिद्धिविनायकप्रीत्यर्थं सिद्धिविनायकव्रतं करिष्ये॥ धान्यराशिस्थ रक्तवेष्टि
तारक्तकलशे हैमं गणेशं पूजयेत्॥ मूलमंत्रेण॥ एकदंतं शूर्पकर्णं गजवक्त्रं चतुर्भुजं॥ पाशांकुशधरं देवं ध्या

४२ येसिद्धिविनायकं॥ध्यानं॥पुष्पोत्तरमंगपूजा॥गणेशायनमः॥पादौपूजयामि॥विघ्नराजाय॰जा
नुनीपू॰आखुवाहनाय॰ऊरू॰हेरंबाय॰कटिं॰कामारिसूनवे॰नाभिं॰लंबोदराय॰उदरंपू॰गौ
रीसुताय॰स्तनौपू॰गणनाथाय॰हृदयंपू॰स्थूलकंठाय॰कंठं॰स्कंदप्रियाय॰स्कंधौ॰पाशहस्ता
य॰हस्तौ॰गजवक्त्राय॰मुखं॰विघ्नहर्त्रे॰नेत्रे॰सर्वेश्वराय॰शिरः पू॰गणाधिपाय॰सर्वांगंपू॰
पत्रिकापूजा॥सुमुखाय॰मरीचिपत्रं॰गणाधिपाय॰भृंगराजपत्रं॰उमापुत्राय॰बिल्वं॰गजा
ननाय॰दूर्वा॰लंबोदराय॰बदरी॰हरसूनवे॰धत्तूर॰वक्रतुंडाय॰शमी॰गुहाग्रजाय॰अपामा
र्ग॰एकदंताय॰बृहती॰विकटाय॰करवीरप॰विनायाय॰अश्मातकप॰कपिलाय॰अर्कपत्रं॰
गजदंताय॰अर्जुनप॰विघ्नराजाय॰विष्णुक्राप॰बटवे॰दाडिमी॰सुराग्र॰देवदारुपत्रं॰भालचं ४२

द्राय॰मरुगपत्रं॰हेरंबाय॰सिंदूर॰चतुर्भुजाय॰जाति॰सर्वेश्वराय॰अगस्तिप॰ततः दूर्वायुग्मं
गंधपुष्पाक्षतयुतंगृहीत्वापूजयेत्॥गणाधिपाय॰उमापु॰अघनाशिने॰विनायका॰ईशपुत्राय॰
सर्वप्रदाय॰एकदंताय॰इभवक्त्राय॰मूषकवा॰कुमारगुरवे॰विघ्नसर्वहर्त्रे॰ततोदेवंसंप्रार्थयेत्॥
यन्मयाचरितंदेवव्रतमेतत्सुदुर्लभं॥त्वत्प्रसादीकृणेशात्वंसफलंकुरुमर्नदा॥घृतपाचितेकविंशाति
मोदकान्गृहीत्वादशविप्रायदात्मनेएकंदेवाय॥वायनमंत्रः॥बाणकंफलसंयुक्तंमोदकैर्दशभिर्यु
तं॥गणेशप्राणिनार्थायतुभ्यंविप्रददाम्यहं॥ततः ब्राह्मणायसदक्षिणांविनायकप्रतिमांदद्यात्॥मं
त्रः॥विनायकगणेशानसर्वदेवनमस्कृत॥पार्वतीप्रियविघ्नेशममविघ्नंविनाशय॥एवंविंशतिव
र्षकृत्वातेपूर्ववद्देवंसंपूज्यहुत्वाचार्यःअग्निंप्रतिष्ठाप्य॥अन्वादध्यात्॥गणेशंदूर्वापायसलड्डुकैः

४४ प्रतिद्रव्यंअष्टोत्तरशतसंख्याकाहुतिभिः यक्ष्ये॥ ततः अधिकफलप्राप्तयेएकविंशतिनामभिः ए
कविंशतिब्राह्मणान्दक्षिणायुतः संरसंपूज्य॥ एकविंशतिविधपक्वान्नैः प्रत्येकंसंपूज्यअन्यामपि
यथाविभवंसंपूज्यभूयसींदत्वाव्रतपूर्तयेगांदद्यादिति॥ ॥इतिसिद्धविनायकव्रतंसमाप्तं॥ ॥
अथभविष्ये॥ कार्तिककृष्णचतुर्थ्यांकरकचतुर्थव्रतं॥ ॥स्त्रीणामेव॥ तिथ्याद्युल्लिख्यआत्म
नः सौभाग्यसुखपुत्रपौत्रादिसुस्थिरप्राप्तयेकरकचतुर्थव्रतंकरिष्ये॥ पटादौवटंविलिख्य॥ तद
धस्ताच्छिवस्कंदासुरंतांगौरींचंदनादिनालिखित्वापूजयेत्॥ मंत्रः॥ नमः शिवायैशर्वाण्यैसौभाग्यंसं
ततिंशुभं॥ प्रयच्छभक्तियुक्तानांनारीणांहरवल्लभेति॥ नमोंतनाममंत्रेणशिवस्कंदगौरीणांपूजा
कार्या॥ पिष्टकनैवेद्यं॥ ततः पक्वान्नपूरितदशकरकान्ब्राह्मणेभ्योदद्यात्॥ चंद्रोदयोत्तरंचंद्रार्घ्यंदत्वा ४४

व्रतपूर्तयेगांदत्वास्वयंभुंजीतेति॥ ॥इतिकरकचतुर्थीव्रतंसमाप्तं॥ ॥अथपंचमीव्रतानि॥ भा
द्रपदशुक्लपंचम्यामृषिपंचमीव्रतं॥ मध्याह्नव्यापिन्यादिनद्वयेयेतच्चाप्तव्याप्तौवापूर्वविद्धायांका
र्यं॥ नद्यादौप्रातः दंतधावनपूर्वकंस्नात्वा॥ ममज्ञानतोज्ञानतोवारजस्वलावस्थायांकृतसंपर्कजनित
दुर्योनित्वदोषपरिहारद्वाराशुभफलप्राप्त्यर्थंआचरितऋषिपंचमीव्रतोद्यापनंकरिष्ये॥ व्रताचार्यः
सर्वतोभद्रस्थकलशेषुएकस्मिन्वांदेमीः अरुंधतीसहिताः सप्तऋषिप्रतिमाः पूजयेत्॥ प्रत्येकं
सप्तर्षीणांवेदोक्तमंत्राः॥ ऋषेमंत्र०॥ कश्यप॥ अत्रिर्यद्वा०॥ अत्रिं॥ एवानस्प०॥ भरद्वाजं॥ प्रसूतो०
विश्वामित्रं॥ अभित्वागो०॥ गौतमं॥ गृणाना०॥ जमदग्निं॥ उतासिमैत्रा०॥ वसिष्ठं॥ कश्यपोत्रिर्भ
रद्वाजोविश्वामित्रोथगौतमः॥ जमदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती॥ देवाएतस्येनिसहस्तो

या

 माइतिनाममंत्रैर्वापूजयेत्॥ततःवायनंदत्वाक्षमापयेत्॥न्यूनातिरिक्तकर्माणि-मयानिकृ
तानिच॥क्षमध्वंतानिसर्वाणियूयंसर्वेतपोधनाः॥ततःकथाश्रवणादिनारात्रिंनिनयेत्॥प्रातः
अग्निंप्रतिष्ठाप्यान्वादध्यात्॥प्रधानंअरुंधतीसहितकश्यपादिसप्तऋषीन्पूजामंत्रेणतिलव्रीहि
यवसर्पिर्द्रव्यैःप्रतिद्रव्यमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिर्वातत्संख्याकाहुतिभिःब्रह्मादि
देवताश्चएकैकयाज्याहुत्यायक्ष्ये॥शेषेणस्विष्टकृत॥ततःपुनःप्रतिमापूजांकृत्वा॥सपत्नीकान्स
प्तब्राह्मणान्वस्त्रादिनासंपूज्यतेभ्यःक्रमेणदक्षिणाप्रतिमायुतकलशांदद्यात्॥तत्रमंत्रः॥प्रति
गृह्णाद्विजश्रेष्ठप्रतिमादिसमन्वितं॥कलशंऋषिसंप्रीत्यैव्रतसंपूर्णहेतवे॥यद्येककुंभसर्वप्रतिमा
पूजनंतदासर्वप्रतिमायुक्तंकलशंआचार्याय॥अन्येभ्यःदक्षिणावस्त्रयुतान्पक्वान्नपूरितान्क

लशांदद्यात्॥ततःसप्तभ्यःसप्तगाःआचार्यायएकांगांदत्वाप्रार्थयेत्॥सप्तर्षयःशुभाश्रेष्ठाःस
र्वैषांचशुभप्रदाः॥सर्वपापंचमेघ्नंतुज्ञानतोज्ञानतःकृतं॥एतेसप्तर्षयःसर्वेभक्त्यासंपूज्यताम
या॥यथोक्तफलदाःसंतुव्रतस्यफलदायकाइति॥तःआशिषोगृहीत्वाब्राह्मणान्संतर्प्यस्वयंभुंजी
त॥ ॥इतिऋषिपंचमीव्रतंसमाप्तं॥ ॥अथदशरथललिताव्रतोद्यापनं॥ ॥स्कांदे॥आश्विनकृष्ण
चतुर्थ्यांतिथ्यादिसंकीर्त्यममपुत्रादिप्राप्तिपूर्वकसौभाग्याद्यभिवृद्धिद्वाराश्रीरोहिणीसहितचं
द्ररूपीपरमेश्वरप्रीत्यर्थंदशवर्षावधिआचरितस्यदशरथललिताव्रतोद्यापनंकरिष्ये॥इतिसंक
ल्प्य॥व्रताचार्यःरात्रौपुष्पमंडपिकामध्येसर्वतोभद्रेपूर्ववत्कलशंसंस्थाप्य॥तदुपरिवंशपात्रेचतुरं
गुलसौवर्णीरोहिणीप्रतिमांअष्टांगुलराजतचंद्रप्रतिमांचपूर्ववत्पूजयेत्॥पुष्पपूजांनेगपूजा॥

४५ उपांगललितायै०पादौ०उमायै०जानुनी०सत्यै०नाभिं०कुमारिकायै०स्तनौ०उर्वश्यै०
भुजौ०सुभगप्रियायै०मुखं०दशरथललितायै०मूर्धानं०प्रार्थयेच्च॥दशरथायत्वयादत्तारामाद्या
श्चसुताश्चते॥सौभाग्यललितेदेविदेहितदन्ममापिहि॥ततःप्रातःपुनःसंपूज्याग्निंप्रतिष्ठाप्यान्वा
दध्यात्॥प्रधानंचंद्रसहितरोहिणींगौरीर्मिमायेतिमंत्रेणअष्टोत्तरशतदूर्वाहुतिभिः॥नमोदेव्यै
तिमंत्रेणअष्टोत्तरशतघृताक्तपंचखाद्याहुतिभिश्चयक्ष्ये॥ब्रह्मादिमंडलदेवताश्च॥ततःसपत्नी
कांदशब्राह्मणान्वस्त्रालंकारादिभिःसंपूज्यसुगंधोदकपूरितदशकरकांदद्यात्॥ततःआचार्यंव
स्त्रादिभिःसंपूज्यसदक्षिणंवायनंचदद्यात्॥मंत्रः॥इदंतुदशलड्डुकदक्षिणाफलसंयुतं॥ललिताप्रीण
नाथायब्राह्मणायददाम्यहं॥विसर्जनमंत्रः॥सवाहनाशक्तियुतावरदापूजितामया॥मातर्मामनु ४५

गत्वाद्यगम्यतांनिजमंदिरं॥इतिविसृज्य॥सदक्षिणंसोपस्करंपीठंचगांदत्वाब्राह्मणान्मोदकपा
यसाभिःसंतर्प्याशिषोगृहीत्वास्वयंभुंजीत॥एवंयःकुरुतेभक्त्याधनंपुत्रानवाप्नुयात्॥ ॥इ
तिदशरथललिताव्रतोद्यापनंसमाप्तं॥अथभविष्येनागपंचमीव्रतं॥श्रावणशुक्लपंचम्यांमध्या
न्हव्यापिन्यांकार्यं॥नद्यादौस्नात्वातिथ्याद्युल्लिख्यममसंतानवृद्धिपूर्वकसुखाद्यभिवृद्धिद्वाराश्रीना
गरूपीपरमेश्वरप्रीत्यर्थंनागपंचमीव्रतंकरिष्ये॥पटेचंदनादिनानागान्विलिख्य॥मृन्मयान्वाकृ
त्वादधिदूर्वाक्षतकुशादिभिःसंपूज्येदनेनमंत्रेण॥अनंतंवासुकिंशेषंपद्मनाभंमहाबलं॥कालि
यंतक्षकंचैवककर्कोटकंधनंजयं॥एवंसंपूज्यविप्रेभ्योभोजनंदत्वास्वयंतैलपक्वविवर्जितंभोजनंकु
त्वारात्रौध्यानरताःस्वपेत्॥ ॥इतिनागपंचमीव्रतंसमाप्तं॥ ॥भाद्रपदशुक्लपंचम्यांनागपंच

४७ मीव्रतं॥प्रभा[illegible]सरखंडे॥चतुर्थ्यामेकभक्तंकृत्वापंचम्यांप्रातःस्नात्वादेशकालौसंकीर्त्य॥
ममसंततसमि[illegible]वृद्धिपूर्वकसौख्याभिवृद्धिद्वारानागरूपीपरमेश्वरप्रीत्यर्थंद्वादशवर्षात्म
कंनागपंचमीव्रतंकरिष्ये॥ततःसौवर्णंराजतंदारुमयंमृन्मयंवापंचफणंनागंकृत्वाकरवीरशतपत्र
जातीपुष्पपद्मगंधादिभिःसंपूज्यब्राह्मणान्घृतपायसमोदकैःसंतर्प्यस्वयंनक्तंकुर्यात्॥एवंप्रतिमा
संमासनामानि॥अनंतंवासुकिंशेषंपद्मकंबलमेवच॥तथाकर्कोटकंनागंनागमश्वतरंतथा॥धृतरा
ष्ट्रंशंखपालंकालियंतक्षकंतथा॥पिंगलंचमहाभागंमासिमासिप्रकीर्तिताः॥एवंद्वादशवर्षंसंपाद्यां
तेभारपरिमितसुवर्णनागंसंपूज्यव्यासरूपिणेब्राह्मणायपूजापूर्वकंदद्यात्अंतेपायसादिनाब्राह्म
णांसंतर्प्य॥स्वयंभुंजीत॥ ॥इतिनागपंचमीव्रतंसमाप्तं॥ ॥अथैवनागदष्टव्रतंहेमाद्रौभविष्ये॥ ॥ ४७

चतुर्थ्यामेकभक्तंचकृत्वाप्रातःपंचम्यांस्नापयित्वातिथ्याद्युल्लिख्य॥अस्मत्संबंधिनागदष्टमृत
प्राप्तसर्पयोनिमुक्तिपूर्वकतत्स्वर्गनिकामनयाएकवर्षात्मकंनागदष्टपंचमीव्रतंकरिष्ये॥ततःसौ
वर्णंराजतंमृन्मयंवापंचफणंनागंनिर्मायक्षीरादिस्नपनपूर्वकंषोडशोपचारैःसंपूज्यघृतपायसमो
दकैःब्राह्मणान्संतर्प्यस्वयंकुर्यात्पंचम्यांनक्तं॥एवंप्रतिमासंपंचम्यांकार्यं॥मासनामानिपूर्वोक्तानि
अनंतादीनिग्राह्याणि॥संवत्सरांतेरत्नचित्रितंकांचनंनागंसर्वतोभद्रस्थकलशेसंस्थाप्यपूर्ववत्पूज
यित्वा॥रात्रौजागरणंकृत्वाषष्ठ्यांप्रातःसंपूज्यकथावाचकायसोपस्करंपीठंचगांदद्यात्॥मंत्रः॥
दानकालेपठेदेतत्स्मरन्नारायणंप्रभुं॥सर्वगंसर्वधातारमनंतमपराजितं॥एकेचिन्मेकुलेसर्पैर्दष्टाःप्रा
प्तास्त्वधोगतिं॥व्रतदानेनगोविंदमुक्तिभाजोभवंतुते॥इत्युक्त्वासितचंदनाक्षतयुतमुदकंउदकेनिक्षिपे

४८ त॥ ततः ब्राह्मणानां यतीनां च नागानुद्दिश्य महाभोज्यं कृत्वा शेषो गृहीत्वा स्वयं भुंजीत॥ सर्पयोनेर्मु
क्तो भवति॥ ॥इति नागदष्टव्रतं समाप्तं॥ आश्विनशुक्लपंचम्यां मध्याह्नव्यापिन्यामुपांगललिताव्र
तं॥ ॥प्रातः दंतधावनपूर्वकं नद्यादौ स्नात्वा शुक्लवासः परिधाय मंडपिकादिकं कृत्वा तिथ्यादिसंकी
र्त्य मम पुत्रपौत्रविद्यारोग्यसुखगोविजयपुष्ट्यादिकामेन स्त्री वैधव्यकामनया उपांगललिताप्रीत्य
र्थं अष्टवर्षात्मकाचरितोपांगललिताव्रतोद्यापनं करिष्ये॥ संकल्प्य॥ व्रताचार्यः एकलिंगोद्भवे कल
शोपचारि सौवर्णी ललिताप्रतिमां पूजयेत्॥ पौराणमंत्रैः श्रीसूक्तेन च॥ ध्यानं॥ नीलकौशेयवसनां दे
वीं भाकमलासनां॥ भक्तानां वरदां नित्यं ललितां चिंतयाम्यहं॥ पुष्पपूजां ते॥ उपांगललितायै० पा
दौ पू०॥ भवान्यै० गुल्फौ पू०॥ सिद्धेश्वर्यै० जंघे०॥ श्रियै० ऊरू०॥ बिम्बरूपिण्यै० कटिं०॥ देव्यै० नाभिं० ४८

वरदायै० कुक्षिं०॥ शिवायै० हृदयं०॥ वागीश्वर्यै० स्कंधौ०॥ महादेव्यै० बाहू०॥ प्रकृतिभद्रायै० करौ०॥
पद्मिन्यै० कंठं०॥ सरस्वत्यै० मुखं०॥ पद्मकेसरवासिन्यै० नासिकं०॥ महिषमर्दिन्यै० नेत्रे०॥ लक्ष्म्यै० क
र्णौ०॥ भवान्यै० ललाटं०॥ विंध्यवासिन्यै० शिरः०॥ सिंहवाहिन्यै० सर्वांगं पूजयामि॥ ततो धूपादिकं॥
पुष्पांजल्यंते सा ग्रान् ४ चत्वारिंशत्परिमितान् दूर्वांकुरान् हस्तेनादाय॥ बहुभरोहास तत मम ताह
रिता लता॥ यथैषं ललिते मातस्तथा मे स्युर्मनोरथाः॥ इति मंत्रेणार्पयेत्॥ पुनः एवमेवाष्टचत्वारिं
शद्धारं समर्पयेत्॥ ततः प्रदक्षिणानमस्कारः॥ कथाश्रवणादिना रात्रौ जागरणं कृत्वा प्रातः नित्यक
र्म निवर्त्य पुनः संपूज्य देव्यै अष्टोत्तरकान् समर्प्याग्निं प्रतिष्ठाप्यान्वादध्यात्॥ प्रधानं उपांगलल
तां गौरीर्मिमायेति मंत्रेण अष्टोत्तरशतदूर्वांकुतिभिः॥ नमो देव्या इति मंत्रेणाष्टोत्तरशततिलस

४९ र्पिपंचरवाद्ययुतपायसाकृतिभिर्यक्ष्ये॥ब्रह्मादिदेवताश्चाज्याकुत्वा॥एवंहोमंसंपाद्यअष्टौब्राह्मणां
न्वस्त्रादिभिःसंपूज्यतेभ्यःपक्वान्नपूरिकान्दक्षिणासहितानष्टौकलशांदद्यात्॥ततःआचार्यंव
स्त्रालंकारादिभिःसंपूज्य॥सदक्षिणंविंशतिवटकसहितंवायनंदद्यात्॥मंत्रः॥पक्वान्नफलसंयु
क्तंसघृतंदक्षिणान्वितं॥उपांगललिताप्रीत्यैब्राह्मणायददाम्यहं॥ततःदेवींविसर्जयेत्॥मंत्रः॥स
वाहनाशक्तियुतावरदापूजितामया॥मातर्मामनुगृह्यायगम्यतांनिजमंदिरं॥एवंविसृज्य॥
सोपस्करंपीठंगांचआचार्यदत्वा॥ब्राह्मणान्सदन्नेनसंतर्प्याप्याशिषोगृहीत्वास्वयंविंशति
वटकानभुंजीन॥ ॥इतिस्कांदेललिताव्रतोद्यापनंसमाप्तं॥इतिश्रीमत्शौनकर्यापंचमीव्रता
नि॥ ॥श्री॥अथषष्ठीव्रतानि॥ ॥भाद्रपदशुक्लषष्ठ्यांललिताषष्ठीव्रतं॥षष्ठ्यांप्रातःनारीन ४९

द्यांस्नात्वाशुक्लांबरासुवेषाभरणोपेतावंशपात्रेनपाःपंचपिंडाकृतिंकृत्वावालुकांसंगृह्यगृहमाग
त्यपीठंदेसंस्थाप्य॥तिथ्यादिसंकीर्त्यअखंडितसौभाग्यप्राप्तिपूर्वकसौख्याभिवृद्धिद्वाराश्री
ललिताषष्ठीप्रीत्यर्थंललिताषष्ठीव्रतंकरिष्ये॥ध्यानादिभिःपूजयेत्॥पंकजकरवीरंनेपालीमा
लतीनीलोत्पलंकेतकीतगरपुष्पसंख्याअष्टोत्तरशतंअष्टाविंशतिर्वासंगृह्य॥समर्प्यसोहालक
करंजकगुडवेष्टकर्णवेष्टमोदकादिभिःनैवेद्यंपुरतोन्यसेत्॥कूष्मांडनारीकेलत्रपुसदाडिमीबी
जपूरतुंडीरकारवेल्लदितत्कालसंभूतैःफलैःशोभांकृत्वाधान्यराशिस्थदीपावलीभिःसमंततः
भूषयेत्॥एवंपूजांसमाप्यप्रार्थयेत्॥ललितेललितेदेवीसौख्यसौभाग्यदायिनी॥अनंतदेहिसौभा
ग्यंमह्यंतुभ्यंनमोनमः॥ततःरात्रौगीतवाद्यादिभिःमेषोन्मेषरहितंसखीभिःसहजागरंकृत्वा॥सप्त

५० ष्यांप्रातःतत्सर्वंप्रातःनदींप्रतिनीत्वागंधपुष्पादिभिरभ्यर्च्यतत्सर्वंनैवेद्यादिविप्रायदत्वास्नात्वा
गृहमागत्यअग्निंप्रतिष्ठाप्य॥अष्टोत्तरशतंदूर्वाःयवतिलघृतपंचखाद्ययुतपायसंचहुत्वादेवपि
तृमनुष्यांश्चसुवासिनीःकन्यकाश्चालंकारादिभिःपंचदशब्राह्मणांश्चवस्त्रादिभिःसंपूज्य॥गांच
दत्वाबहुविधैर्भक्ष्यभोज्यैःसंतर्प्य॥ललितामेस्तुसंप्रीतेतिसंप्रार्थ्यस्वयंभुंजीतेतिहेमाद्रौभवि
ष्ये॥इतिललिताषष्ठिव्रतंसमाप्तं॥ ॥भाद्रकृष्णषष्ठ्यांकपिलाषष्ठीव्रतं॥तच्चपूर्वापरयुतायावा
कार्यंयोगविशेषेण॥योगलक्षणंपुराणसमुच्चये॥भाद्रेमास्यसितेपक्षेभानुश्चैवकरेस्थिते॥पात
कुजेचरोहिण्यंसाषष्ठीकपिलास्मृता॥संयोगेतुचतुर्णांचनिर्दिष्टापरमेष्ठिनेति॥वराहपुराणे॥न
भस्येकृष्णपक्षेतरोहिण्यांपातभूसुतैः॥युक्ताषष्ठीपुराणज्ञैःकपिलापरिकीर्तिता॥व्रतोपवास ५०

नियमैर्भास्करंतत्रपूजयेत्॥कपिलांतद्विजाग्र्यायदत्वाक्रतुफलंलभेत्॥एवंषष्ठीयदातदापंचम्यां
एकभक्तंकृत्वाषष्ठ्यांप्रातःदंतधावनंकृत्वाजलपूर्णांजलिंकृत्वा॥निराहारोद्यदेवेशत्वद्भक्तस्त्वत्प
रायणः॥पूजयिष्याम्यहंभक्त्याशरणंभवभास्करेत्यर्घ्यंदत्वानद्यादौगत्वातत्रदेवदारुउशीरकुंकुम
एलामनःशिलापद्मकपत्रकयष्टिमधुगव्यानांपेषणंकृत्वाक्षीरेणालोड्यकल्केनस्नानंकार्यंमने
नमंत्रेण॥आपस्त्वमसिदेवेशज्योतिषांपतिरेवच॥पापंनाशयमेदेवमनोवाक्कायकर्मजं॥ततःपंचग
व्यस्नानं॥ततःपंचपल्लवमार्जनं॥ततःशुद्धांमृत्तिकांगृहीत्वास्नानंयादनेनमंत्रेण॥मृत्तिकेब्रह्म
पूतासिकाश्यपेनाभिमंत्रिता॥पवित्रंकुरुमांनित्यंसर्वपापात्समुद्धरेति॥ततःवरुणंपूजयेत्॥पू
जामंत्रः॥पाशाग्रहस्तवरुणसर्वनारीश्वरप्रभो॥अद्याहंप्रार्थयेमित्वांव्रतंकुरुसुरेश्वर॥ततःस्ना

५१ स्नातिलकंकृत्वा॥भास्करंप्रणमेत्॥आदित्योभास्करोभानुरविःसूर्योदिवाकरः॥प्रभाकरोमित्रोवी
रोदेवःसर्वेश्वरोहरिः॥ततोगृहमागत्य॥तिथ्यादिसंकीर्त्य॥ममारोग्यपापक्षयापूर्वकरूपसंपदा
रोग्यविपुलसंततिस्वर्गलोकप्राप्तिद्वाराश्रीसर्वावभासकरुसर्वतेजोमयिश्रीसूर्यनारायणप्रीत्य
र्थंकपिलाषष्ठिव्रतंकरिष्ये॥तदंगपुण्याहवाचनादिकृत्वा॥ततःव्रताचार्यःस्वयंवागोमयो
पलिप्तायांभूमौकुंकुमेनाष्टदलंपद्मंविधायतदुपरिसर्वतोभद्रेकलशोपरिरक्तवस्त्रेष्टपत्रंकर्णि
कंपद्मंकृत्वातत्रपूर्वादिक्रमेणदेवताःआवाहयेत्॥सूर्यं॥भास्करं॥सुवर्णरेतसं॥रविं॥आदि
त्यं॥दिवाकरं॥प्रभाकरं॥तीव्ररश्मिधरं॥मध्येआधाररूपिणंवरुणंन्यसेत्॥तदुपरिसप्ताश्वर
थभूषितंसुवर्णरथंतत्राग्रतासौवर्णमरुणंसारथिंकृत्वारक्तपुष्पैःसुगंधैश्चपूजयेत्॥मंत्रः॥ ५१

विनतातनयोदेवःकर्मसाक्षीतमोनुदः॥सप्ताश्वःसप्तरज्जुश्चअरुणोमेप्रसीदतु॥एवम
रुणंसंपूज्य॥रथोपरिसौवर्णांसूर्यप्रतिमांआकृष्णेनेतिमंत्रेणावाहयेत्॥परितःदीप्तानिश
क्तिंन्यसेत्॥ताश्च॥दीप्तासूक्ष्माभद्राविविनीविमलाअनघाप्रमोघाविद्युतासर्वतोमुखी॥ततो
ध्यात्वासनंसंपाद्यं॥ततकरवीरार्कपुष्परक्तचंदनपंचकपुष्पसुगंधकुंभकुंकुमयुतपात्रस्थेनादा
य॥जानुभ्याअवनींकृत्वार्घ्यंनिवेदयेदनेन॥वेदगर्भनमस्तुभ्यंवेदगर्भनमोस्तुते॥अव्यक्तमूर्त
येतुभ्यंअर्घ्यंगृह्णनमोस्तुते॥ब्रह्ममूर्तिधरामचचतुर्वक्त्रसनातन॥स्थितिस्थितौसंस्थिताय
गृह्णायं॥विश्वरूपधरोदेवःपीतवस्त्रश्चतुर्भुजः॥प्रभवःसर्वलोकानामर्घ्यंगृह्णन॥कालात्मास
र्वभूतात्मावेदात्मासर्वतोमुखः॥जन्ममृत्युजराशोकसंसारभयनाशय॥दारिद्र्यव्यसनध्वंसीश्री

५२ मांदेवोदिवाकरः॥हरिदश्वोंशुमालीच अर्घ्यंगृह्णनमोस्तुते॥चतुर्भिर्मूर्तिभिःसंस्थामष्टाभिःपरि
गीयते॥सामध्वनिस्तुयोज्ञेयोयज्ञेअर्घ्यंनमोस्तुते॥ततःपुष्पपूजांतेगपूजा॥भास्करायनमः॥
शिखांपू०॥सूर्याय०॥ललाटंपू०भानवे०॥चक्षुषीपू०रवये०॥मुखंपू०भानुमते०॥कंठंपू०पद्मगर्भाय०॥
द्वौहस्तौपू०॥तिमिरक्षयकृते०॥स्तनौपू०जातवेदसेदसे०॥नाभिंपू०भानवे०॥कटिंपू०उग्ररूपाय०॥गुल्फौ
पू०॥तेजोरूपाय०॥जंघेपू०स्थूलसूक्ष्मगुणरूपाय०॥पादौपू०॥ततोपूजांसमाप्यप्रार्थयेत्॥अग्निमीळे
नमस्तुभ्यंनमस्तेजातवेदसे॥इषेचैवनमस्तुभ्यंअन्येचैवनमोनमः॥आत्मरूपिन्नमस्तुभ्यंविश्व
मूर्तिनमोनमः॥त्वंब्रह्मात्वंचविष्णुश्चत्वंधातात्वंकृतात्मनः॥मुक्तिकाममभीभामिप्रार्थयामिसुरे
श्वरेति॥नमस्कुर्यात्॥ततःसंवर्चसेतिमंत्रेणपाणिभ्यांतोयेनमुखंसंमृज्य॥हंसःशुचिषदितिचा ५२

सूर्यमालोक्य॥उदुत्यंचित्रंदेवानामितिसूक्तंदेवानायत्तोजपेत्॥ततःपूर्वोक्तपुष्पाक्षतानाना
नाविधभक्ष्यैःफलकंकलानवस्तुभिर्देवेशाय्यांप्रकल्पयेत्॥ततःलवणाचलोपरिरौप्यमयंरव
द्रुहस्तंवस्त्रयुगलेनसंस्थाप्यपूजयेत्॥मंत्रः॥नमस्तेकोपरूपायरवद्रुहस्ताजघासते॥जिघां
सिकामंत्वांदृष्ट्वादुद्रुवुःसर्वदेवताः॥त्वयाव्याप्तंमेरुपृष्ठंचंडभास्करसुप्रभा॥अतस्त्वांपूजयि
ष्यामिअर्घ्यंगृह्ण०॥ततःतांरात्रिमतिवाह्याभ्युदितेसूर्येपुनःस्नात्वादेवंसंपूज्याग्निंप्रति
ष्ठाप्यान्वादध्यात्॥प्रधानं॥श्रीसूर्यं॥अर्कसमिद्भिःघृताक्ततिलैःसिद्धचरुणाघृतेन — — —
द्रव्यंअष्टोत्तरशतसंख्याकाहुतिभिःआकृष्णेनेतिमंत्रेणव्याहृतिभिर्वायक्ष्ये॥पीठवरुण
देवताःब्रह्मादिदेवताश्चाज्याहुत्या॥ततःस्विष्टकृतं॥एवंहोमंसंपाद्य॥ततःसर्वोपस्कार

५२ सहितां कपिलां गां उक्तप्रकारेण संपूज्य प्रार्थयेत्॥ कपिले सर्वदेवानां पूजनीयासि रोहिणि॥
सर्वतीर्थमयी यस्मादतः शांतिं प्रयच्छ मे॥ ततः आचार्यमपूजनं कृत्वा तद्धस्ते गोभूः हिरण्यवा
सः श्रीहियवतिलां दत्वा कपिलां प्रार्थयेत्॥ कपिले पुण्यकर्मासि निष्पापे पुण्यकर्मे —॥—
समुद्ररदीनां च ददतो ह्यक्षरं कुरु॥ ब्रह्मणो ह्यादितो दाविअग्निकुंडात्तु प्रभा॥ नमस्ते कपिले
पुण्ये सर्वदेवनमस्कृते॥ जयनित्यमहाभक्ते सर्वतीर्थादिमंडले॥ दातारं स्वजनोपेतं ब्रह्मलोक
नयाश्रुये॥ ततः प्रदक्षिणीं कृत्वा॥ आचार्यहस्ते सोपस्करां सदक्षिणं पीठं च गां दद्यादनेन मंत्र
णे॥ दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः॥ कपिलासहिता देवो मम मुक्तिं प्रयच्छतु॥
तस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी॥ प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव॥ ततो न्यब्रा ५२

ह्मणान्संपूज्यान्नादिनां संतर्प्य त्रिशो गृहीत्वा सुहृद्युतो भुंजीत॥ आरोग्यरूपसौभाग्यस
र्वदुःखविवर्जितः॥ अंते गोलोकं गच्छंतीति हेमाद्रौ स्कांदे कपिलाषष्ठीव्रतं॥ ॥अथ सर्वा
सुषष्ठीषु स्कंदषष्ठीव्रतं॥ हेमाद्रौ भविष्ये॥ यस्यां कस्यांचित् षष्ठ्यां प्रातः स्नात्वोदेशकाला सं
कीर्त्य॥ मम सकुलादिजन्मप्राप्ति पूर्वक ऐहिक विद्यालक्ष्मी सुखाद्यभिवृद्धिद्वारा श्रीस्कं
दप्रीत्यर्थं स्कंदषष्ठीव्रतं करिष्ये॥ ततः सुवर्णादिना मूर्तिं कृत्वा पीठे संपूजयित्वा॥ दधिघृ
तं पुष्पाक्षतायुक्तमर्घ्यं दद्यादनेन मंत्रेण॥ सप्तर्षिदारज स्कंद सेनाधिप महाबल॥ रुद्रोमाग्निज षड्
गंगात्र गर्भ नमोस्तु ते॥ प्रीयतां देवसेनानीः संपादयतु हृद्गतं॥ एवं पूजां कृत्वा रात्रौ भोजनं कृत्वा तैल
पक्वविवर्जितं भोजनं कुर्यात्॥ शक्तो सप्तम्युपोषणं वा॥ एवं शुक्लायां कृष्णायां च षष्ठ्यां कार्यं॥ सर्वा

५४ भीष्टसिद्धिः॥ इतिस्कंदषष्ठीव्रतंसमाप्तं॥ ॥इतिश्रीमत्तत्वांकुर्यांव्रतोद्यापनकौमुद्यांषष्ठीव्रतानि॥ ॥
अथसप्तमीव्रतानि॥ श्रावणशुक्लसप्तम्यांमध्याह्नव्यापिन्यांशीतलाव्रतं॥ हेमाद्रौभविष्ये॥ तद्विधिः॥
मासपक्षाद्युल्लिख्यममावैधव्यदारिद्र्यभर्तृवियोगपुत्रसौख्यधनधान्यप्राप्तयेशीतलाव्रतमहंक
रिष्ये॥ तदंगपूजनंकरिष्ये॥ ततः धान्यराश्युपरिकलशेसुवर्णादिनिर्मितांशीतलाप्रतिमांनाममंत्रैः
पूजयेत्॥ ध्यानं॥ स्कांदे॥ वंदेहंशीतलांदेवींरासभस्थांदिगंबरां॥ मार्जनीकलशोपेतांशूर्पालंकृतमः
स्तकामिति॥ ततोर्घ्यंदद्यात्॥ मंत्रः॥ शीतलेदेहिमेधान्यंपुत्रसौख्यप्रदेमम॥ श्रावणस्यसितेपक्षेअर्घ्यं
गृहाणइत्यर्घ्यं॥ दधिघृतमिश्रपक्वान्ननैवेद्यं॥ ततः सप्तसुवासिनीः पूजयित्वाकथांश्रुत्वाताभिः सह
भुंजीत॥ इतिशीतलाव्रतंसमाप्तं॥ ॥भाद्रपदशुक्लसप्तम्यांमुक्ताभरणव्रतं॥ हेमाद्रौ॥ सलिलाद्य ५४

मेसृत्वागृहमागत्यगोमयादिलिप्तेशुद्धेदेशेचमंडलंविधाय॥ तदुपरिचंदनादिनाउमासहितंत्रि
शिवलोकवः पूजयेत्॥ देशकालौसंकीर्त्य॥ ममाखिलपापक्षयपूर्वकपुत्रपौत्रधनधान्यसौख्याति
शयद्वाराश्रीसदाशिवप्रीत्यर्थंमुक्ताभरणसप्तमीव्रतंकरिष्ये॥ इतिसंकल्प्य॥ पूर्वोक्तप्रकारेणपूजां
समाप्यप्रार्थयेत्॥ महादेवमहाराजप्रीत्यापापप्रणाशन॥ अस्माकंकुर्वतांपूजांसाधुवासुधुयोजि
ता॥ ज्ञानतोज्ञानतोवापिभवतिविहिताचया॥ संपूर्णंयतुविश्वेशोविमलः कोमलस्कतां॥ ततः दे
वस्यपुरतः॥ यावज्जीवंमयात्मानुशिवस्यचनिवेदितः॥ इत्येवंसमयंकृत्वासौवर्णराजतंसौत्रंवादो
रकंदेवाग्रतः॥ संपूज्यानेनमंत्रेणगृह्णीयात्॥ देवदेवजगन्नाथसर्वसौभाग्यदायक॥ गृह्णीयांदो
रकंत्वांपुत्रपौत्रप्रवर्द्धनं॥ ततः हस्तेबंधनमंत्रः॥ सप्तसामोपगीतंत्वांधारयामिजगद्गुरोः॥ सूत्रयं

५५ धिष्ठितंनित्यंधारयामिस्थिरोभवेत्यनेनहस्तेनबध्वा॥ततःदहसर्वाणिपापानितुष्टिंकुरुदत्रानि
ध्रे॥प्रसन्नःसंतुकामांतेदीर्घायुःपुत्रदोभवेतिजीर्णदोरकोत्तारणंकृत्वाब्राह्मणायएकादशान्नतसं
ख्याकान्मंडकान्वेष्टकान्वाघृतदक्षिणायुतान्वायनंदत्वातद्देवद्रव्यंस्वयंभुंजीत॥एवंप्रतिमासंशु
क्लसप्तम्यांकार्यं॥वर्षांतेहैमींराजतींवामुद्रिकांताम्रपात्रेपरिस्थाप्यब्राह्मणेभ्योदद्यात्॥आचार्या
यविशेषेणसौवर्णमंगुलीयकंपुष्पकुंकुमतांबूलांजनसुवंयुतंदक्षिणंगांचदद्यात्॥ब्राह्मणान्भो
जयित्वास्वयंभुंजीत॥संतानवृद्धिंलभासश्रिवलोकेमहीयते॥ ॥इतिमुक्ताभरणव्रतंसमाप्तं॥
॥माघशुक्लसप्तम्यांरथसप्तमीव्रतंहेमाद्रौभविष्ये॥षष्ठ्यांप्रातःशुक्लतिलैःनद्यादौस्नात्वादेवादीन्सं
जयित्वासूर्यालयंगत्वासूर्यंनमस्कृत्यसंपुष्पधूपाक्षतैःसंपूज्यस्वगृहमागत्यअतिथींश्चसंभोज्यवि ५५

यमानेदिनेतैलवर्जितंस्वयमश्नीयात्॥रात्रौविप्रंसमाहूयसंपूज्यनियमंकुर्यात्॥सप्तम्यांतु
निराहारोभूत्वाभोगविवर्जितः॥भोक्ष्येहंश्व्यांजगन्नाथनिर्विघ्नंतन्ममेकुरु॥इत्यक्षार्यतोयंतोये
पुनिक्षिपेत्॥ततःविसृज्यभूमौस्वपेत्॥ततःसप्तम्यांप्रातःअरुणोदयवेलायांहरिद्रामलकचूर्णमि
तिलैश्चसहस्नात्वा॥कृतावश्यकःसौरंसूक्तंजप्त्वा॥गोमयेनोपलिप्तायांभूमौनदीतीरेगृहांगणे
श्वत्थमूलेतुलसीतलेवावस्त्रादिनामंडपंकृत्वातन्मध्येवेदिकांतदुपरिधातुनाकुंकुमेनवाअष्टदलं
विधायतदुपरिआरक्तवस्त्रंप्रसार्योपरिएकचक्रंकृत्वान्वितंसोपस्करंसौवर्णंराजतंवारथंसंस्थाप्यतत
त्रसौवर्णींसूर्यप्रतिमामावाह्य॥अथध्यानं॥द्विभुजंरक्तवर्णंचक्राढ्यंपद्मासनसमन्वितं॥मुकुटंसमये
साम्याधेयेवंनारायणंशुभं॥रक्तगंधारक्तपुष्पंगुग्गुलागरुधूपकः॥परमान्ननैवेद्यं॥एवंषोडशोपचा

५५ रैः संपूज्य॥ तदग्रे धातुनारजनीचूर्णेन वा अष्टदलं पद्मं विरच्य॥ पूर्वादिक्रमेण रविं॥ आदित्यं॥ सवितारं॥
मित्रं॥ खगपतिं॥ सूर्यं॥ भास्करं॥ दिवाकरं॥ मित्रं॥ संपूज्य॥ मध्ये नारायणं संपूज्य॥ भक्तिहीनं क्रिया
हीनं मंत्रहीनं जगत्पते॥ प्रसादात्तव संपूर्णमर्चनं यदिहास्तु मे॥ इति संप्रार्थ्य॥ षण्मुकूर्नैरवौ प्राप्ते सति
तदा यदि च धारविसं प्रार्थ्य॥ दक्षिणशिरः धौतवस्त्रेण आच्छाद्य सुखपेत्॥ यावदुदयभास्करगतो तावत्॥
स्वप्ने सूर्यः मनोभिलषितं कथयेत्॥ तत उत्थाय प्रवालमुक्तासहितं घृतेन लोलितं गर्भे हाटकं पूर्णं दुकुल
वेष्टितं सदक्षिणं सतांबूलं कूष्मांडं दद्यात्॥ तदभावे मातुलिंगं देयं॥ अकिंचनेन सारथिं पंचवर्णकैः नि
र्माय सौवर्णीं प्रतिमां पूर्ववदर्चयेत्॥ ततः रात्रौ जागरणं कृत्वा प्रातः स्नात्वा सर्वं गुरवे दत्वा गां च दद्यात्॥ ततः इ
ष्टजनैः सह भुंजीत॥ एवं इह पुत्रपौत्रानुसाद्य सूर्यलोकं यास्यति॥ अथ स्नानं॥ अरुणोदये सप्तार्कप ५५

र्णानि च शिरसि निधाय स्नात्वा प्रार्थयेत्॥ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु॥ तन्मे रोगं च शोकं च माक
री हंतु सप्तमी॥ स्नानानंतरमर्घ्यं॥ सप्तसप्तिवहप्रीत सप्तलोकप्रदीपनं॥ सप्तम्या सहितो देव गृहाणार्घ्यं दि
वाकर॥ प्रार्थना॥ जननी सर्वभूतानां सप्तमी सप्तके तिथिः॥ सप्तम्या तु तिके देवी नमस्ते सूर्यमंडले॥ इति
भविष्योक्त स्नानादि विधिः॥ इति रथसप्तमीव्रतं समाप्तं॥ माघशुक्लसप्तम्याम् अचलासप्तमीव्रतं॥ तत्र मा
घशुक्लषष्ठ्यां प्रातः स्नात्वा देशकालौ संकीर्त्य॥ मम अखिलपापक्षयपूर्वक रूपसौभाग्य सर्वकामफलप्रा
प्तिद्वारा श्रीसूर्यनारायणप्रीत्यर्थं श्वः अचलासप्तमीव्रतं करिष्ये इति संकल्प्य॥ भास्करं संपूज्य स्वयमेक
भक्तं कुर्यात्॥ ततः सप्तम्याम् अरुणोदये सुगंभीरं जलाशयं तडागं देवखातं सरितं वा केनचित् चालितं याव
त्तावत्कृत्वा प्रथमं सौवर्णराजते अलाबुमये वा पात्रे तैलवर्तियुतं कुसुमभूषितं दीपं संस्थाप्य तत्पात्रं शिरसि

५७ ध्यात्वा हृदये भास्करं रश्मीलाढ्यं मंमंत्रमुदीरयेत्॥ नमस्ते रुद्ररूपाय रसानां पतये नमः॥ वरुणाय नम
स्तेस्तु हरिवासन नमोस्तु ते॥ इत्युक्त्वा जले दीपं परिहरेत्॥ ततः स्नात्वा देवताः संतर्प्य॥ ततो रक्तचंदने
नाष्टदलं विलिख्य तत्र पूर्वादिक्रमेण॥ रविं॥ भानुं॥ विवस्वतं॥ भास्करं॥ सवितारं॥ अर्कं॥ सहस्र
किरणं॥ सर्वात्मानं॥ मध्ये उमायुतशिवं॥ प्रणवयुतं च संस्थाप्य॥ संपूज्य॥ विसृज्य च स्वगृह मा
गतस्ताम्रपात्रे वा मृन्मये॥ घृतगुडयुतं तिलपिष्टं सौवर्णं अश्वकौ तिलपिष्टं जं वा तालपत्रं रक्तवस्त्रे
णाच्छाद्य संपूज्य ब्राह्मणद्वारा चालयेत्॥ ततः ब्राह्मणं संपूज्य तत्सर्वं निवेदयेत्॥ समस्तं दिनं हृदि भा
स्करं ध्यायन् भुंजीत॥ रूपसौभाग्यवती स्यात्॥ ॥इति अचलासप्तमीव्रतं समाप्तं॥ ॥अस्यामे
व पुत्रसप्तमीव्रतं॥ आदित्यपुराणे॥ षष्ठ्यां प्रातः स्नात्वा तिथ्यादि संकीर्त्य॥ मम सद्गुणयुतपुत्रप्रा ५७

प्तिपूर्वकपौत्राद्यभिवृद्धिद्वारा श्रीसूर्यनारायणप्रीत्यर्थं पुत्रसप्तमीव्रतं करिष्ये॥ ततः सूर्यं गंधे
नमाल्यविलेपनैः॥ संपूज्य उपोषणं कृत्वा भूमौ स्वपेत्॥ ततः पुनरुत्थाय स्नात्वा पुनः सूर्यं पू
जयित्वाग्निहोत्र होमं कुर्यात्॥ दध्योदनेन पयसा पायसेन द्विजांस्तान् संतर्प्य भुंजीत॥ एवं पक्ष
द्वयेपि कृष्णे विशेषः॥ रक्तोत्पलैः रक्तपुष्पैः पूजनं॥ एवं संवत्सरपर्यंतं कृत्वा पुत्रप्राप्तिर्भवेत्॥
इति पुत्रसप्तमीव्रतं समाप्तं॥ ॥इति श्रीमत्शंकरविरचितायां व्रतोद्यापनकौमुद्यां सप्त
मीव्रतानि॥ अथाष्टमीव्रतानि॥ बुधयुक्तायां शुक्लाष्टम्यां बुधाष्टमीव्रतं॥ तत्र सप्तम्यां संक
ल्पपूर्वकं दंतधावनादि कृत्वा दश विप्रान् निमंत्र्य॥ अष्टम्यां प्रातः गंगादितीर्थे स्नात्वा देश
कालौ संकीर्त्य॥ मम मद्गृह जन्मनि जन्मांतरे वा बाल्यारभ्य कर्मणा मनसा वचसा ज्ञाताज्ञात

५८ तावत्स्वर्णाद्यापत्तोदोषपरिहारपूर्वकपुत्रपौत्रादिसकलमनोरथप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्य
र्थंमयाआचरितबुधाष्टमीव्रतोद्यापनंकरिष्ये॥तदंगपुण्याहवाचनादिकृत्वाव्रताचार्यःरंगव
ल्यादिविराजितदेशेसर्वतोभद्रमंडलोपरिपंचप्रस्थधान्यस्थकलशेपूर्णपात्रोपरिपंचवर्णैरष्टद
लंपद्मंकृत्वातत्रउद्बुध्यध्वमितिमंत्रेणस्वर्णनिर्मितबुधप्रतिमांमध्येसंस्थाप्य॥तद्दक्षिणेविष्णुद्र
तिमंत्रेणस्वर्णनिर्मितबुधप्रतिमांमेदंविष्णुरितिमंत्रेण॥वामेसहस्रशीर्षेतिनारायणं॥दलेषु
पूर्वादिक्रमेण॥विष्णुं॥सोमं॥भौमं॥गुरुं॥शुक्रं॥शनिं॥राहुं॥केतुं॥दलाग्रेषुप्राग्यादिक्रमेण॥
अनंतं॥वामनं॥विष्णुं॥सौरिं॥सत्यंजनार्दनं॥हंसं॥नारायणं॥बाह्ये॥इंद्रादींश्चसंस्थाप्य॥द
क्षिणे॥यमंचित्रगुप्तंश्यामलांचयजेत्॥ततःमंडलासरितःअष्टाष्टलडुकयज्ञोपवीतदक्षिणायु ५८

तानष्टकलशांसंस्थाप्योक्तरीत्यापीतवस्त्रपुष्पादिभिःपूजयेत्॥पुष्पपूजातेंगपूजा॥बुधाय०
पादौपू०सोमपुत्राय०जानुनी०तारकाय०कटिं०राजपुत्राय०उदरं०इलाप्रियाय०हृदयं०कुमाराय०
वक्ष०पुरूरवसःपित्रे०बाहू०सौम्यवाय०अंसौपू०पीतवर्णाय०मुखं०ज्ञानाय०नेत्रे०बुधाय०
मूर्धानं०एवंपूजासमाप्य॥तदुत्तरेउक्तरीत्याग्रहांत्संस्थाप्यपूजयेत्॥केचित्पृथग्गुरुकरणं
नेच्छंतितेषांमंडलांतःपातित्वात्॥ततःबुधायार्घ्यं॥सौवर्णादिपात्रेगंधपुष्पाक्षतयुतजलमादा
यजानुभ्यामवनींकृत्वा॥उर्वश्याश्चगुरुर्यस्तुयःपुरूरवसःपिता॥योग्रहाणामधिपतिर्बुधोनः
संपूज्याग्निप्रतिष्ठाप्यान्वाद्ध्यात्॥प्रधानंबुधंअपामार्गसमित्यवव्रीहीतिलघृततिलमिश्रगो
धूमद्रव्यैःपृथक्पृथगष्टोत्तरशतसंख्याकाहुतिभिःअधिप्रत्यधिदेवोचनैरेवद्रव्यैःपृथगष्टा

५४ विंशतिसंख्याकाहुतिभिःआवरणदेवताश्चएकैकयाज्याहुत्या॥एवंहोमंसंपाद्यस्विष्टकृता
दिप्रायश्चित्तंकृत्वाबलिदानंपूर्णाहुतिंचसंपाद्याचार्यादीन्संपूज्यदेवतोद्वासनंकृत्वाचार्या
दयःयजमानमभिषिंच्यततोयजमानःविभूतिवंदनंकृत्वाचार्यायाष्टलड्डुकवायनं॥संतु
ष्टोवायनादस्मादिलानाथोग्रहेश्वरः॥वरांश्चविष्णुनादत्तांत्सकलान्नःप्रयच्छतु॥सोपस्करंपीठगो
चदत्वान्येभ्यःपूर्वस्थापितकलशांदत्वासदन्नेनसंतर्प्याशिषोगृहीत्वास्वयंभुंजीत॥इतिबुधाष्टमी
व्रतंसमाप्तं॥अथशुक्लादिश्रावणकृष्णाष्टम्यांदशफलव्रतं॥आदित्यपुराणे॥अष्टम्यांजन्मसम
येस्नात्वादेशकालौसंकीर्त्यममदुःखशोकदारिद्र्यादिनाशपूर्वसकलसुखसौभाग्यादिप्राप्ति
द्वाराश्रीकृष्णप्रीत्यर्थंदशवर्षात्मकंदशाहंदशफलव्रतंकरिष्ये॥इतिसंकल्प्यपीठदेश्रीकृष्णंसंपू ५९

ज्यदशतुलसीदलानिदशनामभिः॥कृष्णं॥विष्णुं॥अनंतं॥गोविंदं॥गरुडध्वजं॥दामोदरं॥
हृषीकेशं॥पद्मनाभिं॥हरिं॥प्रभुं॥समर्पयेत्॥पूजनमंत्रः॥नारायणायदेवायगोकुलागार
वासिने॥दिव्यायदिव्यरूपायबालकृष्णायतेनमः॥तदग्रेदशगुणंदशग्रंथियुतंसूत्रंन्यसेत्॥
पुरतःदशपद्मानिपिष्टेनकृत्वापूजयित्वातत्सूत्रंकंठेहस्तेवा॥मंत्रः॥संसारार्णवमग्नानांनरा
णांपापकर्मणां॥इहामुत्रफलावाप्तिंकुरुष्वपुरुषोत्तम॥ध्यात्वादशाहंव्रतमाचरेत्॥दशमेह्नि
पूजनंकृत्वाप्रस्थगोधूमचूर्णेनत्रिंशन्मोदकांकृत्वादशदेवताय॥आत्मनेदश॥ब्राह्मणायदशमो
दकान्दशविधफलदक्षिणायुतान्वायनं॥त्रिलोकीनाथदेवेशसर्वभूतदयानिधे॥दानेनानेनदेवे
शयथोक्तफलदोभवेतिदत्वा॥देवंप्रार्थयेत्॥वासुदेवजगन्नाथवांछितार्थफलप्रद॥व्रतेनानेन

५९ सुप्रीतोरक्षत्वंभवसागरात्॥ततःभोजनंकुर्यात्॥एवंदशवर्षपर्यंतं॥दशफलनामानि॥नारिके
रंचदाडिंबंनारिंगंकदलीफलं॥पूगीफलंमातुलिंगंजंबीरंखर्जुरीफलं॥कर्कोटकीबदामादिदश
फलमितिस्मृतं॥उद्यापनं॥पूर्वोक्तसंकल्पांतेव्रताचार्यःसर्वतोभद्रस्थकलशोपरिहैमीश्रीकृष्ण
प्रतिमांसंस्थाप्यपूर्वोक्तप्रकारेणसुवर्णतुलसीदलेनचसंपूज्यरात्रौजागरणंकृत्वाप्रातरग्निंप्रति
ष्ठाप्यान्वादध्यात्॥प्रधानंश्रीकृष्णंअश्वत्थसमिच्चरुघृतद्रव्यैःप्रत्येकमष्टोत्तरशतसंख्यया॥
मंडलदेवताश्च॥एवंहोमंसंपाद्यपूर्वोक्तप्रकारेणगायनंदत्वासोपस्करंपीठंचगांदद्यात्॥आ
ल्पंच॥ब्राह्मणांश्चसंतर्प्याशिषोगृहीत्वास्वयंभुंजीत॥दशफलव्रतंसमाप्तं॥श्रावणकृष्णा
ष्टम्यांनिशीथव्यापिन्यांजन्माष्टमीव्रतं॥प्रातःदंतधावनपूर्वकंस्नात्वादेशकालौसंकीर्त्य॥मम ५९

अखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वाराअमुककामनयावाआचरितज
न्माष्टमीव्रतोद्यापनंकरिष्ये॥तदंगपुण्याहवाचनादिकृत्वा॥व्रताचार्यः॥गोमयादिलिप्तशुद्धदेशेपं
चवर्णवस्त्रपुष्पमालाफलादिशोभितेवेद्यांसर्वतोभद्रेप्रस्थतिलोपरिस्थकलशोपरिपूर्णपात्रेरौप्यम
यंसौवर्णंदेवकींतदुत्संगेवामस्तनपायिनंसौवर्णंश्रीकृष्णमिदंविष्णुरितिमंत्रेणविष्णोर्नुकमितिर
वा॥परितःवसुदेवं॥बलदेवं॥नंदं॥यशोदां॥सुभद्रां॥रोहिणीं॥विधुं॥मत्स्यादिदशरूपाणि॥आदि
त्यादिग्रहान्॥अश्विन्यादिसप्तविंशतिनक्षत्राणि॥देवान्॥नागान्॥यक्षान्॥विद्याधरान्॥उरगा
न्॥यमुनां॥कालिंगं॥कंसं॥गाः॥योगनिद्रां॥सात्यकिं॥उद्धवं॥अक्रूरं॥उग्रसेनादियादवान्॥शं
खं॥चक्रं॥गदां॥पद्मं॥तुष्टिं॥कालात्मानं॥अहोरात्रं॥मासं॥संवत्सरं॥सर्वात्मानं॥द्वारपालान्॥

६३ पुण्यशीलं॥सुशीलं॥जयं॥विजयं॥पुरतः॥गरुडं॥एवंनाममंत्रैरावाह्य॥पुरुषसूक्तेनपूजयेत्॥
ध्यानं॥कृष्णंचतुर्भुजंदेवंशंखचक्रगदाधरं॥पीतांबरयुगोपेतंलयुतंविभूषितं॥लसत्कौस्तुभशो
भाढ्यंमेघश्यामंसुलोचनं॥ध्यायामिपुंडरीकाक्षंजगदानंदकारकं॥अंगपूजा॥श्रीकृष्णायन॰पा
दौ॰संकर्षणाय॰गुल्फौ॰कालात्मने॰जानुनी॰विश्वकर्मणे॰जघने॰विश्वनेत्राय॰कटिं॰प
द्मनाभाय॰नाभिं॰परमात्मने॰हृदयं॰श्रीकंठाय॰कंठं॰सर्वास्त्रधारिणे॰बाहुं॰वाचस्पतये॰
मुखं॰केशवाय॰ललाटं॰सर्वात्मने॰शिरः॰पू॰पूजांसमाप्यस्तोत्रंपठेत्॥अनर्घ्यंवामनंशौरिं
वैकुंठंपुरुषोत्तमं॥वासुदेवंहृषीकेशंमाधवंमधुसूदनं॥वाराहंपुंडरीकाक्षंनृसिंहंदैत्यसूदनं॥दामो
दरंपद्मनाभंकेशवंगरुडध्वजं॥गोविंदमच्युतंविष्णुमनंतमपराजितं॥अधोक्षजंजगद्बीजंसृष्टि ६३

स्थित्यंतकारकं॥अनादिनिधनंकृष्णंत्रैलोक्येशंजगद्गुरुं॥नारायणंचतुर्बाहुंशंखचक्रगदाध
रं॥पीतांबरधरंनित्यंवनमालाविराजितं॥श्रीवत्सांकंजगद्धेतुंश्रीधरंश्रीपतिंहरिं॥एवंस्तु
त्वादेवस्यजातनामषष्ठीपूजादिकृत्वापुरतः॰अभयांवचांशुंठीगुडूचींपिप्पलींशस्त्राणिनि
क्षिप्यार्घ्यंदद्यात्॥चंद्रोदये॥जातःकंसवधार्थायभूभारोत्तारणायच॥कौरवाणांविनाशा
यदैत्यानांनिधनायच॥पांडवानांहितार्थायधर्मसंस्थापनायच॥गृहाणार्घ्यंमयादत्तंदेव
कीसहितोहरे॥इतिकृष्णार्घ्यं॥अंगणेभूमौराजंतंचंद्रबिंबंसंपूज्यार्घ्यं॥जानुभ्यामवनींकृत्वा॥
क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर॥गृहाणार्घ्यंमयादत्तंरोहिण्यासहितःशशि॥
रोहिण्यार्घ्यं॥दक्षस्यदुहितासाध्वीरोहिणीनामनामतः॥सोमेनसहितेदेवीगृहाण॰॥

५२ ततः प्रार्थना॥त्राहि मां सर्वगः श्रीशहरे संसारसागरात्॥त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्र
भो॥यद्बाल्ये यच्च कौमार्ये यौवने यच्च वार्धके॥तत्पुण्यं वृद्धिमाप्नोति पापं हर हलायुध॥इति॥रात्रौ जाग
रणं कुर्यात्॥प्रातः स्नात्वा संपूज्याग्निं प्रतिष्ठाप्यान्वादध्यात्॥प्रधानं विष्णुरिदं विष्णुरिति मंत्रेण
पायसतिलव्रीहियवद्रव्यैः प्रतिद्रव्यमष्टोत्तरशतसंख्याहुतिभिः॥पुनः पंचरवाद्येन विष्णोर्नुक
मिति मंत्रेणाष्टोत्तरशतसंख्याकाहुतिभिः॥पुनः पुरुषसूक्तेन प्रत्यृचमेकैकयाज्याहुत्या॥म
हाव्याहृतिभिश्चाष्टाविंशतिसंख्याकाज्याहुतिभिः परिवारदेवता ब्रह्मादिदेवताभ्य एकैकया
ज्याहुत्या॥शेषेण स्विष्टकृतं॥ततः आचार्यं संपूज्य विभवे सति भूशय्यां रौप्य वस्त्राणि च ना
सनादि दत्वा॥पीठं दद्यात्॥श्रीकृष्णः प्रतिगृह्णातु श्रीकृष्णो वै ददाति च॥श्रीकृष्णस्तारको भा ५२

कं॰

भ्यां श्रीकृष्णाय नमो नमः॥कृष्णायानंतरूपाय दास्यामि प्रतिमामिमां॥द्रव्यं विष्णुसमुद्भूत
मतः शांतिं प्रयच्छ मे॥व्रतपूर्तये गां च दद्यात्॥अभिषेकः॥शतमष्टाविंशति दश वा ब्राह्मणां
संतर्प्य स्वयं भुंजीतेति भविष्योत्तरे॥ ॥इति जन्माष्टमीव्रतं समाप्तं॥ ॥अथ ज्येष्ठाव्रतं॥भा
द्रशुक्लाष्टम्यां ज्येष्ठर्क्षे इदं च ज्येष्ठायोगवशेन पूर्वविद्धायां परविद्धायां वा कार्यं॥दिनद्वये तद्यो
गे परैव॥पूर्वेद्युरात्रौ तद्योगे पूर्वैव॥अन्यत्र विशेषः॥अष्टमी रविवारज्येष्ठार्क्षयोगे नीलज्ये
ष्ठेत्युच्यते॥देशकालौ संकीर्त्य नानं ममालक्ष्मीपरिहारपूर्वकधनधान्यपुत्रपौत्रसौभाग्याभिवृ
द्धिद्वारा श्रीज्येष्ठादेवताप्रीत्यर्थं अमुककामनासिध्यर्थं वा ज्येष्ठाव्रतं तदुद्यापनं करिष्ये॥पूर्वेद्युः
नद्याः शुद्धदेशजाः सिकताः समानीय तत्र देवीः स्वरूपं कृत्वा पूजयेत्॥उद्यापने तु सौवर्णं ज्ये

५३ ष्ठाप्रतिमांमंडलेकलशोपरिसंस्थाप्यपूजयेत्॥ त्रिलोचनांशुक्लदंतींबिभ्रतींराजतींतनुं॥ विरक्ता
रक्तनयनांज्येष्ठामावाहयाम्यहमितिनाममंत्रेणपूजा॥ ज्येष्ठेश्रेष्ठेतपोनिष्ठेब्रह्मिष्ठेसत्यवादि
निएह्येहित्वंमहामायेअर्घ्यंगृ०इत्यर्घ्यं॥ तामग्निवर्णामापोहिष्ठेतितिसृभिःहिरण्यवर्णेतिच
तसृभिःरभिषेकःप्रार्थयेन्॥ यस्याःसिंहोरथेयुक्तोव्याघ्रश्चापिमहाबलः॥ ज्येष्ठामहमिमां
देवींप्रपद्येशरणंशुभं॥ ततःतर्पणं॥ ज्येष्ठांतर्पयामि॥ सत्यांत०॥ कलिप्रियां०॥ विघ्नांत०॥ वैनायकीं०
तापिनीं०श्रीकृष्णां०॥ अपूपवटकवायनंदत्वारात्रौजागरणंकुर्यात्॥ प्रातःपुनःसंपूज्याग्निंप्र
तिष्ठाप्यात्रप्रधानंगौरीतामग्निवर्णामितिमंत्रेणदधिमधुक्षीरघृतैःप्रत्येकमष्टोत्तरशतसंख्या
हुतिभिःमंडपदेवताश्चएवंहोमंकृत्वाचार्यपूजनंसंपूज्यकृष्णवस्त्रयुतंपीठंव्रतपूर्तयेगां ५३

वदद्यात्॥ सुवासिनीःवस्त्रालंकारादिभिःसंपूज्यब्राह्मणांश्चसंतर्प्याशिषोगृहीत्वाभुंजीत॥ सि
कतादिकंनद्यांत्यजेत्॥ एवंद्वादशवर्षपर्यंतंआजन्मपर्यंतंवा॥ इतिज्येष्ठाव्रतंसमाप्तं॥ भाद्रपद
शुक्लाष्टम्यांदूर्वाष्टमीव्रतंभविष्ये॥ प्रातःशुक्लतिलैःस्नात्वादेशकालौसंकीर्त्य॥ ममेहजन्मनिजन्
मांतरेवाअखंडितसौभाग्यपुत्रपौत्रादिलक्ष्मीप्राप्त्यर्थंदूर्वाष्टमीव्रतंकरिष्ये॥ उदीचींदिशंग
त्वादूर्वामूलंनमस्कृत्यप्रार्थयेत्॥ त्वंदूर्वेऽमृतजन्मासिवंदितासिसुरासुरैः॥ सौभाग्यंसंततिंदेहि
सर्वकार्यकरीभव॥ यथाशाखाप्रशाखाभिर्विस्तृतासिमहीतले॥ तथाविस्तृतसंतानंदेहित्वमजरा
मरे॥ इतितत्रैवगृहेवावितस्तिमात्रांदूर्वांआनीयपीठेसंस्थाप्यतत्रतन्मूलेशिवंगणेशंचसंस्थाप्यत
न्मंत्रेणपूजयेत्॥ आगच्छदेविदूर्वेत्वंसर्वसंपत्प्रदायिनि॥ यावद्व्रतंसमाप्येततावत्त्वंसंनिधौभ

५४ वेस्यावाहनं॥ दध्यक्षतैस्तज्जोभिश्च पूजनं॥ खर्जूरीनारीकेलमातुलिंगद्राक्षाबदरलकुचजंबीर
बीजपूरदाडिमीफलैर्नैवेद्यैस्तैरेव वायनं विप्राय दत्वा पूर्ववत्संस्थाप्य देवीं विसर्जयेत्॥ मंत्रः॥ विष्णु
देहसमुद्भूते दूर्वे बर्हिः प्रसीद मे॥ वंदिता सर्वदेवैस्त्वं गम्यतां निजमंदिरं॥ ततः सदन्नेन ब्राह्मणांस्तं
तर्प्य स्वयं आनग्निपक्वमन्नं दधि फलमक्षारलवणमन्नमश्नीयात्॥ एवं प्रतिमासमष्टम्यां॥ ॥
एवं संवत्सरं कृत्वांते उद्यापनं कुर्यात्॥ द्रताचार्यः मंडले परिकलशस्थवैणवपात्रे सप्तधान्ययु
तैर्हैमीं रौप्यमूलयुतां दूर्वां संस्थाप्य पूर्वोक्तप्रकारेण पूजयित्वा रात्रौ जागरणं कुर्यात्॥ प्रातः अ
ग्निं प्रतिष्ठाप्यान्वादध्यात्॥ प्रधानं गौरी कांडात्कांडादिति मंत्रेण तिलैः आज्येन च अष्टाधिकश
तसंख्यया यक्ष्ये॥ मंडलदेवताश्च॥ एवं होमं संपाद्य ब्राह्मणेभ्यः तिलपिष्टगोधूमसप्तधान्यानि फ ५४

लानि च वायनत्वेन दत्वाचार्याय वस्त्रादिभिः संपूज्य सोपस्करं पीठं व्रतपूर्तये गां च दत्वा द्वादश ब्राह्मणा
न्सदन्नेन संतर्प्याशिषो गृहीत्वा स्वयं भुंजीत॥ संतानवृद्धिर्भवति॥ ॥इति दूर्वाष्टमीव्रतं समाप्तं॥
अथ महालक्ष्मीव्रतं॥ अथ भाद्रपदशुक्लाष्टमीमारभ्य षोडशदिनपर्यंतं महालक्ष्मीव्रतं॥ तच्चार्धरात्रा
तिक्रमवर्तिन्यामष्टम्यां कार्यं॥ अत्र ज्येष्ठयुतायां प्राशस्त्यं॥ अष्टम्यां प्रातः षोडशवारं अग्नीकरो
मुखं च प्रक्षाल्य षोडशगंडूषांश्च कृत्वा मंत्रस्नानपुरतः सरस्नात्वा तिथ्यादि संकीर्त्य॥ मम सकलदौ
र्भाग्यदुःखनिबर्हणपूर्वकधनधान्यैश्वर्यपुत्रपौत्राद्यभिवृद्धिद्वारा श्रीमहालक्ष्मीप्रीत्यर्थं महालक्ष्मी
व्रतं करिष्ये॥ ततः षोडशतंतुमयं षोडशग्रंथियुतं सूत्रं निर्माय विमलासने संस्थाप्य तत्र॥ महाल
क्ष्मि समागच्छ पद्मनाभपदादिह॥ पंचोपचारपूजेयं त्वदर्थं परिकल्पिते ति लक्ष्मीनाम्ना षोडशदूर्वा

५५ कुंरैः मालतीपुष्पकर्पूरचंदनादिभिः श्रीसूक्तेन लक्ष्मीसूक्तेन लक्ष्मीं संपूज्य प्रार्थयेत्॥ ध
नं धान्यं धराधर्मं कीर्तिमायुर्यशःश्रियं॥ लक्ष्मीदेवि यथासि त्वं गृहे सूत्रे तथा वसेस्तनेन पुरुषे
ण दक्षिणकरे स्त्रिया कंठे बध्वा कथां श्रुत्वा भुंजीत॥ एवं कृष्णाष्टमीपर्यंतं प्रत्यहं तद्देवसूत्रं
संपूज्य धारयेत्॥ कृष्णाष्टम्यां नस्त्रगृहं रंगवल्ल्यादिभिर्युतं कृत्वा तत्राष्टदलं द्वंद्वादिशक्तियुतं
मन्मायतनत्र काष्ठमयं चंदनादिभिः चतुर्भुजां गजद्वयेगतां महालक्ष्मिमूर्तिं विरच्य तत्र पूर्ववन्नू
तनं सूत्रं प्रतिष्ठाप्य पूजयेत्॥ अंगपूजा॥ चपलायै नमः पादौ पू०॥ चंचलायै न० जानुनी पू० क
मलवासिन्यै न० कटिं॥ ख्यात्यै न० नाभिं॥ मन्मथवासिन्यै न० स्तनौ॥ ललितायै न० भुजद्वयं पू० उत्कंठि
न्यै न० कंठं॥ मायायै न० मुखं० श्रियै न० शिरः॥ रमायै न० सर्वांगं पू० पूर्ववत्संपूज्य प्रार्थ्य तन्नूतनसूत्रं ५५

पूर्ववद्धृत्वा षोडशनमस्कारान्कृत्वा जीर्णदोरकं॥ महालक्ष्मीगृहाण त्वं दोरकं यन्मया धृ
तं॥ लक्ष्मीपार्श्वे निवेदयेत्॥ ततः ब्राह्मणान्संपूज्य शूर्पे षोडशदीपान् षोडशगोधूमतं
डुलकांश्च निधाय दद्यात्॥ चतुर्द्वादशसंख्याकान्दीपान् पिंडान्घृतमापूतान्॥ गृहा
ण त्वं द्विजश्रेष्ठ वायनं प्रीतये श्रियः॥ ततश्चंद्रोदये सति चंद्रं संपूज्यार्घ्येन दद्यात्॥ नमस्ते
स्तु निशानाथ लक्ष्मीभ्रातर्नमो नमः॥ व्रतसंपूर्णतां यातु गृहाणार्घ्यं विधो भव॥ ततः
भोजनं कृत्वा रात्रौ जागरणं कुर्यात्॥ प्रातः विसर्जयेदनेन मंत्रेण॥ पंकजं देवि सत्यज्य म
म वेश्मनि संविश॥ यथा सपुत्र भृत्योहं सुखी स्यां त्वं प्रसादतः॥ तत्सूत्रं वर्षपर्यंतं धारये
त्॥ एषो वै षोडशवर्षपर्यंतं अशक्तो षोडशदिनं वा चरित्वा तं उद्यापनं कुर्यात्॥ पूर्वोक्तसं

५५ कृत्वांतेव्रताचार्यः सर्वतोभद्रस्थकलशोंहेमीमहालक्ष्मीप्रतिमांसत्कुर्मिचेतिमंत्रेणसंस्थाप्य
पूर्ववत्संपूज्यचंद्रार्घ्यंदत्वादेवींप्रार्थयेत्॥क्षीरोदार्णवसंभूतेकमलेकमलालये॥प्रयच्छस
र्वकामान्मेविष्णुवक्षस्थलालये॥पुत्रान्देहियशोदेहिसौंख्यंसौभाग्यमेवच॥कुरुश्रियंम
हालक्ष्मीअलक्ष्मींचाशुनाशय॥रात्रौजागरणंकुर्यात्॥प्रातःअग्निंप्रतिष्ठाप्यान्वादध्यात्॥
प्रधानंलक्ष्मीःश्रीसूक्तेनप्रत्यृचंकमलैःपुनःघृताक्तपायसबिल्वफलद्रव्यैःप्रत्येकमष्टोत्तरश
तसंख्याकाहुतिभिर्लक्ष्मीमंत्रेणयक्ष्ये॥मंडलदेवताश्चाज्येन॥एवंहोमंकृत्वाचार्यंसंपूज्यपी
ठंगांदत्वाततःषोडशमिथुनानिचवस्त्रादिभिःसंपूज्यशूर्पेषोडशषोडशनानाविधभक्ष्याणि
चंदनताडपत्रपूगपर्णानिफलानिचनिक्षिप्यान्यशूर्पेणाछाद्यदद्यात्॥क्षीरोदार्णवसंभूता ५५

लक्ष्मीश्चंद्रसहोदरा॥व्रतेनानेनसंतुष्टाप्रीयतांविष्णुवल्लभा॥एवंषोडशाततःब्राह्मणान्सं
तर्प्याशिषोगृहीत्वाभुंजीत॥इतिमहालक्ष्मीव्रतंसमाप्तं॥ ॥इतिश्रीमतशंकरविरचितायां
व्रतोद्यापनकौमुद्यांअष्टमीव्रतानि॥अथनवमीव्रतानि॥तत्रचैत्रशुद्धनवम्यांरामनवमीव्रतं॥
॥स्कांदे॥तच्चपरविद्धायांमध्यान्हव्यापिन्यांकार्यं॥तिथ्यादिसंकीर्त्य॥आत्मनःअखिलपाप
क्षयपूर्वकचतुर्विधपुरुषार्थसिद्धिद्वारामप्रीत्यर्थमाचरितस्यरामनवमीव्रतस्यसांगतासिद्ध्यर्थंतदुद्या
पनंकरिष्ये॥ततःपूर्ववत्व्रताचार्यःसर्वतोभद्रस्थकलशोसाक्षतपूर्णपात्रेषट्कोणंपद्मंवि
लिख्यतन्मध्येहैमंरामंषडक्षरेणत्रयोदशाक्षरेणवामूलमंत्रेणमूलमंत्रस्तु॥श्रीरामरामेति
षडक्षरः॥श्रीरामजयरामजयजयरामइतित्रयोदशाक्षरः॥वैदिकस्तु॥भद्रोभद्रयासचमा

५९ नआगादिति॥ तद्रामतः हैमीं सीतां जनकात्मजां येन मइति नाममंत्रेण च प्रतिष्ठाप्य परितः षट्को
णेषु क्रमेण दशरथं कौशल्यां लक्ष्मणं भरतं शत्रुघ्नं मारुतिं च नाममंत्रैः प्रतिष्ठाप्य पुरुषसूक्तेन पूजये
त्॥ पुष्पोत्तरं अंगपूजा॥ श्रीरामभद्रा० पादौ० एवं सर्वत्र० राजीवलोचना० गुल्फौ० रावणांतकाय०
जानुनी० विश्वामित्रप्रियाय० नाभिं० परमात्मने० हृदयं० श्रीकंठाय० कंठं० सर्वास्त्रधारिणे० बा
हू० विश्वमूर्तये० मुखं० पद्मनाभाय० जिह्वां० दामोदराय० दंतान्० सीतापतये० ललाटं० ज्ञानग
म्याय० शिरः० सर्वात्मने० सर्वांग० नमस्कारमंत्रः॥ नमो देवाधिदेवाय रघुनाथाय शार्ङ्गिणे॥ चिन्म
यानंदरूपाय सीतायाः पतये नमइति॥ अर्घ्यमंत्रः॥ दशाननवधार्थाय धर्मसंस्थापनाय च॥ राक्षसा
नां विनाशाय दैत्यानां निधनाय च॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः॥ गृहाणार्घ्यं मया दत्तं ५९

भ्रात्रादिसहितो नघ इति॥ ततः पुराणपठणादिना रात्रिं निनयेत्॥ प्रातः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥
अत्र प्रधानं रामं आज्यपायसद्रव्येण प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः मूलमंत्रेण ज्ञानक्ष्मादिस
तदेवताः उक्तद्रव्येण अष्टाविंशतिसंख्याकाहुतिभिः ब्रह्मादिदेवताश्च एकैकया आज्याहुत्या यक्ष्ये॥ एवं
होमं संपाद्य आचार्यं संपूज्य प्रतिमां दद्यात्॥ तत्र मंत्रः॥ इमां स्वर्णमयीं रामप्रतिमां समलंकृतां॥ श्री
रामप्रीतये दास्ये प्रीतो भवतु राघवः॥ इति ततो व्रतपूर्तये गां च दद्यात्॥ ब्राह्मणांस्तदन्नेन संतर्प्य दक्षि
णादिभिः प्रतोष्य आशिषो गृहीत्वा इष्टजनैः सह भुंजीत॥ ॥इति रामनवमीव्रतं॥ अथ रामनामलेख
नोद्यापनविधिः॥ भविष्ये उमां प्रति महादेववचनं॥ रामनाम लिखेद्यस्तु लक्षकोटिशतावपि॥ एकै
कमक्षरं पातकनाशनं॥ प्राप्नोति परमां सिद्धिं दीर्घायुः पुत्रसंपदमिति तिथ्यादि संकीर्त्य आत्मनः अ

५८ नेकपातकक्षयपूर्वकसकलमनोरथावाप्तिद्वाराश्रीरामचंद्रप्रीत्यर्थंमयाचरितं यत्कोटिलक्षासुका
व्यपिरामनाम तत्संपूर्णतासिद्धयेतदुद्यापनाख्यंकर्मकरिष्ये॥ इतिसंकल्प्यपूर्ववत्व्रताचार्यः सर्वतो
भद्रस्थकलशेसाक्षतपूर्णपात्रेषोडशमाषात्मकराजतसिंहासनेसुवर्णस्य पलेनतदर्धार्धेनवानि
र्मितंरामंवामतः सीतांदक्षिणतः लक्ष्मणंपुरतः हनुमंतंचसौवर्णप्रतिमासुमूलमंत्रेणनाममंत्रेण
चआवाह्यपुरुषसूक्तेनपूजयेत्॥ परितः समपात्र्योपरिवारिपूर्णान्अष्टौकलशान्पूर्वादिक्र
मेणसंस्थाप्य॥ तेषुलोकेशान्तत्तन्मंत्रैरावाह्यपूजयेत्॥ ततः अग्निंप्रतिष्ठाप्यअन्वादध्यात्॥
अत्रलेखनदशांशेनदशांशेनवाहोमः॥ अत्रप्रधानं॥ रामंआज्यद्रव्येणलेखनदशांशेनदश
तांशेनवामूलमंत्रेणपरिवारदेवताः ब्रह्मादिदेवताश्चएकैकयाआहुत्यायक्ष्ये॥ एवंहोमंसमा ५८

प्यआचार्यंसंपूज्यपीठंदद्यात्॥ तत्रमंत्रः॥ सीतासौमित्रिहनुमत्युतंरामंसदक्षिणं॥ ददामिद्वि
जवर्यायरामोमेप्रीयतामिति॥ ततः व्रतपूर्तयेगांचदत्वाघृतपूरितकांस्यपात्रंलिखितपात्रंचय
थाशक्तिदशदानानिदत्वायोगिराजंषट्कत्रयंचअन्यानपिसन्सदन्नेनसंतर्प्यदक्षिणादिना
प्रतोष्यआशिषोगृहीत्वाइष्टजनैः सहभुंजीत॥ ॥इतिलेखनोद्यापनं॥ अथअदुःखनवमी
व्रतं॥ अथभाद्रशुक्लनवम्यांमुहूर्तमात्रेसत्वेपिपरयुतायांअदुःखनवमीव्रतं॥ स्कांदे॥ तिथ्या
दिसंकीर्त्यआत्मनः सकलदुःखनाशपूर्वकअभीष्टकामनासिद्धिद्वाराश्रीगौरीप्रीत्यर्थंअदुःखनव
मीव्रतंकरिष्ये इतिसंकल्प्यगोमयेनोपलिप्तभूमौवेदींगुडलिप्तांइक्षुछादितांअपूपासादितां
उपरिमंडपिकायुतांकृत्वातत्रपीठेगौरींनिर्मायतिनमादेव्याइतिनाममंत्रेणसंपूज्य॥ त्रिजागरणा

५९ दिनानयेत्॥ तद्दिने हिंसादिरहितं उपोषणं कार्यं॥ अशक्तश्चेत् दुग्धफलादि भक्ष्यं अत्यंताशक्तश्चे
त् हविष्याशी प्रातः देवीं संपूज्य सपत्नीकब्राह्मणं संपूर्णं हितवे॥ वाणकं द्विजवर्याय सहिरण्यं ददा
म्यहं॥ इति दत्वा देवीं विसर्ज्य पीठं दत्वा त्रिभ्योधिकान् द्विजां संतर्प्य भुंजीत॥ इति अदुःखनवमीव्र
तं॥ ॥इति नवमीव्रतानि समाप्तानि॥ अथ दशमीव्रतानि॥ अथ आशादशमीव्रतं॥ इति तत्र शु
भमासस्य यस्यां कस्यांचित् शुक्लदशम्यां आशादशमी हेमाद्रौ भविष्योत्तरे॥ तिथ्यादि संकीर्त्य आ
त्मनः अखिलमनोरथावाप्तिपूर्वकदशाशास्वरूपी परमेश्वरप्रीत्यर्थं अशादशमीव्रतं करिष्ये इति
संकल्प्य॥ नक्तं गोमयोपलिप्तगृहांगणे यवैः पिष्टकेन वाल्मीरूपाः दशाशास्वरूपाः पुतलिकाः
विलिख्य तत्र इंद्रादीन् आसुपवाहनादियुतान् तत्तन्मंत्रैर्नाममंत्रैर्वा संपूज्य घृताक्तं नैवेद्यं भक्ष्यभोज्या ५९

दियुतं दीपांश्च दथकूदथकूदापयित्वा कालोद्भवानि फलानि च समर्प्य प्रार्थयेत्॥ आशास्त्वाशाः
सदासंतु सिध्यंतां मे मनोरथाः॥ भवतीनां प्रसादेन सदा कल्याणतास्त्विता॥ ततः विप्रं संपूज्य
दक्षिणां दत्वा ब्राह्मणभोजनपुरःसरं स्वयं भुंजीत॥ अनेन क्रमयोगेन मासि मासि समाचरेत्॥
वर्षांते च कुरुश्रेष्ठ उद्यापनविधिं चरेत्॥ उद्यापनं करिष्ये इति संकल्प्य॥ व्रताचार्यः सर्वतो
भद्रब्रह्मादिदेवता आवाह्य तत्र अक्षतपुंजेषु सौवर्णाः रौप्या वा दशाशाः प्रतिमाः संस्थाप्य वक्ष्य
माणदशाभिः मंत्रैः संपूजयेत्॥ त्वयि सन्निहितः शक्रः सुरासुरनमस्कृतः॥ पूज्यौं संभुवनस्यास्य
ऐंद्रि दिग्देवते नमः॥१॥ अग्नेः परिग्रहावासे त्वमाग्नेयीति पठ्यसे॥ तेजोरूपा पराशक्तिः आग्नेयी
वरदा भव॥२॥ धर्मराजं समाश्रित्य लोकान्त्संमयसी यसो॥ तेन संयमनी चासि वरदा सं सदा भव॥३॥

७० खड्गहस्तासि विकृतासि नैर्ऋते निरुत्थानमाश्रिता ॥ तेमनिर्ऋतिनामासि त्वमाशां पूरयेस्व मे ॥४॥ त्वया स्त्रैभु
वनापाशे वरुणो यादसांपतिः ॥ कर्मार्थं मम धर्मार्थं वारुणी प्रवणा भव ॥५॥ अधिष्ठितासि यस्यास्त्वं
वायुना जगदायुना ॥ वायसे त्वमतः शांतिं नित्यं यच्छ ममालये ॥६॥ धनदेनाधिष्ठितासि प्रख्याता त्वद्
दोत्तरा ॥ निरुत्तराभवास्मासु दत्वा सद्यो मनोरथान् ॥७॥ देवेन जगदीशेन शंभुना त्वमलंकृता ॥ पूरय
स्व शुभे देवि वांछितानि नमोनमः ॥८॥ भुजंगाश्रकुलेन त्वं सेवितासि यतोह्यधः ॥ नागांगमनाभिः
सहितादिताभव मम साधवे ॥९॥ सर्वलोकोपरिगता सर्वदा त्वं शिवाय च ॥ सनकाद्यैः परिघृता द्यौस्त्वं
मां पाहि सर्वदा ॥१०॥ नक्षत्राणि च सर्वाणि ग्रहास्तारागणास्तथा ॥ नक्षत्रमातरो याश्च भूतप्रेतविना
यकाः ॥११॥ सर्वे मम हि सिध्यर्थं भवंतु प्रवणाः सदा ॥ एभिर्मंत्रैः संपूज्य ततः गीतवादित्रमंगलैः प ७०

तिपुत्रवतीभिस्त्रीभिः जागरद्भिः सह पुराणपठनादिना च निशां निनयेत् ॥ प्रातः स्नात्वा पूर्ववत्संपू
ज्य दशमिथुनानि वस्त्रादिना संपूज्य ॥ अभावे एकं वा संपूज्य तेभ्यो सौभाग्यद्रव्ययुतं वायनं दक्षि
णायुतं दत्वा आचार्यपीठं व्रतपूर्त्यै गां च दत्वा भक्ष्यभोज्यादिना ब्राह्मणान्संतर्प्य ॥ दक्षिणादि
ना प्रतोष्य सुहृन्मित्रादियुतः भुंजीत ॥ य एवं कुरुते पार्थ दशमीव्रतमादरात् ॥ सर्वान्कामानवा
प्नोति मनसो भीप्सितान्नरः ॥ ॥ इति आशादशमीव्रतं ॥ अथ दशावतारव्रतं ॥ भाद्रपदशुक्लदश
म्यां दशावतारव्रतं भविष्ये ॥ तच्च दशवर्षात्मकं ॥ दशम्यां प्रातः नद्यादौ स्नात्वा नित्यकर्म निर्वर्त्य
गृहं आगत्य संकल्पं कुर्यात् ॥ तिथ्यादि संकीर्त्य दशावतारं दशापरान्पुरुषान् आत्मानं च उद्धर्तुका
मः नथ्यथाश्वेनद्वीपवासपूर्वकनिरैतिशयानंदसुखावाप्तये च दशावतारस्वरूपी परमेश्वरप्री

७९ स्यर्थंदशावतारव्रतंकरिष्ये॥ इतिसंकीर्त्य॥ उक्तविधिनापुण्याहवाचनादिकृत्वानदीतीरेगृ
हेवागोमयोपलिप्तशुद्धभूमौचंदनादिनामत्स्यादिदशावतारप्रतिमाःलिखित्वाविष्णुमंत्रे
णप्रतिष्ठाप्यपुरुषसूक्तेनषोडशोपचारैःपूजयेत्॥ नैवेद्यादौविशेषः॥ गोधूमादिधान्यचू
र्णस्यस्वकृतप्रसृतित्रयंगृहीत्वातस्यत्रिंशत्पदार्थाःघृतपाचिताःवक्ष्यमाणसंज्ञिनःकर्त
व्याः॥ तत्रदशदेवायदशब्राह्मणायदद्यात्अनेनवर्षेवर्षेभिन्नकामकाः॥ प्रथमेपूरिकाः॥ द्वि
तीयेअपूपाः॥ तृतीयेअपूपकासाराः॥ चतुर्थेमोदकाः॥ पंचमेसाहोलिकाः॥ षष्ठेखंडवे
ष्टकाः॥ सप्तमेकोकरसाः॥ अष्टमेअर्कपुष्पनिभाः॥ नवमेकर्णवेष्टकाः॥ दशमेखंडकाः॥
एवंसंपूज्यनमस्कुर्यात्॥ मत्स्यंकूर्मंवराहंचनरसिंहंत्रिविक्रमंरामंरामंचकृष्णंचबौद्धंचै ७९

वसकल्किनं॥ गतोस्मिशरणंदेवंहरिंनारायणंविभुं॥ प्रणतोस्मिजगन्नाथंसमेविष्णुःप्रसीदतु॥
छिनत्तुवैष्णवींमायांभक्त्याप्रीतोजनार्दनः॥ श्वेतद्वीपंनयत्वस्मान्मयात्मासन्निवेदितः॥ ततःब्रा
ह्मणंसंपूज्यदक्षिणासहितंउक्तपदार्थदशकंदत्वातावन्मितंस्वयंमौनीभुंजीत॥ एवंदशवर्षंप्रति
भाद्रपदशुद्धदशम्यांकृत्वांतेउद्यापनंकुर्यात्॥ तद्यथा॥ पूर्वसंकल्प्यंउक्त्वाआचरितस्यदशावतार
व्रतस्यउद्यापनंकरिष्ये॥ इतिसंकल्प्य॥ शुचीन्मंत्रविदःदशद्विजान्वृत्वाअभावेएकंवावृत्वामधु
पर्कादिनासंपूजयेत्॥ ततःतेद्विजाःसर्वतोभद्रेउक्तविधिनाब्रह्मादिदेवतास्थापनपूर्वकंकलश
प्रतिष्ठांकृत्वातत्रहैमीदशप्रतिमाःमत्स्यादिदशावतारस्वरूपाःविष्णुःमंत्रेणतत्तन्मंत्रेणवाआ
वाह्यपुरुषसूक्तेनषोडशोपचारैःसंपूज्यपुराणस्तोत्रैःस्तुत्वाप्रणमेयुः॥ ततःयजमानःपूर्ववन्नि

७२ मंत्रितान्द्विजान्वस्त्रादिनासंपूज्यक्रमेणताःप्रतिमाःतेभ्यदक्षिणापुरःसरंदत्वाब्राह्मणान्संतर्प्य
शिष्टोगृहीत्वास्वयंभुंजीत॥ ॥इतिदशावतारव्रतं॥अथविजयादशमीव्रतं॥आश्विनशुक्लदशा
मीविजयादशमीसाचतारकोदयव्यापिनीग्राह्या॥तत्रकृत्यंभविष्ये॥गोपथब्राह्मणेच॥मंगलवा
द्यपुरःसरंसर्वजनाःभूषणावस्त्रादिधारिणःसीमांतंगत्वातत्रगणेशादिक्पालांश्चसंपूज्यत्॥
तत्रमंत्रः॥शमीशमीयतेपापंशमीलोहितकंटकी॥अमंगलानांशमनीशमनीदुष्कृतस्यच॥
दुःस्वप्ननाशनीधन्याशमींतांप्रणमाम्यहं॥करिष्यमाणयात्रायांयथाकालंसुखंमम॥तत्रनिर्वि
घ्नकर्त्रीत्वंभवश्रीरामपूजिते॥राजादयस्तु॥आत्मनिवासमनसान्यतोध्यात्वारिपुप्रकृतिंकृत्वातां
शरेणविध्वाब्राह्मणेभ्योदक्षिणादिदत्वाशमीमूलगतांआर्द्रांमृदंगृहीत्वाजयमंगलशब्देननर ७२

स्त्रीभिःनीराज्यमानःरथवाजिगजपदादीनांप्रेक्षाकौतुकमाचरन्॥सोत्साहःस्वयंगृहंविशेत्॥
॥ ॥इतिविजयादशमी॥अथदशादित्यव्रतं॥पाद्मे॥तत्रविधिः॥यदायस्मिन्कस्मिन्मासेशु
क्लपक्षेरविवासरेदशमीतदाकर्त्तव्यं॥प्रातःनद्यादौस्नात्वागृहंआमत्यसंकल्पंकुर्यात्॥तद्य
था॥तिथ्यादिसंकीर्त्य॥ममसमस्तपापक्षयपूर्वकपुत्रपौत्रसमुन्नतिधनधान्यगुणोत्कर्षप्राप्त्य
र्थंतथाइहजन्मनिजन्मांतरेवाज्ञानतोऽज्ञानतोवाकृततनुधास्थिभस्ममुसलसंमार्जनीलंघनकुमा
रीरजकीरजस्वलावियोनिपशुयोनिब्राह्मणीगुरुगर्भिणीगमनसंध्याकालपर्वकालपुण्यसम
यस्त्रीगमनपितृमातृत्यागस्वामिधर्मपत्नीत्यागादिषुकर्मजनितदुर्दशानिरसनार्थंशुभदशा
प्राप्त्यर्थंदशादित्यव्रतंकरिष्येइतिसंकल्प्यगणेशपूजनंपुण्याहवाचनंचकृत्वापीठेनिस्यचत्॥

७३ सूर्यआकृष्णेनेतिमंत्रेणआवाह्य॥ध्येयःसदासवितरितित्रिमूर्तिरूपिणंध्यात्वापुरुषसूक्तेनषो
डशोपचारैःपूजयेत्॥ततःदशादुर्दशादेवतापूजनं॥शुद्धभूमौकृष्णवर्णचूर्णेनमस्यादिनावा
दशपुत्तलिकाःविलिख्यवक्ष्यमाणदशनामभिक्रमेणआवाह्यतत्तंनाममंत्रैःषोडशोपचारैः
पूजयेत्॥दुर्दशानामानि॥दुर्मुखायैनमःदुर्मुखांआवाह०॥इतिसर्वत्र॥दीनवदनायै०॥मलि
न्यै०॥सत्यनाशिन्यै०॥सुबुद्धिनाशिन्यै०॥हिंस्रायै०॥दुष्टायै०॥मित्रविरोधिन्यै०॥उच्चाटनकारिण्यै०॥
बहुचिंताप्रदायिन्यै०॥दुर्दशायिन्यै०॥एवंसंपूज्य॥अनेनमंत्रेणविसर्जयेत्॥नित्यपापकरेपापे
देवद्विजविरोधिनि॥गच्छत्वंदुर्दशेदेविनीतिशास्त्रविरोधिनि॥ततःतत्पूजा॥भूमौगोमयेनउप
लेपयेत्॥स्वयंहस्तपादौप्रक्षाल्यआचम्यप्राणानायम्यतिथ्यादिसंकीर्त्यदशादित्यव्रतांगभू ७२

तदशादित्यदोरकपूजनंकरिष्ये॥इतिसंकल्प्य॥शुचौदेशेपंचरंगशोभितंअष्टदलंविलिख्यत
न्मध्येतंदुलराशिंकृत्वातदुपरिउक्तविधिनापूर्णपात्रयुतंतैजसंकलशंप्रतिष्ठाप्यतत्रकुंकुमाष्ट
दलयुतंवस्त्रंप्रसार्यतत्रदशतंतुमितंदशग्रंथियुतंदोरकंसंस्थाप्यदशग्रंथिषुवक्ष्यमाणदशनाम
भिःदेवतावाहनंक्रमेणकुर्यात्॥सूर्यायन०॥सूर्यंआ०॥एवंसर्वत्र॥धात्रे०॥अर्यम्णे०॥दिवाकराय०॥
भास्कराय०॥भानवे०॥सुवर्णरेतसे०॥तपनाय०॥हंसतुरगा०॥सवित्रे०॥आदित्याय०॥एतैरेवमंत्रैःषो
डशोपचारैःपूजयेत्॥पूजितंदोरकंपुरुषस्यदक्षिणकरेस्त्रियाः॥वामकरेबध्वा॥दशासुदशाःपू
जयेत्॥तत्रचंदनादिनाभित्तौपटेवादशपुत्तलिकाविलिख्यवक्ष्यमाणदशनामभिःआवाहयेत्॥
सुबुद्धिदायिन्यै०॥सुखकारिण्यै०॥सर्वसंपत्तिदायिन्यै०॥इष्टभोगदायिन्यै०॥लक्ष्मीदायिन्यै०॥कीर्ति

७४ दायिन्यै॰दुःखनाशिन्यै॰पुत्रदायिन्यै॰विजयायै॰धर्मदायिन्यै॰इतिआवाह्यप्राणप्रतिष्ठांकृत्वा॥
ततः॥विशुद्धदर्शनींदेवींवरदाभयदायिनीं॥ध्यायेद्दशादशांदेवींसर्वाभरणभूषितांइतिध्यात्वा॥
एतैर्नाममंत्रैःषोडशोपचारैःपूजयेत्॥ततःप्रार्थयेत्॥विशुद्धवसनेदेविस्थानेचात्रस्थिराभव॥इष्ट
भोगप्रदानायसमग्रंफलमाप्नुयां॥ततःवायनंदद्यात्॥तद्यथा॥दशफलान्वितंदशमोदकान्वि
तंवायनंसूर्येनिधायवस्त्रदक्षिणासहितंब्राह्मणपूजनपूर्वकंदद्यात्॥तत्रमंत्रः॥भास्करोबुद्धि
तोदाताद्रव्यस्थोभास्करःस्वयं॥भास्करस्तारकोभाभ्यांभास्करायनमोनमः॥ततःअन्यानपिब्रा
ह्मणान्भक्त्यावस्त्रादिनासंपूज्यव्रतपूर्तयेश्रोत्रियायकुटुंबिनेब्राह्मणायगांचदत्वासदन्नेनवि
प्रान्संतर्प्यआशिषोगृहीत्वादेवंक्षमापयेत्॥मंत्रहीनंक्रियाहीनंभक्तिहीनंचयन्मया॥पूजितो ७४

सिसुरेशानपरिपूर्णंतदस्तुमे॥ततःदुर्दशानाशनंविश्वरूपिणंभास्करंध्यात्वादोरकादिविसृज्य
तैलादिवर्जितंदशमोदकान्वितंमौनेनभोजनंकुर्यात्॥ ॥इतिदशादित्यव्रतं॥ ॥अथदशहराव्र
तंस्कांदे॥ज्येष्ठेमासिसितेपक्षेदशम्यांबुधहस्तयोः॥गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ॥दश
योगेनरःस्नात्वासर्वपापैःप्रमुच्यते॥इतिवराहपुराणे॥दशम्यांशुक्लपक्षेतुज्येष्ठमासेचजा
ह्नवी॥अवतीर्णायुतःस्वर्गान्हस्तर्क्षेचसरिद्वरा॥हरतेदशपापानितस्माद्दशहरास्मृता॥स्ना
नदानादिकंतस्यांअनंतफलदायकमिति॥इतिदशहराव्रतं॥ ॥इतिश्रीमत्पवित्रपावनकुला
ब्धिसंभवधारेइत्युपनामकबल्लालसूरिसूनुत्र्यंबकरविरचितायांव्रतोद्यापनकौमुद्यांदशमीव्रता
नि॥अथएकादशीव्रतानि॥अथनिर्जलैकादशीव्रतं॥तत्रज्येष्ठशुक्लैकादश्यांनिर्जलैकादशीव्र

७५ तं॥तद्विधिः॥स्कांदे॥ज्येष्ठमासिनृपश्रेष्ठयाशुक्लैकादशीभवेत्॥निर्जलंसमुपोष्यात्रजलकुं
भान्सशर्करान्॥प्रदायविप्रमुख्येभ्योमोदतेविष्णुसन्निधाविति॥तथाभारते॥भीमसेनंप्रति
व्यासवचनं॥वृषस्थेमिथुनस्थेवायाशुक्लाह्येकादशीभवेत्॥ज्येष्ठमासेप्रयत्नेनसोपोष्याजलवर्जि
ता॥उदयादुदयंयावत्वर्जयित्वाजलंनरः॥अप्रयत्नादवाप्नोतिद्वादशद्वादशीन्नृप॥ततःप्र
भातेविमलेद्वादश्यांस्नानमाचरेत्॥जलंसुवर्णंदत्वाचद्विजातिभ्योयथाविधि॥भुंजीतकृतकृ
त्यस्तुब्राह्मणैःसहितोवशी॥संवत्सरस्ययामध्येएकादश्योभवंत्युत॥तासांफलमवाप्नोतिना
त्रकार्याविचारणेति॥ ॥इतिनिर्जलैकादशीव्रतं॥ ॥अथशयन्येकादशीव्रतं॥अथाषाढ
शुक्लैकादश्यांशयन्येकादशीव्रतं॥ब्रह्मपुराणे॥एकादश्यांतुशुक्लायांआषाढेभगवान्हरिः॥ ७५

भुजंगशयनेशेतेयदाक्षीरार्णवेसदा॥तदातत्प्रतिमाकार्यासर्वलक्षणसंयुता॥कांचनीराजती
ताम्रीचारुपैत्तलिकीतथा॥पीतांबरधरासौम्यापर्यंकेस्वास्तृतेशुभे॥स्नापयित्वादधिक्षीर
घृतक्षौद्रजलैस्तथा॥उपचारैःषोडशकैःपूजयेत्परमेश्वरं॥तत्रमंत्रः॥सुप्तेत्वयिजगन्नाथज
गत्सुप्तंभवेदिदं॥विबुद्धेत्वयिबुध्येतजगत्सर्वंचराचरमिति॥रात्रौजागरणंकृत्वाप्रभातेदेवंसंपू
ज्य॥ब्राह्मणान्सदन्नेनसंतर्प्यकिंचिन्नियमान्मौनीभुंजीत॥एवमेवप्रबोधिन्यांसर्वंकार्यं॥
॥ ॥इतिशयन्येकादशीव्रतं॥अथगोपद्मव्रतं॥कार्तिकशुक्लैकादश्यांद्वादश्यांवाकार्यं॥भविष्ये॥
तिथ्यादिसंकीर्त्यआत्मनःयमदंडनिरसनपूर्वकपुत्रपौत्रसौभाग्याद्यभिवृद्धिद्वारागोपालप्रीत्यर्थं
पंचवर्षाचरितगोपद्मव्रतोद्यापनंकरिष्ये॥व्रताचार्यःसर्वतोभद्रस्थकलशोपरिहैमंचतुर्भुजंगोपालसं

७५ पूज्य इदं विष्णुरिति मंत्रेण प्रार्थयेत्॥ नमस्ते देवदेवेश नमस्ते गरुडध्वज॥ नमस्ते विष्णवे तुभ्यं व्रतस्य फ
लदायक॥ प्रातः अग्निं प्रतिष्ठाप्य अन्वादध्यात्॥ गोपालं पायसान्नतिलव्रीहियवद्रव्यैः प्रतिद्रव्यं
अष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्मादिदेवताश्च एकैकया आहुत्या यक्ष्ये॥ क्रमेण द्रव्याणां होम
मंत्राः॥ त्रीणि पदा॰ अतो देवा॰ इदं विष्णु॰ विष्णोर्नुकं॰ तत्सवितुर्व॰॥ ततः वायनं प्रतिवर्षक्रमे
ण सदैवत्रयस्त्रिंशत्संख्याकं दद्यात्॥ प्रथमे पायसं॥ द्वितीये मंडकान्॥ तृतीये माषवटकान्॥ च
तुर्थे अपूपान्॥ पंचमे लड्डुकान्॥ वायनमंत्रः॥ वायनं ते द्विजश्रेष्ठ ददामि व्रतपूर्तये॥ दक्षिणादि
संयुक्तं गोपाल प्रीयतामिति॥ ततः पंचमिथुनानि वस्त्रादिना संपूज्य आचार्याय गोमिथुनं च दद्या
त्॥ एवमेव लक्षणगोपद्मव्रतं हवनविशेषतदशांशेन शतांशेन वा पूर्वोक्तैः पंचद्रव्यैः मिलित्वा हव ७५

नं कार्यं वायनं अन्यत् समानं॥ ॥इति गोपद्मव्रतं॥ ॥अथ भीष्मपंचकव्रतं॥ कार्तिकशुक्लैकादश्यां
पंचदिनात्मकं॥ पाद्ये॥ तिथ्यादि संकीर्त्य॥ आत्मनः अखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतु
र्विधपुरुषार्थसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं भीष्मपंचकव्रतं करिष्ये॥ इति संकल्प्य॥ पश्चिमां संध्या
मुपास्य नदीतीरे गृहे वा चतुर्द्वारे पुरशोभितं मंडपे गोमयोपलिप्तवेदिकायां सर्वतोभद्रे प्रस्थतिलोप
रि पूर्णपात्रयुतकलशे वासुदेवं ॐ नमो भगवते वासुदेवायेति मंत्रेण संपूज्य अहोरात्रं दीपं पंचदी
नं दत्वा॥ मौनी अष्टशतं द्वादशाक्षरमंत्रं जप्त्वा अग्निं प्रतिष्ठाप्य ॐ विष्णवे स्वाहेति मंत्रेण अष्टोत्त
रशतं घृताक्ततिलव्रीहीन् हुत्वा स्वयं अंगुष्ठमात्रं गोमयं प्राश्य स्तोत्रपाठादिना रात्रिं निनयेत्॥
दिनपंचके होमादिकं समापनं॥ विशेषः प्रथमे द्विदलैः पादौ कमलैः पूजयेत्॥ स्वयं गोमयभक्षणं

७७ द्वितीये बिल्वपत्रैः जानुदेशं हरेः पूजयेत्॥ त्रिपलं गोमूत्रं स्वयं प्राश्य॥ तृतीये द्विनाभिश्रृंगारके
न पूजयेत्॥ पलत्रयं पयः प्राशनं॥ चतुर्थे द्वि बालबिल्वांकुरैः हरेः स्कंधौ पूं॰ पलत्रयं दधि प्राश्य
॥ पूर्णिमायां मालत्या द्विरः हरेः संपूज्य पलमात्रं सर्पिः प्राशयेत्॥ मलमंत्रेण पंचगव्यमंत्रैर्वा
पंचगव्यप्राशनं॥ अंते व्रतपूर्तये कपिलां गां दत्वा पीठं दत्वा पीठं दत्वा ब्राह्मणांस्तंतर्प्य स्वयं भुंजी
त॥ अथ प्रकारांतरेण भविष्योक्तं॥ पूर्वोक्तनियमान्वितः पूर्ववत् विष्णुं संपूज्य दक्षिणतः तिल
प्रस्थोपरि यमप्रतिमां लोहीं संपूज्य प्रार्थयेत्॥ यदन्यजन्मनि कृतं इह जन्मनि वा पुनः॥ पापं प्रश
मम यातु तव देवप्रसादतः॥ इति॥ पंचाहं पंचगव्याशी भीष्मायार्घ्यं वसुभ्यः स्वपि दद्यात्॥ अ
नेन मंत्रेण॥ वैयाघ्रपाद गोत्राय सांकृतिप्रवराय च॥ अपुत्राय ददाम्येतत् जलं भीष्माय वर्मणे॥ ७७

इति भीष्मपंचकव्रतं॥ ॥ अथ मार्गशीर्षकृष्णैकादश्यां वैतरणीव्रतं॥ भविष्योत्तरे॥ तिथ्या
दि संकीर्त्य॥ आत्मनः यमलोकादर्शनपूर्वकप्राप्तिकामनया परमेश्वरप्रीत्यर्थं वैतरणीव्रतं करि
ष्ये॥ वर्णात्मनं व्रतं॥ स्वयं नित्यकर्म निर्वर्त्य रात्रौ पूर्वाभिमुखीं कृष्णां सुरभिं संस्थाप्य॥ अग्रपादा
दारभ्य पश्चात्पादद्वयावधि गोपुच्छं समासाद्य पितृतर्पणं कृत्वा शास्त्रविधिना सुरभिं संपूजयेत्॥
गो अग्रपादाभ्यां नमः॥ अस्यायनमः॥ शृंगाभ्यां॰ स्कंधाय॰ पुच्छाय॰ पश्चिमपादाभ्यां सर्वांगे
भ्यो नमः॥ इति संपूज्य मार्गशीर्षादि मासचतुष्टये ॐदनं पुनः चैत्रादि यावकाशनं पुनः श्रावणा
दि पायसं॥ तदन्यत्रयो भागाः गोः गुरोः स्वार्थमेव च॥ एवं प्रतिमासं कृत्वा वर्षांते उद्यापनं कुर्यात्॥
सर्वोपस्करणयुतसारदारुमयशय्यायां सौवर्णीं सुरभिं आगावो रितिमंत्रेण संपूज्य सपत्नीकं ब्राह्म

७८ गंधस्त्रादिनासंपूज्यतत्सौभारपरिमितलोहेनसहशय्यायुतंदद्यात्॥तत्रमंत्रः॥यज्ञसाधनभूताया
विश्वस्याघौघनाशिनी॥विश्वरूपधरोदेवःप्रीयतामनयागवी॥ततःदक्षिणात्वेनहिरण्यंदत्वादीना
नाथांश्चतर्पयेदिति॥ ॥इतिवैतरणीव्रतं॥ ॥अथद्वादशनामस्थउमैकादशीव्रतोद्यापनं॥भविष्यो
त्तरे॥तिथ्यादिसंकीर्त्य॥आत्मनःअखिलपापक्षयपूर्वकविष्णुलोकप्राप्त्यर्थंएकादशीव्रतंकरिष्ये॥
कृतनित्यक्रियःमध्याह्नेसूर्यायार्घ्यंदत्वामंडलेकलशेहैमंकेशवंसंपूज्यरात्रौजागरणंकृत्वाप्रातःपं
चगव्यंप्राश्यब्राह्मणान्संतर्प्यप्रतिमांदत्वास्वयंभुंजीत॥एवमेवशुक्लैकादश्यांद्वादशमासेषुके
शवादिद्वादशनामानिक्रमेणतथाकृष्णैकादश्यांसंकर्षणादिद्वादशनामानिपूजायांजपादौज्ञेया
नि॥कार्त्तिकादिक्रमःमार्गशीर्षादिवाअंतेचतुर्विंशतिद्वादशएकांवागांदत्वायथाशक्तिब्राह्मणा ७८

न्भोजयेत्॥ ॥श्रीमत्तरांकर्याएकादशीव्रतानि॥अथभाद्रपदशुद्धद्वादशीव्रतं॥भविष्ये॥तत्र
एकादशीयुतद्वादश्यांश्रवणयोगेकार्यं॥बुधवारयोगेप्रशस्तं॥प्रातःनद्यादौ॥वरोवरेण्योवरद
दोवराहोधरणीधरः॥अपवित्रंपवित्रंमांकरोतुभगवान्हरिरित्यनेनतिलाचिलिप्यस्नात्वानित्य
कर्मनिर्वर्त्यसंकल्पयेत्॥तिथ्यादिसंकीर्त्यआत्मनःअखिलपापक्षयपूर्वकपिशाच्यादिदुर्योनि
निरसनद्वाराविष्णुलोकप्राप्त्यर्थंआचरितश्रवणद्वादशीव्रतोद्यापनंकरिष्ये॥इतिसंकल्प्य॥व्रता
चार्यःचतुर्द्वारोपशोभितमंडपांतर्वेदिकायांपीठदेवतापूजयेत्॥आधारशक्त्यै०विमलायै०
उत्कर्षिण्यै०ज्ञानलक्षितायै०क्रियायै०प्रह्व्यै०सत्यायै०मध्येयमोयायै०रमदेवतायै०परि
तःइंद्रादिलोकपालेभ्यःगणपतिंदुर्गांक्षेत्रपालंवास्तोष्पतिं॥परितःआदित्यादिनवग्रहदेवताभ्यः

७९ संपूज्य तदुपरि सर्वतोभद्रं प्रसार्य तत्र ब्रह्मादिदेवताः संपूज्य॥ तदुपरि कुशाः कृष्णाजिनं प्रसार्य
तत्र द्रोणपरिमिततिलपर्वतं कृत्वा तदलाभतः गोधूमाः तत्र तिलपूरितपूर्णपात्रयुतकलशे द्वाद
शारयुतपद्मे हैमं वामनं त्रीणि पदेति मंत्रेण संपूज्य॥ अंगपूजां कुर्यात्॥ मत्स्याय॰ पादौ॰ कूर्मा
य॰ जानुनी॰ वराहाय॰ गुह्यं॰ नृसिंहाय॰ नाभिं॰ वामनाय॰ उदरं॰ परशुरामा॰ दक्षिणभुजं॰
दाशरथीरामा॰ वामभुजं॰ कृष्णाय॰ मुखं॰ बौद्धाय॰ कर्णौ॰ कल्किने॰ शिरः॰ ॐ नमो भ
गवते वासुदेवाय सर्वांगं॰ दधिभक्तनैवेद्यं॥ प्रार्थयेत्॥ नमस्ते दितिपुत्राय नमस्ते कश्यपात्म
जा॥ त्रिविक्रमाय देवाय वामनाय नमो नमः॥ ततो न्यग्रोधं कद्रुद्रायेति मंत्रेण संपूज्य शिक्यं द
ध्यन्नेन युतं जलपूरितं करकं च संपूजयेत्॥ तत्र क्रमेण मंत्रौ॥ शिक्योसि दधिभक्तोसि लंबितोसि ७९

मयोपरि॥ सूत्रेणैव श्रितोसि त्वं वामनः प्रीयतामिति॥ करकं पूजयिष्यामि सरितां संगमे जलैः॥
पंचरत्नसमायुक्तं तेन तुष्यतु वामनः॥ ततः सर्वान् प्रार्थयेत्॥ पर्जन्यो वरुणः सूर्यः केशवः स
लिलं शिवः॥ वशाय मे वैश्रवणः सदा पापं हरोस्तु मे॥ कथाश्रवणादिना रात्रिं निनयेत्॥ ततः प्रा
तः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ वामनं पायसघृतसमितिलैः प्रतिद्रव्यं अष्टोत्तरशतसंख्याका
हुतिभिः पीठदेवताः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ होममंत्राश्च इरावतीति मंत्रेण
पायसं घृतं च इदं विष्णुरिति समित् त्रीणि पदेति आज्यं विष्णोः कर्माणीति तिलाः॥ ततः द्वादश सं
ख्याकान् विप्रान् वस्त्रादिना संपूज्य दध्यन्नउपवीतगोपीचंदनयुतान् सुगंधिजलपूरितान् द्वादश
करकान् तेभ्यः दद्यात्॥ तत्र मंत्रः॥ सुगंधिजलसंपूर्णं दधिभक्तयुतं द्विज॥ करकं ते प्रदास्यामि वाम

८० नःश्रीयतामिति॥ ततः वामनः प्रतिगृह्णातु वामनो वै ददाति च॥ वामनस्तारकोभाभ्यां वामनाय
नमो नमः॥ इत्यनेन सोपस्करं पीठं आचार्याय दत्वा व्रतपूर्त्यै गां दद्यात् द्विजान् भोजयेत्॥ ॥इति
श्रवणद्वादशीव्रतं समाप्तं॥ ॥पौषकृष्णद्वादश्यां सुरूपाद्वादशीव्रतं॥ भविष्ये॥ अथ त्रापौषे पु
ष्यऋक्षं यदा वा कार्यं॥ तिथ्यादि संकीर्त्य आत्मनः दौर्भाग्यदौर्गन्ध्यादिनाशनपूर्वक अतुलसौभा
ग्यपुत्रपौत्राद्यभिवृद्धिद्वारा श्रीविष्णुप्रीत्यर्थं सुरूपाद्वादशीव्रतं करिष्ये॥ व्रताचार्यः सर्वतोभद्र
स्थतिलोपरिस्थकलशे हैमं लक्ष्मीयुतं विष्णुं सहस्रशीर्षेति संपूज्य परितः॥ शंखं चक्रं गदा पद्मं
च संपूज्य विष्णवे अर्घ्यं दद्यात्॥ नमः परमशांताय विरूपाक्ष नमोस्तु ते॥ सर्वसंकष्टनाशा
य गृह्ण० ततः तिलमिश्रपक्वान्नेन नैवेद्यं दत्वा स्वयं उपोष्य जागरणादिना रात्रिं निनयेत्॥ प्रातः ८०

अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ विष्णुं गोमयतिलद्रव्यैः प्रतिद्रव्यं अष्टोत्तरशतसंख्याकाहुतिभिः
ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ श्वेतायाः एकवर्णाया वा गोः अंतरिक्षगतं गोमयं
ग्राह्यं तैर्निर्मितैः तिलाश्च अंगुष्ठार्ध आहुतिप्रमाणं॥ हवनमंत्राः॥ सहस्रशीर्षेति गोमयं व्याहृति
भिः तिलान् होमांते वैष्णवं श्राद्धं कृत्वा पीठं गां च दत्वा ब्राह्मणान् भोजयेदिति॥ अथवा रात्रौ होमादि
कं कृत्वा प्रातः स्वयं पारणं कुर्यात्॥ ॥इति सुरूपाद्वादशीव्रतं॥ ॥अथ आषाढशुक्लत्रयोदश्यां
जयापार्वतीव्रतं॥ भविष्ये॥ विंशतिवर्षात्मकपट्टदिनात्मकं त्रयोदशीमारभ्य ततीयापर्यंतं प्रत्य
हं देवं पूजयेत्॥ तिथ्यादि संकीर्त्य आत्मनः वैधव्यनाश अखंडसौभाग्यपुत्रपौत्रादिप्राप्तिद्वारा श्री
उमामहेश्वरप्रीत्यर्थं जयापार्वतीव्रतं करिष्ये॥ मंडले उक्तप्रकारेण कलशोपरि हैमसिंहोपरि सुवर्ण

८९ राजतनिर्मितौ उमामहेश्वरौ गौरीर्मिमायेनित सुरुचायेति मंत्राभ्यां संपूजयत्॥ सुवासिनीं सं
पूज्य स्वयं नक्तं कुर्यात्॥ स्वभक्षणनियमस्तु॥ पंचाब्दं याचनाद्यैः॥ पंचाब्दं लवणवर्जितमन्नैः॥
पंचाब्दं इक्षुरसवर्जितं तंदुलैः॥ पंचाब्दं सुखैः॥ पृथिकादंतकाष्ठं॥ व्रतांते पायसतिलाभ्यां अष्टो
त्तरसहस्रं हुत्वा विंशति मिथुनानि वस्त्रादिना संपूज्य पक्वान्नं सौभाग्यद्रव्ययुत वायनं सदक्षिणा
कं दत्वा व्रतपूर्त्यै आचार्याय गां च दत्वा सर्वरसयुतं स्वयं भुंजीत॥ ॥इति जयापार्वतीव्रतं॥॥
अथ भाद्रपदशुक्लत्रयोदश्यां गोत्रिरात्रव्रतं॥ भविष्ये॥ वर्षत्रयात्मकं॥ तिथ्यादि संकीर्त्य॥ सत्पु
त्रप्राप्तिपूर्वकसुखसौभाग्याद्यभिवृद्धिद्वारा लक्ष्मीनारायणप्रीत्यर्थं गोत्रिरात्रव्रतं करिष्ये॥
मंडले उक्तप्रकारेण सौवर्णं लक्ष्मीनारायणं पंचामृतपुरःसरं संपूज्य गां च आगावोरिति मंत्रे ८९

णसंपूज्य अहोरात्रं दिनत्रयं घृतदीपं दद्यात्॥ दिनत्रयं अर्घ्यदाने विशेषः॥ क्रमेण॥ बीजपू
रं॥ दाडिमं॥ नारिकेलं प्रसहं हविष्यान्नपूरितं करकं दंपतीभ्यां दद्यात्॥ पायसोपहारः॥ स्वयं
दिनत्रयं उपोषणं कार्यं॥ चतुर्थे द्विपीठं धेनुत्रयं एकां वा गां च तन्मौल्यं वा दत्वा ब्राह्मणभोजनः पुरः
सरं स्वयं भुंजीत॥ एवं चरित्वा अंते उक्तविधिना व्रताचार्यः मंडले देवं संपूज्य होमं कुर्यात्॥ तद्यथा॥
अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ लक्ष्मीनारायणं अष्टोत्तरशतसंख्याकाहुतिभिः पायसद्रव्येण इदं
विष्णुरिति मंत्रेण सुरभिं गां च आगावोरिति मंत्रेण पायसद्रव्येण अष्टोत्तरशतसंख्याकाहुतिभि
र्यक्ष्ये॥ ततः वेणुपात्रस्थनारिकेरद्राक्षाखर्जूरदाडिमबीजपूरसौभाग्यद्रव्ययुतं वायनं पूजनदक्षि
णापुरःसरं दंपतीभ्यो दद्यात्॥ सवत्सां गां सालंकारां आचार्याय दत्वा पीठं च॥ यथाशक्त्या ब्राह्मणा

८२ त्संतर्पयेत्॥ स्वयं भुंजीत॥ ॥इति गोत्रिरात्रिव्रतं॥ ॥अथाशोकत्रिरात्रव्रतं॥ भविष्ये॥ यस्मिन्क
स्मिन्मासे च योदश्यां शुभतिथौ कार्यं॥ तिथ्यादि संकीर्त्य॥ आत्मनः शोकदुःखादिनीशपूर्वक
अभीष्टफलप्राप्तिद्वारा सीतारामप्रीत्यर्थं अशोकत्रिरात्रव्रतं करिष्ये॥ मंडले राजताशोकवृक्ष
सौवर्णशिवसीतारामलक्ष्मणप्रतिमाः तत्तन्मंत्रैः संपूज्य अर्घ्यं दद्यात्॥ तत्र मंत्रः॥ अशोकवा
टिकामध्ये सीताया स्वप्रसादतः॥ अशोकसंपन्नफलो गृहाणार्घ्यं कृतं मया॥ गौर्या लक्ष्म्या त
थेंद्राण्या अरुंधत्या महेश्वर॥ त्वं समाराधितः पूर्वं अशोकफलदो भव॥ शिवस्य॥ रावणस्य व
धार्थाय उत्पन्नस्त्वं महीतले॥ विष्णोरंशोसि देवेश॥ गृ०॥ रामस्य॥ तातभुक्त्युन्मुखं वीरं धन्वायो
नुययौ रनं॥ सौमित्रेय महाभागा गृ०॥ लक्ष्मणस्य॥ अवनीतलसंभूते सीते सर्वांगसुंदरि॥ गृहा ८२

णार्घ्यं मया दत्तं पूज्ये जनकनंदिनि॥ ततः प्रार्थयेत्॥ अशोकः शोकहर्ता त्वं शोकं नाशय मे प्रभो
॥ मातृपितृपतीनां च श्वश्रुश्वशुराणां तथैव च॥ अशोकस्त्वं शोकहरो भव सर्वत्र नः कुले॥ एवं त्रिरा
त्रं चरित्वा॥ अंते व्रतपूर्त्यै गां च दद्यात्॥ ॥इति अशोकत्रिरात्रव्रतं॥ ॥अथ कार्तिकादिमासे शुक्ल
योदश्यां प्रतिदोषव्रतं॥ ॥वर्षात्मकया वज्जीवं वा॥ शनियोगे महाफलं॥ भौमयोगे ऋणमो
चनं॥ तिथ्यादि संकीर्त्य॥ आत्मनः अखिलपापक्षयशत्रुपराजयपूर्वक आयुरारोग्यैश्वर्यपुत्रपौ
त्राद्यभिवृद्धिद्वारा उमामहेश्वरप्रीत्यर्थं आचरितप्रदोषव्रतोद्यापनं करिष्ये॥ व्रा॥ ताचार्यः उक्तप्र
कारेण लिंगतोभद्रस्थ ताम्रकलशोपरि पूर्णपात्रयुते सौवर्णां सांबसदाशिवं पुरतः राजतं वृषभं
तत्तन्मंत्रैः प्रतिष्ठाप्य॥ परितः॥ असितांगभैरवाय नमः॥ रुरुभैरवा०॥ चंडभैरवाय०॥ क्रोधभैर

८२ वाय० उन्मत्तभैं० भीषणभैं० संहारभैं० कपालभैं० प्रतिष्ठाप्य पूजयेत्॥ मूलमंत्रेण न्यासं कृत्वा
पंचब्रह्ममंत्रैः पूजयेत्॥ सद्योजातादि प्रकारांतरेण पूजनं॥ विष्णुं॥ ब्रह्माणं॥ भास्करं॥ सोमं॥
पूर्वादिक्रमतः॥ प्रथमावरणे॥ द्वितीये॥ जयं॥ विजयं॥ गणपतिं॥ दुर्गां॥ तृतीये॥ नंदीशं॥ क्षेत्र
पालं॥ वास्तोष्पतिं॥ वायुं॥ चतुर्थे॥ सप्तऋषीन्॥ पंचमे॥ भूतनाथं॥ षष्ठे॥ इंद्रादीन्॥ सप्तमे॥
कपालिनं॥ अष्टमे॥ गंधर्वान्॥ सद्योजातेति आसनं॥ वामदेवायेति पाद्यं॥ अघोरार्थ्यर्घ्यं॥ त
त्पुरुषायेति आचमनीयं॥ ईशानायेति स्नानं॥ त्र्यंबकेति वस्त्रं॥ यज्ञोपवीतिति उत्तरीयं॥ नमः सोमा
येति गंधं॥ नमः शंभवेति अक्षतान्॥ इमारुद्रायेति पुष्पं॥ एवापित्रेति बिल्वदलानि॥ मानस्तोके
ति धूपं॥ आतेपितरिति दीपं॥ स्वादनेति नैवेद्यं॥ कद्रुद्रायेंति तांबूलं॥ इमारुद्रायस्थिरधन्वनेति द ८२

क्षिणां॥ सहिरण्येति मंत्रपुष्पं॥ यातेदिधुनेति नमस्कारः॥ पुनः नाममंत्रैः अष्टौ प्रदक्षिणाः नम
स्कांश्च कुर्यात्॥ भवाय० महादेवाय० रुद्राय० नीलकंठाय० शशिमौलिने० उग्राय० भीमाय०
ईशानाय० ततः अर्घ्यं० रजतादि पात्रे क्षीरघृतदधितंदुलसिद्धार्थगंधपुष्पाणि क्षिप्त्वा सजलं
दद्यात्॥ भयरोगादिदारिद्र्यपापक्षुदपमृत्यवः॥ त्रणशोकमनस्तापा नश्यंतु मम सर्वदा॥ इत्य
नेन त्रिवारं अर्घ्यं दद्यात्॥ ततः प्रार्थयेत्॥ प्रसीद देवदेवेश प्रसीद परमेश्वर॥ प्रसीद सोम सर्वज्ञ प्र
सीद करुणाकर॥ ततः ब्राह्मणान्संपूज्य रात्रिं निनयेत्॥ प्रातः अग्निं प्रतिष्ठाप्य॥ ॥ अन्वादध्या
त्॥ ॥ उमामहेश्वरं पलाशसमित्बिल्वपत्रपायसआज्यद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहु
तिभिः पीठदेवताः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ ततः पीठं गां च दत्वा ब्राह्मणान्भो

८४ जयेदिति॥ ॥इति प्रदोषव्रतं समाप्तं॥ ॥आत्मनः दुर्भगत्वे वंध्यात्वमृतवंध्यात्वादिदोषनिरस
नपूर्वकसौभाग्यपुत्रपौत्रसुखप्राप्तिद्वारा अर्धनारीश्वरमहेश्वरप्रीत्यर्थं अनंतगत्रयोदशीव्रतं
करिष्ये॥ इति संकल्प्य॥ उक्तविधिनी पीठे अनंतगरूपिणं महेशं पूजयेत्॥ विशेषः लिख्यते॥
सर्वमासेषु त्रयोदश्यां उपोषणं॥ मार्गशीर्षे मल्लिकादंतकाष्ठं नीरीगेण अर्घ्यं॥ अनंगो देवः॥ नै
वेद्यं फणिकाः॥ श्वेतपुष्पं॥ मधुप्राशनं॥ रात्रौ जागरणं॥ प्रातः ब्राह्मणसुवासिनीभोजनपुरः
सरं स्वयं भुंजीत॥ पौषे॥ उदुंबरदंतकाष्ठं॥ पुष्पं॥ दाडिमेनार्घ्यं॥ नाट्येश्वरो देवः॥ वटकनैवेद्यं॥
चंदनभक्षणं॥ माघे॥ विष्णुकांताजातिकाष्ठं॥ कुंदपुष्पं॥ बीजपूरेणार्घ्यं॥ शर्करा नैवेद्यं॥ योगे
श्वरो देवः॥ मौक्तिकभक्षणं॥ फाल्गुने॥ करंकाष्ठं॥ पद्मपुष्पं॥ खजुरीफलेनार्घ्यं॥ पयो नैवेद्यं॥ ८४

वीरेशो देवः॥ नारिकेलभक्षणं॥ मल्लिकाकाष्ठं॥ दमनकपुष्पं॥ दमनकेनार्घ्यं॥ खर्जूरी नैवेद्यं॥
विश्वरूपो देवः॥ कपूरभक्षणं॥ वैशाखे॥ अपामार्गकाष्ठं॥ मल्लिकाकाष्ठं॥ तेनैवार्घ्यं॥ नैवेद्यं
अपूपाः॥ महारूपो देवः॥ जातिफलभक्षणं॥ ज्येष्ठे॥ सहदेवीकाष्ठं॥ बुकुलपुष्पं॥ श्रीफलेना
र्घ्यं मंडकनैवेद्यं॥ लवंगभक्षणं॥ प्रद्युम्नो देवः॥ आषाढे॥ नारिंगकाष्ठं॥ कदंबुपुष्पं॥ नारिकेला
र्घ्यं॥ नैवेद्यं दधि॥ उमापतिर्देवः॥ तिलबीजभक्षणं॥ श्रावणे॥ जातिकाष्ठं॥ पद्मपुष्पं॥ जंबूफ
लेनार्घ्यं॥ क्षीरसारं नैवेद्यं॥ शूलपाणिर्देवः॥ गंधोदकभक्षणं॥ भाद्रे॥ कक्कोलकाष्ठं॥ चंपकपु
ष्पं॥ दाडिमार्घ्यं॥ पूगी नैवेद्यं॥ सद्योजातो देवः॥ अगरुभक्षणं॥ आश्विने॥ कंकतीकाष्ठं॥ कर
वीरपुष्पं॥ कर्कटीफलेनार्घ्यं॥ त्रिदशाधिपो देवः॥ शुभ्रमंडकनैवेद्यं॥ कनकांबुप्राशनं॥ का

८५ त्रिके॥ कदंबकाष्ठं॥ रक्तोत्पलपुष्पं॥ कूष्मांडार्घ्यं॥ पूरिकानैवेद्यं॥ जगदीश्वरो देवः॥ मदनफल
भक्षणं॥ सर्वत्र प्रदोषे पूजनं भक्षणं च॥ एवं चरित्वा अंते उद्यापनं कुर्यात्॥ व्रताचार्यः लिंगतो
भद्रस्थकलशे सौवर्णअर्धनारीश्वरं महेशं संपूजयेत्॥ प्रातः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥
महेशं पायसद्रव्येण अष्टोत्तराधिकसहस्रं अष्टोत्तरं वा तत्संख्याकाहुतिभिः ब्रह्मादिदेवताश्च
एकैकयाज्याहुत्या यक्ष्ये॥ ततः छत्रोपानदुदकमं॰ उलुभाजनवस्त्रपुरःसरं आचार्यं संपूज्य॥ त
द्वत् द्वादश अष्टौ चत्वारि वा दंपती संपूज्य पीठं गां च आचार्याय दत्वा॥ ब्राह्मणभोजनपुरःसरं स्वयं
भुंजीत॥ ॥इति अनंगत्रयोदशीव्रतं॥ वैशाखशुक्लचतुर्दश्यां प्रदोषव्यापिन्यां नृसिंहजयंतीव्र
तं॥ स्वातिनक्षत्रशनिवारसिद्धियोगवणिजकरणयोगे महापुण्यदं॥ तिथ्यादिसंकीर्त्य॥ आत्म ८५

नः अखिलपापक्षयपूर्वकशत्रुजयसुखधनावाप्तिद्वारा श्रीनृसिंहप्रीत्यर्थं आचरितनृसिंह
जयंतीव्रतोद्यापनं करिष्ये॥ व्रताचार्यः सर्वतोभद्रस्थकलशे हैमं लक्ष्मीनृसिंहं ॐ नमो नृसिं
हायेति मूलमंत्रेण गायत्र्या वा प्रतिष्ठाप्य॥ उक्तविधिना संपूज्य॥ प्रातः अग्निं प्रतिष्ठाप्यान्वा
दध्यात्॥ लक्ष्मीनृसिंहं विष्णोर्नुकमिति मंत्रेण अतो देवेति वा अष्टोत्तरशतं तिलपायसाज्या
हुतिभिः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ ततः पीठं व्रतपूर्तये गां च आचार्याय दत्वा
ब्राह्मणान् भोजयेदिति॥ ॥इति नृसिंहजयंतीव्रतं॥ ॥अथ भाद्रपदशुक्लचतुर्दश्यां अनंत
चतुर्दशीव्रतं॥ चतुर्दशवर्षात्मकं यावज्जीवं वा॥ तच्च त्रिमुहूर्तोदयव्यापिन्यां कार्यं॥ तिथ्यादिसं
कीर्त्य॥ आत्मनः निखिलपापनिर्मुक्तिपूर्वकउत्तमसिद्धिपुत्रपौत्रपूरितविविधभोगधनधान्य

८५ परमगतिप्राप्तिकामनयाचतुर्दशवर्षाचरितानंतव्रतोद्यापनंकरिष्ये॥इतिसंकल्प्य॥नित्यवत्
स्वयंदेवंसंपूजयेत्॥ततःव्रताचार्यःसर्वतोभद्रेब्रह्मादिदेवताआवाह्यतदुपरिकलशंप्रतिष्ठाप्य॥
तत्रयमुनांआवाह्य॥श्रीसूक्तेननाममंत्रेणवासंपूज्यतदुपरिअक्षतपूरितपूर्णपात्रंनिधाय॥त
त्राष्टदलंविलिख्यतत्रस्वर्णनिर्मितचतुर्दशग्रंथियुतानंतंसहस्रशीर्षेतिमंत्रेणस्थापयेत्॥स्वर्णदो
रकप्रतिमयोःपुरुषसूक्तेनश्रीमदनंतायनमइतिनाममंत्रेणवापूजावार्षिकवत्कार्या॥अथग्रं
थिदेवताःपूजयेत्क्रमेण॥विष्णुः।अग्निः।आदित्यः।सहस्राक्षः।पितामहः।इंद्रः॥पिनाकी।वि
घ्नेशः।स्कंदः।सोमः।वरुणः।पवनः।पृथ्वी।वसवः।ततः।शय्यायांप्रतिमायाः।परितः।शंखं।
चक्रं।गदां।पद्मं।तद्बहिः।नाममंत्रेण।अनंतं।कपिलं।दक्षं।मनुं।प्रजापतिं।संकर्षणं।कालं।व ८५

नमालिनं॥त्रिविक्रमं।अहोरात्रं।अर्धमासं।मासं।ऋतून्।अयनं।वत्सरं।परिवत्सरं।इदुवत्सरं।
अनुवत्सरं।संवत्सरं।प्रजाध्यक्षं।अजितं।सर्वभूतं।प्रद्युम्नं।अनिरुद्धं।श्रीधरं।पुरुषोत्तमं।वामनं॥
पद्मनाभं।विश्वरूपं।त्रिविक्रमं।कृष्णं।अच्युतं।तद्बहिः।इंद्रादीन्।तद्बहिः।अष्टवसून्।तद्बहिः।
एकादशरुद्रान्।तद्बहिः।द्वादशादित्यान्।तद्बहिः।आदित्यादिनवग्रहान्॥तद्बहिः॥अष्टभैरवा
न्।तद्बहिः।मेषादिद्वादशराशीन्।तद्बहिः।अश्विन्यादिनक्षत्राणि॥तद्बहिः॥ब्राह्म्यादिसप्तमा
तृः॥तद्बहिः॥चैत्रादिद्वादशमासान्॥तद्बहिः॥दीप्तादिशक्तीः॥तद्बहिः॥विष्कंभादियोगान्॥
आवाह्यपीठपरितःपक्वान्नपूरितान्चतुर्दशकुंभान्चतुर्दशनाममंत्रैःसंस्थापयेत्पूजयेच्चाते
चमात्राः।अनंताय०।संकर्षणाय०।कालाय०।शेषा०।वासुदेवा०।विश्वनाथाय०।विश्वरूपाय०।

८७ पद्मनाभाय०दामोदराय०जगन्नाथाय०चतुर्भुजाय०श्रीकंठाय०केशवाय०सर्वात्मने०ततः पु
ष्पपूजोत्तरं कलशस्थापनोक्तचतुर्दशनामभिः।अंगानि पूजयेत्।अनंताय०पादौ०संकर्षणाय०
गुल्फौ०कालाय०जंघे०शेषाय०जानुनी०वासुदेवाय०ऊरू०विश्वनाथाय०गुह्यं पू०विश्वरू
पाय०कटिं०पद्मनाभाय०नाभिं पू०दामोदराय०उदरं०जगन्नाथाय०हस्तद्वयं०चतुर्भुजाय०
बाहून्०श्रीकंठाय०कंठं०केशवाय०ललाटं०सर्वात्मने०शिरः पू०अनंताय०सर्वांगं०ततः न
मस्ते देवदेवेश नमस्ते धरणीधर।नमस्ते सर्वनागेंद्र अनंताय नमो नमः॥ ॥इति नमस्कारः॥ ॥
ततः प्रार्थयेत्॥अनंत कामान्मे देहि सर्वकामफलप्रद॥अनंतकौमोने यन मस्तन्य पुत्रपौत्रा
न्समर्पय॥व्रतेनानेन सुप्रीतो भव त्विह सदा मम॥ततः पुराणपठनादि रात्रिं निनयेत्॥प्रातः॥अ ८७

आ ग्निं प्रतिष्ठाप्याद्याद्यात्॥अत्र प्रधानं॥श्रीमदनंतं॥अश्वत्थसमित्तिलव्रीहियवघृतपायसद्र
व्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः॥पीठदेवता आवर्णदेवताश्च एकैकयाज्याहुत्या
वा ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥स्थापनमंत्रैर्होमः॥केचन दिवैव होमं इच्छंति॥
प्रातः॥ब्राह्मणभोजनमात्रं॥दिवैवा सर्वं॥ततः पीठं संपूज्य वस्त्रादिना आचार्यं च संपूज्य पीठं द
द्यात्॥तत्र मंत्रः॥प्रतिगृह्य द्विजश्रेष्ठ समस्तव्रतफलप्रदायक॥त्वत्प्रसादादहं विप्र विमुच्येत भव
बंधनात्॥अनंतः प्रतिगृह्णाति अनंतो वै ददाति च॥अनंतस्तारको भाभ्यां अनंताय नमो नमः॥
ततः पूर्वेद्युः निमंत्रितान्चतुर्दश ब्राह्मणान्वस्त्रादीना संपूज्य स्थापित चतुर्दश कलशान्पक्वान्ना
दिपूरितान्दक्षिणासहितान्तेभ्यः प्रतिगृह्येति मंत्रेण मंत्रेण मंत्राभ्यां दद्यात्॥व्रतपूर्तये गां च द

८८ त्वाक्षमापयेत्॥ क्रियाहीनंभक्तिहीनंद्रव्यहीनंतथैवच॥ मंत्रहीनंकृतंयच्च परिपूर्णंतदस्तुमे॥ त
तः ब्राह्मणभोजनपुरःसरंस्वयंभुंजीत॥ ॥इतिअनंतचतुर्दशीउद्यापनं॥ ॥अथकदली
व्रतोद्यापनं॥ तत्रभविष्ये॥ ज्येष्ठशुक्लचतुर्दश्यांउक्तं॥ तत्रैवपुनःकार्तिकेमाघेचैत्रेवैशाखेवाकार्यं॥
अथवाअस्तादिरहितेपुण्यमासेपौर्णमास्यांवाकार्यं॥ स्कांदेतु॥ ज्येष्ठशुक्लत्रयोदश्यांउक्तंतत्रैव
त्रिदिनंउपोष्यपौर्णमास्यांअधिवासनंउक्तंचतत्रैव॥ यस्मिन्देकदलीनभ्यतेतदासुवर्णकद
लीकृत्वाविधिनापूजाहोमादिकंकृत्वादद्यादितिउक्तं॥ ॥अथप्रयोगः॥ ॥तत्रव्रतीपूर्वेद्युःए
कभक्ताशीनक्ताशीवाद्वितीयेह्निप्रातःस्नात्वापंचगव्यंप्राश्यसंकल्पंकुर्यात्॥ तिथ्यादिसंकी
र्त्यआत्मनःइहजन्मनिजन्मांतरेवासौभाग्यारोग्यपुत्रपौत्रान्नलक्ष्मीवृद्धिसर्वदुःखनाशनपूर्व ८८

कउमामहेश्वरपदप्राप्तिकामःकदलीव्रतोद्यापनंकरिष्ये॥ इतिसंकल्पयेत्॥ यदाज्येष्ठादिद्वा
दशमासेषुउक्तंपूजादिकंनकृतंतदाउद्यापनदिनेआदौक्रमेणपूजादिकंकुर्यात्॥ कदल्याः
आलवालंकृत्वाउपरिमंडपंचतुर्द्वारंकृत्वापूजयेत्॥ तत्रज्येष्ठेजातीदंतकाष्ठं॥ गौरीतिकदलीना
म॥ पाटलपुष्पं॥ कदल्यैकामदायिन्यैमेधायैचनमोनमः॥ रंभायैभूतसारायैसर्वसौख्यप्रदेन
मः॥ सर्वमासेषुअयंपूजामंत्रः॥ एवंषोडशोपचारैःसंपूज्यउत्तमोदकेनासिंचेत्॥ तत्रमंत्रः॥ य
थारंभेविवृद्धिस्तेशाखादीनांसदाभवेत्॥ यथावर्द्धयमांदेहिसेचनात्पार्वतीप्रिये॥ ततःप्रार्थये
त्॥ यथायथाहिप्रसवोवर्द्धतेकदलीतव॥ तथामनोरथानांमेप्रभवोभवतुस्वयं॥ आषाढे॥ क्रमे
णदंतकाष्ठंकदलीनामपुष्पंचज्ञेयं॥ करंजं॥ ईश्वरी॥ बिल्वपत्रं॥ श्रावणे॥ कुमुदं॥ भाद्रे॥ पुत्रिका॥

८५ कदंबः॥आश्विने॥मालती॥अतुला॥जाती॥कार्त्तिके॥शतपत्रं॥कार्त्तिः॥शतपत्रं॥मार्गशी
र्षे॥पंचकं॥मार्गदायिनी॥पंचकं॥पौषे॥कमलं॥पुष्टिकरी॥कमलं॥माघे॥दाडिमं॥माहेश्व
री॥दाडिमं॥फाल्गुने॥मधुकं॥मदोत्कट॥मधुकं॥चैत्रे॥मल्लिका॥वैशाखे॥अपामार्गं॥विमला॥ब
हुविधपुष्पाणि॥द्वादशमासेषु॥क्रमेण धूपाः॥नैवेद्याश्च॥चंदनं॥कर्पूरं॥गुग्गुलं॥काश्मीरं॥देवदा
रु॥अगरु॥दशांगं॥गुग्गुलं॥देवदारु॥गोरोचनं॥मेषशृंगं॥वटकाः॥उदुंबरं॥अपूपं॥मोदकं॥
मंडकं॥पायसं॥घृतोदनं॥मुक्तचूर्णं॥सोहोलिका॥खंडवेष्टिका॥फणिका॥दध्योदनं॥एवं संपूज्य संपू
जयेत्॥ततः ब्रताचार्यः कदलीमूलदेशे मदा वेदीं विधाय॥तत्र लिंगतोभद्रे उक्तविधिना ब्रह्मादि
देवता आवाह्य तदुपरि कलशं स्थापयित्वा पूर्णपात्रे हैमं शिवं गौरीं च त्र्यंबकमिति कद्रुद्रायेति वा गौरीर्मिमा ८९

येति च ताभ्यां आवाहनं ताभ्यां प्रतिष्ठाप्य पूजयेत्॥पुरतः वृषभं राजतं ततः कदलीं पूजयेत्॥कदल्यै
कामदायिन्यै इत्यनेन॥कदलीपरितः लोकपालान् आवाहयेत्॥ततः तैलहारिद्रादिना मंगल
स्नानं कृत्वा स्त्री भूषणैर्भूषयित्वा आवाहनाद्युपचारैः संपूजयेत्॥पुरतः आदर्शं चामरं छत्रं उप
रिपूरिका वंधनं परितः इक्षुदंडवेष्टनं कदल्याश्चतुर्दिक्षु गुडपिष्टचलं॥नीरकं॥लवणं॥शुंभाक्ष
ताः॥ततः पुराणपठनादिना यत्रिंनिनयेत्॥प्रातः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥शिवं गौरीं कद
लीं च पलाशसमित् मधुसर्पितिलव्रीहिद्रव्यैः प्रत्येकं अष्टोत्तरसहस्रं अष्टोत्तरशतं अष्टाविंशति
वा तत्संख्याका हुतिभिः ब्रह्मादिदेवताश्च एकैकया ज्याहुत्या यक्ष्ये॥क्रमेण होममंत्राः॥कद्रु
द्राय॰॥गौरीर्मिमाय॰॥ॐ ह्रां ह्रीं क्लीं कामिन्यै विद्महे त्रैलोक्यक्षोभिण्यै धीमहि॥तन्नः कदली

९० प्रोक्ष्योदपात् ततः उमारुद्रपूजां कृत्वा प्रार्थयेत् उमागौरी नमस्तुभ्यं नमस्ते विश्वधा
रिणे परमानंदरूपिण्यै कदल्यै तेन मो नमः ततः चतुर्विंशति षोडशाष्टौ वा
यथाशक्ति वा मिथुनानि वस्त्रादिना संपूज्य वंशपात्रस्थं सौभाग्यद्रव्ययुत
फलदक्षिणादियुतं वायनं दद्यात् ततः आचार्यं संपूज्य पीठं कदलीं च दद्यात्
तत्र मंत्रः कदली कामदा चैव सर्वसौख्यप्रदायिनी गिरिजाहररूपं वै ब्राह्मणाय ददा
म्यहं॥ प्रतिगृह्ण द्विजश्रेष्ठ समस्तफलदायक॥ कदल्याश्च प्रदानेन पूर्णाः संतु मनोरथाः॥ कद
लिं प्रतिगृह्णाति कदलीं वै ददाति च॥ कदलीतीरकान्चैव कदल्यै तेन मो नमः॥ कदलीदान सं ९०

गतासिध्यर्थं हिरण्यं दक्षिणां वेन दद्यात्॥ व्रतपूर्तये गां च दत्वा अन्यान् ब्राह्मणान् दक्षिणादिभिः
प्रतोष्य ब्राह्मणान् सदन्नेन संतर्प्य आशिषो गृहीत्वा स्वयं भुंजीत॥ ॥इति कदलीव्रतोद्यापनं॥ ॥
अथ वैकुंठचतुर्दशीव्रतं॥ कार्तिकशुक्लचतुर्दश्यां अरुणोदयव्यापिन्यां कार्यं॥ तिथ्यादि संकी
र्त्य॥ आत्मनः अशेषपापक्षयपूर्वक शिवपदप्राप्तिकामनया चरितवैकुंठचतुर्दशीव्रतोद्याप
नं करिष्ये॥ व्रताचार्यः लिंगतोभद्रस्थकलशे हैमं विश्वेश्वरं संपूज्ययेत्॥ प्रातः घृताक्ततिलैः
अष्टोत्तरशतं॥ ॐ नमः शिवायेति मंत्रेण कृत्वा व्रतसंपूर्तये गां च दद्यादिति॥ ॥इति वैकुंठचतु
र्दशीव्रतं॥ ॥अथ शिवरात्रिव्रतं॥ चतुर्दशवर्षात्मकं यावज्जीवं वा॥ माघकृष्णचतुर्दश्यां नि
शीथव्यापिन्यां कार्यं॥ तिथ्यादि संकीर्त्य॥ आत्मनः सर्वपापक्षयपूर्वकं अक्षयभोगमोक्षप्रा

९१ स्वर्थं आचरितशिवरात्रिव्रतोद्यापनं करिष्ये॥ ततः व्रताचार्य। अन्यैर्द्वादशब्राह्मणैः सहपू
जामारभेत्॥ द्वादलिंगतोद्भवे पीठे उक्तविधिना ब्रह्मादिदेवताः संपूज्य द्वादशलिंगेषु द्वाद
शकलशान्॥ मध्ये एकं तदुपरि पूर्णपात्राणि निधाय तत्र प्रतिमाः हैमीः पूजयेत्॥ तत्र
मध्यकुंभे उमामहेश्वरं त्र्यंबकमंत्रेण प्रतिष्ठाप्य पुरतः राजतं वृषभं च प्रतिष्ठापयेत्॥ ततः
द्वादशब्राह्मणा द्वादशलिंगस्थकलशेषु द्वादशप्रतिमाः पूजयेयुः॥ तत्र प्राच्यां॥ महेशं॥
अघोरं॥ पशुपतिं॥ दक्षिणस्यां॥ पंचवक्त्रं॥ उग्रं॥ रुद्रं॥ पश्चिमायां॥ भवं॥ शर्वं॥ शंभुः॥
उत्तरे॥ शिवं॥ भीमं॥ भीमपराक्रमं॥ प्रतिकलशपरितः लोकपालान् प्रतिष्ठाप्य॥ रुद्राभि
षेकपूर्वकं षोडशोपचारैः पूजयेत्॥ प्रतियामं पूजा कार्या॥ एकैकेन वा॥ रात्रिं पुराणपठ २१

नादिना निनयेत्॥ प्रातः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ अत्र प्रधानं॥ उमामहेश्वरं पायसबि
ल्वपत्रतिलदूर्वाघृतद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः द्वादशकलशस्थ द्वादशदे
वताः अष्टसंख्याकाहुतिभिः॥ तैरेव द्रव्यैः परिवारदेवताः ब्रह्मादिदेवताश्च एकैकया ज्याहुत्या
यक्ष्ये॥ एवं होमं समाप्य पीठे देवतां पूजयेत्॥ शर्वाय॰ पादौ पू॰ पशुपतये॰ ऊरू पू॰ रुद्राय॰।
कटिं॰ शर्वाय॰ बाहून्॰ सद्योजाताय॰ कंठं॰ शंभवे॰ मुखं॰ वामदेवाय॰ चक्षुषी॰ भीमाय॰
भ्रुवौ॰ उमापतये॰ ललाटं॰ सर्वव्यापिने॰ मूर्धानं॰ ततः आचार्यद्वादशब्राह्मणान् वस्त्रादि
ना संपूज्य तेभ्यः प्रतिमासहितकलशान् दद्यात्॥ तत्र मंत्रं॥ शंभो प्रसीद देवेश सर्वलोकेश्वर प्र
भो॥ तवरूपप्रदानेन मम संतु मनोरथाः॥ ततः व्रतपूर्त्यै त्रयोदशगाः अथवा एकां गां वा आ

१२ चार्यास अन्येभ्यो दक्षिणांदद्यात्॥ब्राह्मणान्संतर्प्यस्वयंभुंजीत॥लिंगपुराणेतुप्रकारांतरेण
उक्तं॥मंडलेउमामहेश्वरंसंपूज्यप्रातः पूर्वोक्तरीत्यातिलव्रीहियवैः अष्टोत्तरशतहोमंकृ
त्वाचतुर्दशब्राह्मणान्चतुर्दशनामानि॥अजैकपादहिर्बुध्न्योभवः शर्वउमापतिः॥रुद्रः
पशुपतिः शंभुर्वरदः शिवईश्वरः॥महादेवोहरोभीमोनामान्येवंचतुर्दश॥एतैर्होमः प्र
कर्तव्यः कुंभदानेपितान्स्मरेत्॥अष्टआहुतिसंख्याकः बिल्वपत्रैः होमः अन्यत्समानं॥
॥ ॥इतिश्रीमत्शांकर्यांव्रतोद्यापनकौमुद्यांचतुर्दशीव्रतानि॥ ॥अथज्येष्ठपौर्णिमा
यांपूर्वविद्धायांवटसावित्रीव्रतं॥तच्चत्रयोदशीमारभ्यपौर्णिमांतंकर्तव्यं॥तदुक्तंस्कांदे
भविष्ययोः॥पौर्णिमायांवाकार्यं॥व्रतविधिः॥नद्यादौतिलामलकरजनीविलेपनपू १२

र्वकस्नात्वाचार्षिकवत्पूजादिकंनिर्वर्त्य॥उद्यापनंसंकल्प्यंकुर्यात्॥तद्यथा॥तिथ्यादिसंकी
र्त्यममभर्तुः पुत्रादीनांचआयुरारोग्यैश्वर्यादिप्राप्तिपूर्वकइहजन्मनिजन्मांतरेचआत्मनःअवै
धव्यप्राप्तयेआचरितवटसावित्रीव्रतोद्यापनंकरिष्ये॥इतिसंकल्प्य॥व्रताचार्यः वटमूलेगृ
हेवामंडपेवेदिंविधायतत्रसर्वतोभद्रंविलिख्यतत्रब्रह्मादिदेवताः संपूज्यतत्रकलशद्वयंप्रति
ष्ठाप्यतत्रएकस्मिन्कलशेहैमंब्रह्मजज्ञानमितिमंत्रेणब्रह्माणंगायत्रीमंत्रेणहैमींसावित्रींच
प्रतिष्ठाप्य॥तदुत्तरद्वितीयकुंभेपलादधिकराजतरथस्थराजतपर्यंकेहैमीः सत्यवत्सावित्री
यमनारदप्रतिमाः नाममंत्रैरावाह्यपुरतः काष्ठभारकुठारंचहैमराजतंवानिधायपूजयेत्॥
अशक्तौएकस्मिन्कलशेसर्वेषांपूजनं॥पुष्पोत्तरंअंगपूजा॥सावित्र्यै० पादौ० प्रसावित्र्यै०

१३ जानुनी॰।कमलपत्राक्ष्यै॰।कटिं॰।भूतधारिण्यै॰।उदरं॰।यज्ञायै॰।कंठं॰।ब्रह्मप्रियायै॰।शिरः॰।
अथसत्यव्रतो॥धात्रे॰।पादौ॰।परमेष्ठिने॰।जानुनी॰।अग्निरूपा॰।कटिं॰।वेधसे॰।उदरं॰।
हिरण्यगर्भाय॰।कंठं॰।चतुराननाय॰।मुखं॰।ब्रह्मणे॰।शिरः॰।मंत्रपुष्पानंतरं अर्घ्यं दद्यात्॥र
जतादिपात्रेणद्वयोरपि॥ॐकारपूर्वके देवि वीणापुस्तकधारिणी॥वेदमातर्नमस्तेस्तु अवै
धव्यं प्रयच्छ मे॥पतिव्रते महाभागे भर्तुश्च प्रियवादिनि॥अवैधव्यं च सौभाग्यं देहि त्वं मम सुव्र
ते॥पुत्रान्पौत्रांश्च सौख्यं च गृहाणार्घ्यं नमोनमः॥अथ ब्रह्मसत्यव्रतो॥त्वया सृष्टं जगत्सर्वं
तु सर्वं सदेवासुरमानुषं॥सत्यव्रतपरो देव ब्रह्मरूप नमोस्तु ते॥नारदाय॥नारदायनमस्तुभ्यं सु
रेशाद्यभिवंदित॥गृहाणार्घ्यं मया दत्तं अवैधव्यं प्रयच्छ मे॥ततः प्रार्थयेत्॥साविवीब्रह्मगायत्री १२

सर्वदाप्रियभाषिणी॥तेन सत्येन मां पाहि दुःखसंसारसागरैरात्॥मया कृतं महाघोरं जन्मांतर
शतैरपि॥भस्मीभवतु तत्सर्वं अवैधव्यं च देहि मे॥ब्रह्मसत्यव्रतो॥अवियोगो यथा देवसावित्र्या
सहितस्तव॥अवियोगस्तथास्माकं भूयाज्जन्मनि जन्मनि॥साविव्या॥सावित्री त्वं यथा देवि चतुर्व
र्षशतायुषं॥पतिं प्राप्तासि गुणिनं मम देवि तथा कुरु॥यमस्य॥कर्मसाक्षी जगत्पूज्य सर्ववंद्य प्रसीद
मे॥संवत्सरव्रतं सर्वं परिपूर्णतरस्तु मे॥ततः सुवासिनीः संपूज्य वायनानि दत्वा कथाश्रवणादिना
रात्रिं निनयेत्॥प्रातः अग्निं प्रतिष्ठाप्यान्वाधाय्यात्॥सावित्री गायत्री मंत्रेण पायसपृतदूर्वातिलव्री
हिद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्माणं धर्मराजं नारदं च व्याहृतिमंत्रेण तिलव्रीहि
यवद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥स

२४ सवत्सावित्र्योः ब्रह्मसावित्र्योः ऐक्यत्वात् पृथक् होमादिकं नास्ति॥ पूजादौ तन्मंत्राभ्यामेव
तयोः पूजाइत्यकत्वात्॥ एवं होमं संपाद्य ततः चतुर्विंशति द्वादश अष्टौ चत्वारि वा मिथुनानि
वस्त्रादिना संपूज्य॥ पूरिकामंडकमोदकादि कूष्मांडनारीकेरमातुलिंगदाडिमबीजपूरादि फल
हरिद्राकुंकुमकेशविचूर्णकज्जलकंठसूत्रकंकणमौक्तिकपादभूषणवस्त्रकंचुकीआदर्शपत्रा
दिदक्षिणान्तां वृन्तादियुतशूर्पस्थं नवशूर्पपिहितं वायनं दद्यात्॥ तत्र मंत्रः॥ सोपस्करं द्विजश्रेष्ठ
तसं पूर्त्तिकारकं॥ वायनं ते प्रयच्छामि सावित्री प्रीयतामिति॥ ततः पीठं गां च दत्वा ब्राह्मणान् संत
र्प्य आशिषो गृहीत्वा इष्टजनैः सह भुंजीत॥ स्यात् अत्र विशेषः॥ रात्रौ अरुंधतीं दृष्ट्वा संपूज्य
अर्घ्यं दद्यात्॥ अरुंधति नमस्तेस्तु वसिष्ठस्य प्रिये शुभे॥ पुत्रान्देहि सुखं देहि गृहाणार्घ्यं॥इ २४

तिदत्वा भुंजीत॥ इति वटसावित्रीव्रतं॥ ॥ अथ द्वात्रिंशत्पौर्णमासीव्रतं॥ भाषया बत्तीसी पौर्णमा
सी कथ्यते॥ तदुक्तं भविष्ये॥ पौर्णमास्यां मार्गशीर्षस्य तस्यां प्रारभ्यते व्रतं॥ उमया सहितो देवः पू
जनीयो महेश्वरः॥ एकैकं दीपकं कृत्वा मासि मासि च दापयेत्॥ एवं सार्द्ध द्वयं वर्षं द्विमासाधिकमा
चरेत्॥ नभसः पौर्णिमायां च कुर्यात्॥ उद्यापनं ततः॥ अथ वा शुभमासस्य पौर्णिमायां समा
पयेत्॥ चतुर्दश्यां उपवसेत्॥ रात्रौ पूजनमारभेत्॥ तिथ्यादि संकीर्त्य आत्मनः इह जन्मनि जन्मां
तरे वा वैधव्यनाशपुत्रपौत्रसौभाग्यादिप्राप्तिपूर्वकभर्तुरायुर्वृद्धिद्वारा उमामहेश्वरप्रीत्यर्थं आचरि
तस्य द्वात्रिंशत्पौर्णमासीव्रतस्य पूर्णतासिद्ध्यर्थं तदुद्यापनाख्यं कर्म करिष्ये॥ ततः व्रताचार्यः लिंग
तोभद्रस्थकलशे हैमं उमामहेशं ॐ नमः शिवायेति मंत्रेण स्थापयेत्॥ पूजयेच्च॥ प्रातः अग्निं प्रति

९५ श्राप्यान्वादप्यात्॥ उमामहेशांयवतिज्ञाज्यद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः॥
ब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये॥ ततः द्वात्रिंशत्वंपनयुतेवंशपात्रेत्रीत्युपरिष्ठे द्वात्रिं
शन्महादीनात द्वात्रिंशत्फलवस्त्रदक्षिणादियुतान्कृत्वादद्यात्॥ तत्रमंत्रः॥ महेशप्रतिगृह्णा
तुमहेशोवैददातिच॥ महेशस्तारकोभ्याभ्यांमहेशायनमोनमः॥ द्वात्रिंशाद्भिःफलैर्दीपैःसंयुतं
वस्त्रवेष्टितं॥ वाणकंतवतुष्टयर्थंददामिगिरिजापते॥ ततः द्वात्रिंशान्ब्राह्मणानसदन्नेनसंतर्प्प
येदिति॥ इतिद्वात्रिंशत्पौर्णमासीव्रतं॥ ॥अथकोकिलाव्रतं॥ तदुक्तं भविष्ये॥ यस्मिन्वर्षेआ
षाढद्वयंतदाशुद्धाषाढपौर्णमास्यांव्रतग्रहणं॥ श्रावणपौर्णिमायांसमापनं॥ अशक्तेनदिनाष्ट
कत्रिदिनंवाकर्त्तव्यं॥ तत्रव्रतविधिः॥ दिनाष्टकंहरिद्राकुंकुमलेपनपूर्वकंस्नानंततःतिलामल ९५

कैः॥ ततःसर्वौषधिभिः॥ ततः वचापिष्टेन॥ तत्रस्नानमंत्रः॥ स्नास्येहंपरमानन्त्यासमुद्दि
ग्नाकुरूपतः॥ सौभाग्यंसुंदरंरूपंकुरुजन्मनिजन्मनि॥ ततःस्नात्वा॥ सूर्यायअर्घ्यंदत्वागृहे
पूजांकुर्यात्॥ तद्यथा॥ दिथ्यादिसंकीर्त्यममइहजन्मनिजन्मांतरेवासर्वपापभयपूर्वकपुत्र
पौत्रावैधव्यनिःसाफल्यंलक्ष्मीसौभाग्यरूपलावण्याद्यभिवृद्धिद्वारागौरीरूपीकोकिलाप्रीत्य
र्थंकोकिलाव्रतंकरिष्ये॥ इतिसंकल्प्य॥ कोकिलांपूजयेत्॥ तद्यथा॥ सौवर्णंरौप्यपादांमौक्ति
कनेत्रांप्रवालमुखांपंचरत्नपृष्ठंराजतचूतवृक्षस्थांपक्षिरूपिणीकोकिलांकृत्वातिलपूरिकाताम्र
पात्रेनिधायपूजयेत्॥ अशक्तोतिलपिष्टमयींवाकुर्यात्॥ तस्याःप्रत्यहंविसर्जनंधातुमय्याविक
ल्पः॥ चूतचंपककदम्बस्थास्वर्णपक्षादिसंयुतां॥ चिंतयेत्पार्वतींदेवींकोकिलारूपधारिणीं॥ इति॥

९६ ध्यात्वाश्रीसूक्तेनगौरीर्मिमायेतिवानाममंत्रेणवापूजयेत्॥तिलस्नेहेतिलसुखेतिलसौख्येति
लप्रिये॥सौभाग्यंधनपुत्रांश्चदेहिमेकोकिलेनमः॥इत्यर्घ्यमंत्रः॥पुष्पोत्तरमंगपूजा॥शिवायै॰
शिरःपू॰वनवासिन्यै॰ललाटं॰सुरूपायै॰भ्रूमध्यं॰पार्वत्यै॰पादौ॰कृष्णवर्णायै॰सर्वांगं
पूजयामि॥कोकिलेकृष्णवर्णेचसदावससिकानने॥भवान्यैहरकांतायैकोकिलायैनमोनमः॥
नमस्कारः॥पुनरर्घ्यं॥अर्घ्यंगृहाणदेवेशिवांछितार्थप्रदायिनी॥आषाढस्यासितेपक्षेमेघव
र्णेहरिप्रिये॥कोकिलेत्वंजगन्मातःगृहाणार्घ्यंनमो॰॥ततःप्रार्थयेत्॥रूपंदेहिजयंदेहिसौभा
ग्यंदेहिमेसदा॥पुत्रान्देहिधनंदेहिसर्वकामान्कुरुष्वमे॥काकवंध्याविवत्साचमृतवंध्याचदुःख
दा॥ताःसर्वाःफलतांयांतुकोकिलेत्वत्प्रसादतः॥त्वयालब्धःपतिर्लोकेशंकरोलोकशंकरः॥ ९६

अतोहंत्वत्प्रसादेनलभेयंपतिमुत्तमं॥ततःगुडमिश्रितानांतिलानांबरयनंदद्यात्॥दैवेतिलगुडमि
श्रितपक्वान्नैर्नैवेद्यं॥प्रदोषकालेपूजनं॥स्वयंतिलगुडभक्षणंहविष्यान्नंवा॥ततःविसर्जनं॥
एवंमासपर्यंतंचरित्वाअंतेपौर्णिमायांउद्यापनंकुर्यात्॥दिविचैत्ररथोद्यानेविंध्यपर्वतवासि
नी॥अर्चितापूजितासित्वंकोकिलेहरवल्लभे॥कोकिलेकलकंठासिमाधवेमधुरस्वरे॥वसंतेस
ससेदेविगच्छत्वंनंदनंवनं॥इतिमंत्रेणविसर्जनं॥अथवानविसर्जनं॥अंतेकुर्यात्॥तद्यथा॥
पूर्वोक्तसंकल्पंकृत्वाआचरितकोकिलाव्रतसांगतासिद्ध्यर्थेकोकिलारूपीगौरीप्रीत्यर्थंतदुद्याप
नाख्यंकर्मकरिष्ये॥कृताचार्यःएकलिंगतोभद्रेब्रह्मादिदेवताःसंस्थाप्यतदुपरिप्रस्थमितं
सप्तधान्योपरिताम्रंकृष्णोर्णपर्णवेष्टितंकलशंप्रतिष्ठाप्य॥तदुपरिएकविंशतिबंधात्मकति

९७ लपूर्णं वंशपात्रं निधाय॥ तत्र पूर्वोक्तलक्षणां हैमीं कोकिलां गौरीर्मिमायेति मंत्रेण प्रतिष्ठाप्य॥
पूर्वोक्तप्रकारेण पूजयेत्॥ अंशांकृत्स्नमासपर्यंतायाः पूजितां तामेव अधिवासयेत्॥ रात्रौ जा
गरणं कृत्वा प्रातः अग्निं प्रतिष्ठाप्यान्वाधाय॥ ॥ अत्र प्रधानं॥ ॥ कोकिलारूपिणीं गौरीं गौ
रीर्मिमायेति मंत्रेण तिलचंपकपुष्पतंडुलाज्यपायसाज्यद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः
तथाव्याहृतिमंत्रेण बिल्वपत्रैः शतत्रयपरिमिताहुतिभिः ब्रह्मादिदेवताभ्य एकैकयाज्याहुत्या
यक्ष्ये॥ एवं होमं संपाद्य पंचमिथुनानि संपूज्य अन्नाद्यैर्दद्यं तेभ्यः गुडतिलमिश्रितपक्वान्नपूरित
करकयुतं सौभाग्यद्रव्यं दक्षिणान्वितं वंशपात्रं कृष्णोर्णावस्त्रवेष्टितं वायनं दद्यात्॥ तन्त्र
मंत्रः॥ सोपस्करं द्विजश्रेष्ठ वायनं व्रतपूर्तये॥ ददामि ते गृहाणेदं कोकिला प्रीयतामिति॥ ततः ९७

पीठं व्रतपूर्तये गां च दत्वा ब्राह्मणान् दक्षिणादिभिः प्रतोष्य आशिषो गृह्णीयात्॥ ॥ इति को
किलाव्रतं॥ ॥ अथ भाद्रपदपौर्णिमायां उमामहेश्वरव्रतं॥ शिवरहस्ये॥ तत्र पूर्वेद्युः सायं
शिवं संपूज्य हविष्याशी शिवध्यानपरः॥ देवसन्निधौ निद्रां कुर्यात्॥ प्रातः नद्यादौ स्नात्वा
नित्यकर्म निर्वर्त्य भस्मोद्धूलितसर्वांगः देवागारं प्रविश्य॥ तिथ्यादि संकीर्त्य॥ आत्मनः अशे
षपापक्षयदुःखदारिद्र्यनाशपूर्वकशिवपदप्राप्तिकामनया उमामहेश्वरव्रतं करिष्ये॥ इति
संकल्प्य॥ चतुर्द्वारोपशोभितमंडपे भद्रपीठं कलशं प्रतिष्ठाप्य तत्र चूर्णपात्रे सग्रंथिकुशं गव्या
क्तं कुंकुमांकितं पंचदशग्रंथियुतं दोरकं निधाय तत्र सौवर्णराजतं वा पलादधिकं प्रतिमाद्वयं॥
उमामहेश्वरयोः॥ त्र्यंबकमिति गौरीर्मिमायेति मंत्राभ्यां प्रतिष्ठाप्य॥ विध्युक्तप्रकारेण पूज

१८ येत्॥तत्रध्यानं॥पंचाननंउमाकांतंअनलेंदुरविप्रभं॥चंद्रार्धशेखरंनित्यंजटामुकुटमंडितं॥
भस्मोद्धूलितसर्वांगंरुद्राक्षाभरणान्वितं॥स्तुतंसत्यपरब्रह्मविष्णुब्रह्मादिवंदितं॥विश्वंविश्वे
श्वरंदेवंध्यायामिपरमेश्वरं॥ध्यायामिपरमांगौरीआदिनिद्यांसुरेश्वरी॥लक्ष्मीसेवितपादा
ब्जांचंद्रार्धकृतशेखरां॥ब्रह्मेंद्रोपेंद्रजननींमहेशार्धांगभामिनीं॥प्रसन्नवदनांशांतांध्यायेदे
वीउमासनीं॥एवंध्यात्वापंचब्रह्ममंत्रैःषोडशोपचारैःपूजयेत्॥पुष्पोत्तरमंगपूजा॥कपर्दि
नेनमःकपर्दिनंपू०॥भाललोचनाय०भाल०॥सोमसूर्याग्निलोचनाय०॥त्रिनेत्राणिपू०॥श्रुति
श्रोत्राय०श्रोत्राणि०॥घ्राणगंधाय०घ्राणानि०॥स्मितदंताय०दंतान्०॥श्रुतिजिह्वाय०॥जि
ह्वां०॥भीमाय०कपोलौ०॥शर्वाय०ओष्ठौ०॥नीलकंठाय०कंठं०॥भूरिवक्षसे०वक्षांसि०॥हि १८

रण्यबाहवे०बाहून्०॥विश्वोदराय०उदरं०॥रुद्राय०कटिं०॥पशुपतये०जानुनी०॥उग्राय०॥गु
ल्फौ०॥महसे०पादौ०॥शिवाय०सर्वांगंपू०॥पृथुवेण्यै०वेणीं०॥सीमंतराजितायै०सीमंतं०॥नी
लकुंतलायै०कपोल०॥कुड्मलदंतायै०दंतान्०॥विद्याजिह्वायै०जिह्वां०॥बिंबोष्ठायै०ओष्ठौ०॥
कंबुकंठायै०कंठं०॥पृथुलकुचायै०कुचौ०॥विश्वगर्भायै०उदरं०॥शुभकट्यै०कटिं०॥दिव्यो
रुदेशायै०ऊरूपू०॥वृत्तजंघायै०जंघे०॥लक्ष्मीसेवितपादुकायै०पादौ०॥माहेश्वरप्रियायै०न
खान्०॥शोभनविग्रहायै०सर्वांगं०॥एवंपूजांसमाप्य॥ततःप्रथमग्रंथिमारभ्यदोरकसर्वग्रंथि
षुबिल्वदलादिभिःउमामहेश्वरौनिमंत्रयेत्॥प्रत्येकंक्रमेणसंपूज्य॥पंचदशग्रंथिषु॥गोधूमा
न्॥तंदुलान्वानिधापयेत्॥ततःदोरकधारणं॥ततःगोघृतपात्रपाचितगोधूमापूपानांवाय

९९ नंमंडकानांवात्रेपंचदशमंडपान्संस्थाप्यसदक्षिणांदद्यात्॥तत्रमंत्रः॥उमेशः प्रतिगृह्णातिउ
मेशोवैददातिच॥उमेशस्तारकोभ्याभ्यांउमेशायनमोनमः॥ततः पीठंदत्वासदन्नेनशैवान्सं
तर्प्यवाग्यतः स्वयंभुंजीत॥एवंपंचदशवर्षप्रतिसंवत्सरंचरित्वाअंतेउद्यापनंकुर्यात्॥पूर्वोक्त
फलावाप्तयेआचरितउमामहेशव्रतपूर्त्तयेतदुद्यापनंकरिष्ये॥ततः पंचदशशैवान्द्विजान्निमंत्र्य
देवंस्थापयेत्॥व्रताचार्यः पंचदशपीठेषुपंचदशकुंभान्वस्त्रयुग्मवेष्टितान्कृत्वातेषुप्रतिमाद्वयं
प्रत्येकंक्रमेणसंपूज्येयुः॥ऋत्विक्सहितः सोत्सवः यजमानः पयोमात्राशनंकृत्वापुराणपठणी
दिरात्रिंनिनयेत्॥प्रातः ऋत्विक्सहितः मुख्याचार्यः अग्निंप्रतिष्ठाप्यअन्वादध्यात्॥उमामहे
शप्रताक्पायसद्रव्येणपंचदशसहस्रंपंचदशशतानिवातत्संख्याकाहुतिभिः ब्रह्मादिदेवता ९९

श्चएकैकयाज्याहुत्यायक्ष्ये॥होममंत्रः॥ॐउमामहेश्वरायनमः स्वाहेतिवेदोक्तवानततः तान्द्वि
जान्वस्त्रादिनासंपूज्यपीठंतेभ्योदत्वावायनानिचदत्वाव्रतपूर्त्तयेपंचदशगाः तन्मौल्यंवादत्वा
अन्यान्द्विजान्सुवासिनीश्चसंपूज्यदेवंप्रार्थयेत्॥उद्यापनंकृतंशंभोमयेनदधुनाप्रभो॥इदं
संपूर्णतांमेतुत्वप्रसादान्महेश्वर॥मंत्रहीनंभक्तिहीनंशक्तिहीनंचयत्कृतं॥सांगंभवतुतत्सर्वं
नवैवस्मरणात्प्रभो॥ततः आशिषोगृहीत्वावाग्यताइष्टजनैः सहभुंजीत॥ ॥इतिउमामहे
श्वरव्रतं॥ ॥आश्विनपौर्णिमायांकोजागरव्रतंस्कांदे॥ ॥तिथ्यादिसंकीर्त्य॥आत्मनः स्वकु
लस्यचअखंडितलक्ष्मीप्राप्तिपूर्वकसुखादिप्राप्तयेलक्ष्मीप्रीत्यर्थंकोजागरव्रतंकरिष्ये॥रात्रौ
मंडलेसत्कुमिवतितउनेतिमंत्रेणलक्ष्मीं॥इंद्रंनरोनेतिमंत्रेणमंत्रेरावतस्थंइंद्रंआवाह्यसंपूजयेत्॥

१०० परितःदीपान्घृतेनतैलेनवालक्षंतदर्धंवायथाशक्तिवादत्वावीथीचतुष्पथेवादत्वानारिकेरोदक
मात्रंप्राश्यअक्षैर्दीव्यन्उत्सवेनरात्रिंनिनयेत्॥ प्रातःघृतशर्करापायसादिनाब्राह्मणान्संतर्प्य
दक्षिणांदत्वाआशिषोगृहीत्वाइष्टजनैःसहस्वयंभुंजीत॥ ॥इतिकोजागरव्रतं॥ ॥अथकार्त्ति
कचतुर्दश्यांपौर्णमास्यांवाकूष्मांडीव्रतं॥ भविष्ये॥ अन्यस्मिन्शुभमासेवाकार्यं॥ तत्रविधिः॥
वैशाखसितचतुर्दश्यांशुभेकूष्मांडीशेपणंषण्मासंषड्नाममंत्रैःप्रत्यहंक्रमात्पूजयेत्॥ सौभा
ग्यदायै॰ सर्वकामदायै॰ पुत्रदायै॰ धनदायै॰ अभीष्टफलदायै॰ मोक्षदायै॰ एवंषण्मासंसंपूज्य
फलादियुतायांतस्यांउद्यापनंकुर्यात्॥ उद्यापनदिनेवाक्रमात्षाण्मासिकापूजाआदौकार्या॥ दि
थ्यादिसंकीर्त्य॥ आत्मनःसपुत्रप्राप्तिपूर्वकअतुलसौभाग्यलक्ष्मीसुखाभिवृद्धिद्वाराब्रह्मसावित्री १००

प्रीत्यर्थंकूष्मांडीव्रतोद्यापनंकरिष्ये॥ ततःव्रताचार्यःकूष्मांडीपरितःमंडपंविरिच्यपताकादिभिः
भूषयित्वातन्मूलेहैमीफलपुष्पादियुतांकूष्मांडींसंस्थाप्यअभ्यंगस्नानंकृत्वास्त्रीभूषणैःभूष
यित्वापूजयेत्॥ तत्पुरतःसर्वतोभद्रेब्रह्मादिदेवतास्थापनपूर्वकंकलशंप्रतिष्ठाप्यतत्रहैमप्रति
मेब्रह्मसावित्र्योःब्रह्मजज्ञानमितिप्रणोदेवीतिमंत्राभ्यांप्रतिष्ठाप्यपूजयेत्॥ कूष्मांडीपूजनमं
त्रः॥ कूष्मांड्यैकामदायिन्यैब्रह्माण्यैतेनमोनमः॥ नमोस्तुसुरवदान्यैचसावित्र्यैतेनमोनमः॥
रात्रौजागरणंकृत्वाप्रातःअग्निंप्रतिष्ठाप्यान्वादध्यात्॥ ब्रह्माणंसावित्रींचघृततिलद्रव्येणप्रत्ये
कंअष्टोत्तरशतसंख्याकाहुतिभिः॥ ब्रह्मादिदेवताश्चएकैकयाआज्याहुत्यायक्ष्ये॥ स्थापनमंत्राभ्यां
होमः॥ ततःअष्टौचत्वारिवामिथुनानिवस्त्रादिनासंपूज्यफलसौभाग्यद्रव्ययुतंवायनंतेभ्योदत्वा॥

१०१ सपत्नीकं ब्राह्मणं संपूज्य तस्मै कूष्मांडीं दद्यात्॥ तत्र मंत्रः॥ कूष्मांडी बहुबीजाढ्यां वस्त्रालंकार
भूषितां॥ दक्षिणाकलशोपेतां हेमकूष्मांडिसंयुतां॥ सावित्रीब्रह्मसंप्रीत्यै गृहाण द्विजसत्तम॥ त
तः पीठं व्रतपूर्तये गां च दत्वा ब्राह्मणान्संतर्प्पयेदिति॥ ॥इति कूष्मांडीव्रतं॥ अथ मार्गशीर्षा
मायां गौरीतपोव्रतं॥ कालिकापुराणे॥ तत्र व्रतविधिः॥ इदं व्रतं षोडशवर्षात्मकं अशक्तौ षोडश
मासात्मकं॥ तत्र प्रथमे द्वे चतुर्दश्यां नक्तं आमायां उपोषणं पूजनं च प्रतिपदि पारणा॥ अत्र च
र्षवृद्धौ तिथिवृद्धिः पूर्वोक्ता द्वितीयां आचरेत्॥ प्रदर्शनार्थं लिख्यते॥ द्वितीये द्वे आमायां नक्तं
प्रतिपदि उपोषणं द्वितीयायां पारणा॥ एवं सर्वत्र ज्ञेयं॥ तिथ्यादि संकीर्त्य॥ आत्मनः पतिपुत्रसु
खावाप्तिपूर्वकं अतुलसौभाग्यादिवृद्धिद्वारा गौरीप्रीत्यर्थं गौरीतपोव्रतं करिष्ये॥ इति संकल्प्य॥ १०१

सूर्यायार्घ्यं दत्वा पूजा सामग्रीमादाय शंभोः शिवालये गत्वा पीठं नमो देव्यै इति मंत्रेण गौरीं आवा
ह्य दक्षिणोत्तरतः गणेशं स्कंदं चावाह्य पंचामृतपुरःसरं षोडशोपचारैः पूजयेत्॥ अंगपूजा॥ पार्व
त्यै नमः॥ पादौ पू०। हिमवत्यै०। जानुनी०। गिरिजायै०। गुह्यं०। गंभीरायै०। नाभिं०। अपर्णायै०। उदरं०।
कामिन्यै०। कंठं०। स्कंदमात्रे०। मुखं०। लोकमोहिन्यै०। ललाटं०। गौर्यै०। शिरः०। ततः ताम्रपात्रे अ
ष्टतंतुमयीं वर्तिं निधाय गोघृतेन दीपं उज्वालयेत्॥ सूर्योदयावधि॥ एवं कथाश्रवणादिना रात्रिं
नीत्वा ब्राह्ममुहूर्ते उत्थाय स्नात्वा गौरीं संपूज्य फलपूरिका तिलतंडुल सौभाग्याष्टकयुते धातुमये
पात्रे दीपं निधाय तिथिनामभिः भ्रामयेत्॥ ततः सूर्याय दर्शयेत्॥ यावत् पक्ष्यादीनां शब्दादिकं ना
स्ति तावत् पूर्वमेव दीपभ्रमणादि कर्तव्यं॥ ततः प्रातः दंपती संभोज्य गौरीं विसर्ज्य स्वयं अक्षारं भुंजी

त॥ वर्षवृद्धौ दंपतीवृद्धिः॥ एवं षोडशवर्षं कृत्वा अंते उद्यापनं कुर्यात्॥ मार्गशीर्षपौर्णमास्यां
पूर्ववत् संकल्पं कृत्वा ततः व्रताचार्यः पीठे देवीं गौरीर्मिमायेति मंत्रेण ईश्वरं च एषामीशे पशु
पतिरिति मंत्रेण आवाह्य पूर्ववत्तं कुर्यात्॥ प्रातः अग्निं प्रतिष्ठाप्य अन्वादध्यात्॥ गौरीईश्वरं च घृ
ततिलद्रव्येण प्रत्येकं अष्टोत्तरसहस्रसंख्याकाहुतिभिः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्याय
क्ष्ये॥ ततः षोडशदंपतीवस्त्रादिना संपूज्य शर्करापूपमोदकादिपूरितान् धातमयान् मृन्मयान्वा
करकान् सदक्षिणांतेभ्यो दद्यात्॥ तत्र मंत्रः॥ मोदकाद्यैश्च संपूर्णं व्रतपूर्तिकारकं॥ करकं ते प्र
यच्छामि गौरी मे प्रीयतामिति॥ ततः पीठं व्रतपूर्त्यै गां च दत्वा आशिषो गृहीत्वा भुंजीत॥ ॥
॥ इति गौरीतपोव्रतं॥ ॥ अथ पौषमाघामायां अर्द्धोदयव्रतं॥ स्कांदे॥ अर्द्धोदयस्वरूपं भारते॥ अमा

र्कश्रवणे पाते युक्ता चेत्पुष्यमाघयोः॥ अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः इति दिवैव योगः
शस्तोयं न तु रात्रौ कदाचन इति॥ तिथ्यादि संकीर्त्य आत्मनः अखिलपापक्षयपूर्वकधर्मार्थका
ममोक्षचतुर्विधपुरुषार्थसिद्धिद्वारा ब्रह्माविष्णुशिवप्रीत्यर्थं अर्द्धोदयव्रतं करिष्ये॥ इति संकल्प्य॥
दर्भास्तृते शुद्धभूमौ शतत्रयद्रोणपरिमिततिलानां पर्वतं कृत्वा यथाशक्तिमाते तत्र पलादधिकं सुव
र्णस्य ब्रह्मविष्णुशिवानां प्रतिमात्रयं कृत्वा ब्रह्मजज्ञानं॥ इदं विष्णुरिति त्र्यंबकं मंत्रैः प्रतिष्ठाप्य
पूजयेत्॥ परितः लोकेशान् तत्तन्मंत्रैः आवाहयेत्॥ अथ अंगपूजाक्रमेण॥ ब्रह्मणे॰ पादौ॰ हि
रण्यगर्भाय॰ ऊरू॰ परमेष्ठिने॰ जंघे॰ वेधसे॰ गुल्फं॰ हंसवाहनाय॰ कटिं॰ शतानंदाय॰ वक्षः॰
सावित्रीपतये॰ बाहू॰ पूर्वादिचतुर्मुखेषु॥ ऋग्वेदाय॰ यजुर्वेदाय॰ सामवेदाय॰ अथर्ववेदाय॰

चतुर्वक्त्राय॰ नेत्रं॰ कपिला॰ ललाटं॰ हंसाय॰ शिरः॰ अथ शिवे॥ अनंताय॰ पादौ॰ वि
श्वरूपाय॰ ऊरू॰ मुकुंदा॰ जानुनी॰ गोविंदाय॰ जंघे॰ प्रद्युम्ना॰ गुह्यं॰ पद्मनाभा॰ नाभिं॰
कौस्तुभवक्षसे॰ वक्षः॰ चतुर्भुजाय॰ बाहून्॰ विश्वतोमुखाय॰ मुखं॰ सहस्रशिरसे॰ शिरः॰
शिवस्य॥ ईशानाय॰ पादौ॰ चंद्रशेखराय॰ जंघे॰ पशुपतये॰ जानुनी॰ शंकराय॰ ऊरू॰ उ
माकांताय॰ गुह्यं॰ नीललोहिताय॰ नाभिं॰ कृत्तिवाससे॰ उदरं॰ नागोपवीतिने॰ बाहून्॰
नीलकंठाय॰ कंठं॰ पंचवक्त्राय॰ मुखं॰ कपर्दिने॰ शिरः॰ क्रमेण प्रार्थयेत्॥ नमो विश्वसृजे
तुभ्यं सत्याय परमात्मने॥ देवाय देवपतये यज्ञानां पतये नमः॥ नारायण जगन्नाथ नमस्ते गरु
डध्वज॥ पीतांबर नमस्तुभ्यं जनार्दन नमोस्तु ते॥ महेश्वर महेशान नमस्ते त्रिपुरांतक॥ जीमूत १०३

केशाय नमो नमस्ते वृषभध्वज॥ ब्रह्मन् विष्णो महेशास्त्र विदं ब्राह्मणं कृत्वा वस्त्रालंकारा
दिभिः संसंपूज्य॥ पुनः ब्रह्मविष्णुमहेशान् पंचामृतपुरःसरं कमलतुलसीबिल्वदलैः संपूज
येत्॥ ततः व्रताचार्यः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ ब्रह्मविष्णुमहेशान् घृताक्ततिलद्रव्येण प्र
तिदैवतं सहस्रसंख्याकाहुतिभिः लोकपालान् एकैकयाज्याहुत्या यक्ष्ये॥ ततः तिलपर्वतं प्रतिमा
त्रययुतं ब्राह्मणाय दद्यात्॥ तत्र मंत्रः॥ तिलपर्वतमध्यस्था ब्रह्मविष्णुमहेश्वराः॥ ददंतु पातकं सर्वं
यच्छंतु मम सद्गतिं॥ इति उक्त्वा दद्यात्॥ ततः सांगतासिद्ध्यै रक्तकृष्णश्वेतवर्णसुरभित्रयं सोपस्करं द
द्यात्॥ भविष्ये॥ प्रकारांतरेण होमद्रव्याण्युक्तानि॥ पलाशसमित्चरुतिलाज्यानि ब्रह्मणः॥ अश्वत्थस
मित्तिलपायसानि विष्णोः॥ चर्वाज्यव्रीहियवाः शंभोः॥ घृतेन पायसेन वा पूरितं कांस्यपात्रं सदक्षिणं

१०४ दद्यात्॥ ततः भूयसीं दत्वा आशिषो गृह्णीयात्॥ ॥इति अर्द्धोदयव्रतं॥ ॥अथ सोमवत्यामावा
स्याव्रतं भविष्ये॥ तत्र शंखः॥ आमावास्या तु सोमेन सप्तमी भानुना सह॥ चतुर्थी भूमिपुत्रेण सो
मपुत्रेण चाष्टमी॥ चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसंनिभा इति॥ तिथ्यादि संकीर्त्य॥ आत्मनः अवै
धव्यपुत्रपौत्रप्राप्तिपूर्वक अतुलसौभाग्यसिद्धिद्वारा अश्वत्थरूपीनारायणप्रीत्यर्थं आचरितस्य
सोमवत्यमावास्याव्रतस्य सांगतासिद्ध्यर्थं तदुद्यापनाख्यं कर्म करिष्ये॥ इति संकल्पयेत्॥ ततः
व्रताचार्यः सर्वतोभद्रस्थकलशे रौप्यमयपीठस्थसौवर्णाश्वत्थाधः हैमं लक्ष्मीनारायणं इदं वि
ष्णुरिति मंत्रेण संस्थाप्य पूजयेत्॥ कथाश्रवणादिना रात्रिं निनयेत्॥ प्रातः अग्निं प्रतिष्ठाप्यान्वा
दध्यात्॥ लक्ष्मीनारायणं अश्वत्थतिलसमित्पायसद्रव्येण प्रत्येकं अष्टोत्तरशतसंख्याहुतिभिः १०४

ब्रह्मादिदेवताश्च एकैकया आज्याहुत्या यक्ष्ये॥ ततः द्वादश ब्राह्मणान् वस्त्रादिना संपूज्य लड्डुकपाय
सघृतमंडकादिपक्वान्नैः संतर्प्य आशिषो गृहीत्वा भुंजीत॥ ॥इति सोमवत्यामावास्याव्रतं॥ ॥
पाद्मे॥ मलमासस्य कृष्णपक्षे चतुर्दश्यां त्रयोदश्यां वा अष्टम्यां वा नवम्यां वा तृतीयां वा अन्यतमति
थौ कार्यं॥ तिथ्यादि संकीर्त्य॥ आत्मनः दारिद्र्यपापदुःखनाशसत्पुत्रप्राप्तिपूर्वक अतुलभोगा
सिद्धिद्वारा सवित्तरूपी जनार्दनप्रीत्यर्थं मलमासव्रतं करिष्ये इति संकल्प्य॥ मध्याह्ने सर्वतोभद्रस्थ
कलशे हैमलक्ष्मीयुक्तजनार्दनं संपूज्य नानाविधपक्वान्नैर्नैवेद्यं दत्वा फलपुष्पोपेतं अर्घ्यं दद्या
त्॥ तत्र मंत्रः॥ देवदेव जगन्नाथ प्रलयोत्पत्तिकारक॥ गृहाणार्घ्यं मया दत्तं कृपां कुरु ममोपरि॥ ततः
सपत्नीकं ब्राह्मणं वस्त्रादिना संपूज्य त्रयस्त्रिंशत् अपूपान् कांस्यपात्रे निधाय सघृतं सहिरण्यं

१०५ वायनं ब्राह्मणायनिवेदयेत्॥ तत्रमंत्रः॥ विप्राउत्रोपानद्भूषणाछादनादियुतां शय्यां चदत्वा
पीठं व्रतपूर्त्तयेगां चदत्वानामाविपच्चान्नैर्ब्राह्मणान्त्संतर्प्य आशिषोगृहीत्वास्वयंभुंजीत॥
॥ ॥इतिमलमासव्रतं॥ ॥अथश्रावणामायांपिठोराव्रतं॥ स्कांदे॥ प्रातःस्नानादिनिर्वर्त्यवा
र्षिकवत्पूजांकृत्वाउद्यापनंसंकल्पंकुर्यात्॥ तिथ्यादिसंकीर्त्य॥ आत्मनःस्वकुलस्यचसंततिवि
छेदाभावपूर्वकपुत्रपौत्रलक्ष्मीसुखाद्यभिवृद्धिद्वारासप्तवर्षाणपिआचरितपिठोराव्रतस्यसंपूर्ण
तासिध्यर्थंचतुष्षष्टियोगिनीस्वरूपीसप्तमातृकाप्रीत्यर्थंतदुद्यापनाख्यंकर्मकरिष्ये॥ व्रताचा
र्यःउक्तप्रकारेणसर्वतोभद्रेअष्टौकलशान्प्रतिष्ठाप्यतत्रसप्तकलशेषुक्रमेणहैमीःसप्तप्रतिमाः
नाममंत्रेण॥ ब्राह्मी॰माहेश्वरी॰कौमारी॰वैष्णवी॰वाराही॰इंद्राणी॰चामुंडा॰आवाह्यज १०५

शानेसप्तमातरोइत्यनेनपूजयेत्॥ तदुत्तरेसुवर्णादिपूर्णपात्रयुतकलशेचतुःषष्टियोगिनीःहैम
प्रतिमासुअक्षतपुंजेषुवाआवाहयेत्॥ दिव्ययोगिं॰१ महायोगिं॰२ सिद्धयोगिं॰३ गणेश्वरी॰४
प्रेताक्षी॰५ डाकिनी॰६ काली॰७ कालरात्रि॰८ निशाचरी॰९ ओंकारी॰१० सद्रवेताली॰११ ह्रींकारी॰१२
भूतडामरी॰१३ ऊर्ध्वकेशी॰१४ विरूपाक्षी॰१५ शुष्कांगी॰१६ नरभोजनी॰१७ फट्कारी॰१८ वीरभद्रा॰
ये॰१९ धूम्राक्षी॰२० कलहप्रि॰२१ राक्षसी॰२२ घोररक्ताक्षी॰२३ विरूपा॰२४ भयंकरी॰२५ मासुरी॰२६
रौद्रवेताली॰२७ श्रापणं॰२८ त्रिपुरांतकी॰२९ भैरवी॰३० ध्वामिनी॰३१ क्रोधिनी॰३२ दुर्मुखी॰३३ प्रे
तवाहिनी॰३४ कंटकी॰३५ त्राटकी॰३६ यमदूती॰३७ करालिनी॰३८ स्वरांगी॰३९ दीर्घलंबोष्ठी॰४०
मालिनी॰४१ मंत्रयोगिनी॰४२ कालाग्निग्राहिणी॰४३ चक्री॰४४ कंकाली॰४५ भुवनेश्व॰४६ स्का.

१०५ राक्षसी॰४७कार्मुकी॰४८लौकी॰४९काकदृष्टिः॰५०अधोमुखी॰५१भक्षिणी॰५२प्रेरणी॰५३व्याघ्री॰५४
कंकणी॰५५प्रेतभक्षिणी॰५६वीरकौमारिका:॰५७चंडी॰५८वाराही॰५९मुंडधारिणी॰६०कामाक्षी॰६१
उड्डाणी॰६२जालधराय॰६३महाल॰६४ततःसुवर्णादिपात्रेणफलपुष्पजलयुतंअर्घ्यंनाममंत्रेणप्र
त्येकंदद्यात्॥रात्रिंमिनयेत्॥प्रातःपीठदेवताःसपूज्य॰अग्निप्रतिष्ठाप्यान्वादध्यात्॥मममातरःअ
ष्टोत्तरंअष्टोत्तरंआज्याहुत्यायोगिनीश्चएकैकयाज्याहुत्याब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये॥
पूजामंत्रेणहोमः॥होमस्तकृताकृतः॥ततःसप्तमिथुनानिवस्त्रादिनासंपूज्यवस्त्रदक्षिणाप्रति
मायुतान्सप्तकलशान्तेभ्योदद्यात्॥तत्रमंत्रः॥सोपस्करंचकलशंगृहाणद्विजसत्तम॥प्रीयतां
मातरोमह्यंलोकानांस्थितिहेतवः॥ततःयोगिनीपीठंआचार्यायदत्वाव्रतपूर्तयेअष्टोगाःतेभ्यो १०५

दत्वासदन्नेनसंतर्प्याशिषोगृहीत्वाभुंजीत॥ ॥इतिपिठोराव्रतं॥ ॥अथविष्णुपंचकव्रतं॥विष्णु
धर्मान्तरे॥तत्रग्रहणविधिः॥भाद्रपदशुद्धद्वादश्यांयदाश्रवणर्क्षंतदारभ्यवर्षपर्यंतंकार्यं॥अथवा
मार्गेश्वरयदाश्रवणर्क्षंतदारभ्यवाकार्यं॥मासेपंचउपोषणानि॥श्रवणे॥एकादशीद्वये॥अमावां
पौर्णिमायांविष्णुसंपूज्यउपवसेत्॥एवंसंवत्सरंकुर्यात्॥अंतेद्वादश्यांउद्यापनंकुर्यात्॥तद्यथा॥
तिथ्यादिसंकीर्त्य॥आत्मनःपंचमहापातकसमपातकोपपातकक्षयपूर्वकविष्णुलोकप्राप्तिद्वारा
श्रीविष्णुप्रीत्यर्थंआचरितस्यवर्षपर्यंतंविष्णुपंचकव्रतस्यपूर्णतासिद्ध्येतदुद्यापनंकरिष्ये॥इति
संकल्प्यव्रताचार्यःसर्वतोभद्रपंचकलशान्प्रतिष्ठाप्यतदुपरिसौवर्णाःविष्णोःपंचप्रतिमाःमं
त्रपंचकेनप्रतिष्ठापयेत्॥क्रमेणमंत्राः॥त्रीणिपदाश्रवणर्क्षकलशेनद्विष्णोरितिशुक्लैकादश्यांक

१०७ लशेतद्द्विमासोविपन्यथोपौर्णिमाकलशोअनोदेवेतिकृष्णैकादश्याकलशेइदंविष्णुरितिअमा
कलशेततःक्रमेणकलशपंचकोष्ठादशतत्तद्देवताःपरितःआवाहयेत्॥गोवर्धनधरं॥अनंतं
पुंडरीकाक्षं॰नित्यं॰वेदगर्भं॰यज्ञं॰पुरुषं॰सुब्रह्मण्यं॰जयं॰शौरिं॰वैकुंठं॰गरुडध्वजं॰श्र
वणस्य॥केशवं॥नारायणं॥माधवं॥गोविंदं।विष्णुं॥मधुसूदनं।त्रिविक्रमं।वामनं।श्रीधरं।हृषी
केशं।पद्मनाभं।दामोदरं।शुक्लैकादश्याः।विधुं।शशिनं।शशांकं।चंद्रं।सोमं।उडुपं।मनोरमं।अ
मृतं।पावनं।हिमकृतं।निशाकरं।आप्यायनं।पौर्णिमायाः।संकर्षणं।वासुदेवं।प्रद्युम्नं।अनि
रुद्धं।पुरुषोत्तमं।अधोक्षजं।नारसिंहं।अच्युतं।जनार्दनं।उपेंद्रं।हरिं।कृष्णं।कृष्णैकादश्याः।मही
धरं।जगन्नाथं।देवेंद्रं।देवकीसुतं।चतुर्भुजं।गदापाणिं।सुरेशं।सुलोचनं।चार्वंगं।चक्रपाणिं। १०७

सुरमित्रं।असुरांतकं।अमायाः।एवंषोडशोपचारैःपूर्वोक्तपंचमंत्रैःसंपूज्यपक्षिनामभिः
षष्टिनमस्कारान्कृत्वारात्रिंनिनयेत्॥प्रातःअग्निंप्रतिष्ठाप्यान्वादध्यात्।विष्णुघृताक्तापूपाय
सघृतपंचामृततिलद्रव्यैःप्रत्येकंअष्टोत्तरशतसंख्याकाहुतिभिःश्रवणदेवताःघृताक्तापूपैःशु
क्लैकादशीदेवताःगुडपायसेनपौर्णिमादेवताःघृतपायसाभ्यांकृष्णैकादशीदेवताःपंचामृतति
लोदनैःअमादेवताश्चतिलमुद्गगुडोदनैःप्रत्येकएकैकयाज्याहुत्याब्रह्मादिदेवताश्चएकैकयाज्या
हुत्यायक्ष्ये।ततःआचार्यंसंपूज्यपीठंव्रतपूर्त्यर्थंगांचदत्वाविभवेसतिसत्सवत्सीभूमिंचदत्वाअन्यपं
चब्राह्मणेभ्योगोमेदंपुष्परागंवैडूर्यंनीलंमाणिक्यंचेतिपंचरत्नानिदक्षिणापुरःसरंरत्नानिसहि
रण्यानीतिमंत्रेणदत्वापश्चिब्राह्मणान्परमान्नेनसंतर्प्याशिषोगृहीत्वाभुंजीत।एवंकृतपंचमहा

१०८ पातकादिभ्यो मुक्तो भवति॥ ॥इति विष्णुपंचकव्रतसमाप्तं॥ ॥इति श्रीमत्पवित्रपावनकुलाब्धि
संभवधारोपनामकवल्लालसूरिसूनुशंकरविरचितायां व्रतोद्यापनकौमुद्यां तिथिव्रतानि समाप्तं॥
॥ ॥अथ चातुर्मास्यादिव्रतानि॥ तत्र स्वस्तिकव्रतं भविष्ये॥ आषाढाआश्विनांतं॥ तत्र विधिः॥ दे
वालये गोष्ठे तुलस्यालये गृहे वा गोमयोपलिप्य शुद्धभूमौ पंचरंगकैर्वर्णैः प्रत्यहं सहस्रं स्वस्तिकानि
लिखित्वा तत्र गोपालं संपूजयेत्॥ एवं चरित्वा अंते उद्यापनं कुर्यात्॥ तद्यथा॥ तिथ्यादि संकीर्त्यात्म
मनः शत्रुजयपापक्षयवैधव्यादिनिरसनपूर्वकपुत्रपौत्रसौभाग्यारोग्यावाप्तिद्वारा आचरितस्य
स्वस्तिकव्रतस्य पूर्णतासिद्ध्यर्थं गोपालप्रीत्यर्थं च तदुद्यापनं करिष्ये॥ ततः व्रताचार्यः सर्वतोभद्रस्थ
कलशे हेमं गोपालं इदं विष्णुरिति मंत्रेण संस्थाप्य पूजयेत्॥ प्रातः अग्निं प्रतिष्ठाप्यान्वाधानात्॥ गो १०८

पालं स्वस्तिकदशांशेन शतांशेन वा॥ घृताक्तपायसद्रव्येण ब्रह्मादिदेवताभ्यः एकैकयाज्याहुत्याय
क्ष्ये॥ होममंत्रः॥ स्वस्त्ययनं तार्क्ष्यमिति पौराणमंत्रस्य॥ स्वस्तिनाम परं देवं स्वस्तिकारणकारणात्॥
स्वस्तये पायसं पद्मसंयुक्तं च ममाश्नये स्वाहेति॥ होमदशांशेन तर्पणं होममंत्रेण तद्दशांशेन ब्राह्म
णभोजनं॥ ततः विशिष्टं दश ब्राह्मणान् वस्त्रादिना संपूज्य तेभ्यः पंचरंगयुतानि और्णानि अभावे द
र्भजान्यपि आसनानि दक्षिणापुरःसरं दत्त्वा पीठं सोपस्करं आचार्याय दत्त्वा व्रतपूर्तये गोमिथुनं दत्त्वा
अधिकफलावाप्तये यवानां द्रोणं तदभावे आढकीनां द्रोणं दत्त्वा पक्वान्नैः ब्राह्मणान् सतर्प्याशिषो गृही
त्वा स्वयं भुंजीत॥ ॥इति स्वस्तिकव्रतं॥ अथ श्रावणसम्भृगुवारे वरलक्ष्मीव्रतं॥ भविष्ये॥ तिथ्यादि सं
कीर्त्य॥ आत्मनः अतुलसौभाग्यपुत्रपौत्रादि प्राप्तिपूर्वक अधिक लक्ष्मी प्राप्तये वरलक्ष्मीव्रतं करि

१०९ ध्ये॥ इति संकल्प्य॥ शुद्धभूमौ चतुर्द्वारोपशोभितमंडपे पंचरंगशोभितवेदिकायां प्रस्थतंडुलस्थक
लशस्थशोपरि हैमीं लक्ष्मीप्रतिमां सत्कुभिचतितउनेत्यनेन मंत्रेण आवाह्य श्रीसूक्तेन पूजयेत्॥
तत्पुरतः एकविंशतितंतुमितं हरिद्रारंजितं दोरकं पूजयेत्॥ अथांगपूजा॥ वरलक्ष्म्यै नमः॥ पादौ॰
कमलवासिन्यै॰ गुल्फौ पू॰ पद्मालयायै॰ जंघे पू॰ श्रियै॰ जानुनी पू॰ इंद्राण्यै॰ ऊरू॰ हरिप्रिया
यै॰ कटिं॰ लोकमा॰ नाभिं॰ शंखनिध्यै॰ हस्तौ॰ त्रैलोक्यपावन्यै॰ कंठं॰ मायायै॰ मुखं॰ प्राज्ञ्यै॰
नासिं॰ पद्मनिध्यै॰ नयने॰ भार्गव्यै॰ कर्णौ॰ क्षीरसागरजायै॰ ललाटं॰ वरलक्ष्म्यै॰ शिरः॰ म
हालक्ष्म्यै॰ सर्वांगं॰ ततः अश्वत्थचूतबिल्वदाडिममालतीनां प्रत्येकं एकविंशतिपत्रैः वरलक्ष्म्यै
नमः इत्यनेन पूजयेत्॥ एकविंशति अपूपपायसनैवेद्यं॥ पुनः अर्घ्यं॥ क्षीरार्णवसुते लक्ष्मीचं १०९

द्रस्यैव सहोदरि॥ गृहाणार्घ्यं महालक्ष्मि देवि तुभ्यं नमो नमः॥ ततः दोरकग्रहणं॥ सर्वमंगलमां
गल्ये सर्वपापप्रणाशिनि॥ दोरकं प्रतिगृह्णाति सुप्रीता भव मे शुभे॥ ततः कंठे दोरकबंधनं॥ क
रिष्यामि व्रतं देवि त्वद्भक्तिस्त्वत्परायणा॥ श्रियं देहि यशो देहि सौभाग्यं देहि मे शुभे॥ ततः प्रार्थये
त्॥ प्रयच्छ पुत्रपौत्रांश्च विष्णुवक्षस्थलेनघे॥ श्रियं देहि यशो देहि सौभाग्यं देहि मे शुभे॥ ततः प्रा
र्थयेत्॥ प्रयच्छ पुत्रपौत्रांश्च विष्णुवक्षस्थलेनघे॥ श्रियं देहि यशो देहि सर्वान्कामान्प्रयच्छ मे॥ ततः
वायनपंचकं दद्यात् क्रमेण॥ विप्राय यतये देव्यै ब्रह्मचारिणे सुवासिन्यै॥ तत्र मंत्रः॥ एकविंशतिप
क्वान्नशर्कराघृतसंयुतं॥ वायनं ते प्रयच्छामि इंदिरा प्रीयतां मम॥ ततः क्षमाप्य ब्राह्मणसुवासिनीः
सदंनेन संतर्प्य शक्तौ सत्यां गांदत्वा मौनेन भुंजीत॥ अत्र व्रतेनानेन देवि तुष्टा न वा तत्र परीक्षा॥ नागव

१११ ष्ठीदलं त्वेकं क्रमुकं चूर्णवर्जितं ॥ भक्षयित्वानु चैलांते बध्वा प्रातर्निरीक्षयेत् ॥ आरक्ते सति सुप्रीता
देवी ज्ञेया विचक्षणैः ॥ अन्यथा तद्व्रतं कुर्यात्सर्वदा भूमिरक्षिता ॥ ॥इति बस्तलक्ष्मीव्रतं ॥ ॥आ
श्विनशुक्लपक्षांत्यभानुवासरमारभ्य माघशुक्लसप्तम्यावधि दानाफलव्रतं ॥ स्कांदे ॥ तिथ्यादि संकी
र्त्य ॥ आत्मनः सत्पुत्रप्राप्तिपूर्वकसुखारोग्यतासिद्धिद्वारा सवितृप्रीत्यर्थं दानाफलव्रतं करिष्ये ॥
इति संकल्प्य गोमयेनोपलिप्य शुद्धभूमौ ताम्रपीठे सवितारं आवाह्य पूजयेत् ॥ तत्र ध्यानं ॥ ध्येयः
सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः ॥ केयूरवान्मकरकुंडलवान्किरि
टी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥ जगन्नाथाय० आवाह० पद्मासनाय० आस० ग्रहपतये०
पाद्यं० तमोहन्त्रे० अर्घ्यं० मित्राय० आच० विश्वतेजसे० स्नानं० जगत्पतये० वस्त्रं० त्रिमूर्तयेन० ११०

उप० हरये० गंधं० सूर्याय० अक्षता० भास्कराय० पुष्पं० अहःपतये० धूपं० अज्ञाननाशिने० दीपं०
लोकेशाय० नैवेद्यं० विश्वतेजसे० तांबूलं० सूर्याय० दक्षिणां० विश्वतेजसे० नीराजनं० भास्कराय० मंत्रपु०
ष्पं० प्रद० सर्वात्मने० नमस्कारा० ततः द्वादशार्घ्याणि ॥ ताम्रादिपात्रे जलाक्षतपुष्पादि प्रक्षिप्य
दद्यात् ॥ दिवाकर नमस्तुभ्यं पापं नाशय भास्कर ॥ त्वमीमयार्कविश्वात्मन् गृहाण० ततः ब्राह्मणं संपू
ज्य देवं विसर्जयेत् ॥ स्वयं तैलाम्ललवणबहुबीजफलादिवर्ज्यं भोजनं कुर्यात् ॥ कंदमूलफलाहारेण
विशेषफलं ॥ एवं प्रतिभानुवासरं माघसितसप्तम्यावधि कर्तव्यं ॥ ततः उद्यापनं ॥ तत्र षष्ठ्या उपोष्य
प्रातः स्नात्वा पूर्वं संकल्प्य उक्तासंपूर्णतासिद्ध्यर्थं तदुद्यापनाख्यं कर्म करिष्ये ॥ इति संकल्प्य ततः व्रताचा
र्यः मध्याह्ने सर्वतोभद्रस्थकलशोपरि हैमं रौप्यरथस्थं सूर्यं आकृष्णेनेति मंत्रेण संस्थाप्य पूर्ववत्पूजयेत् ॥

१११ ततः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ सवितारं घृताक्तपायसद्रव्येण सहस्रं अष्टोत्तरशतं वा तत्सं
ख्याकाहुतिभिः॥ ब्रह्मादिदेवताभ्य एकैकयाज्याहुत्या यक्ष्ये॥ ततः पायसपूरितकांस्यपात्रं पीठं
व्रतपूर्त्यर्थं गां च आचार्याय दत्वा परमान्नेन द्वादश ब्राह्मणांस्तर्पयेदिति॥ एवं कुर्यात्संचवर्षपं
चधान्यं ततोर्पयेत्॥ पंचप्रस्थप्रमाणं चसफलं दक्षिणान्वितं॥ क्रमेण पंचवर्षेषु॥ व्रीहयः॥ गोधू
माः॥ लवणं॥ तिलाः॥ माषाः॥ एवं कृते सकलमनोरथावाप्तिर्भवति॥ ॥इति शानाफलव्रतं॥
अथ धारणपारणव्रतं भविष्ये॥ चातुर्मास्यैकादशीमारभ्य मासचतुष्टयं मासं वा कार्यं॥ तिथ्यादि
संकीर्त्य आत्मनः बंधुवधादिजनितपापक्षयपूर्वक उत्तमलोकप्राप्त्यर्थं धारणपारणव्रतं करि
ष्ये॥ इति संकल्प्य॥ गणेशं संपूज्य विष्णुपीठे अष्टाक्षरमंत्रेण षोडशोपचारैः संपूज्य एकादश्यां १११

उपवसेत्॥ प्रातः स्नात्वा देवं संपूज्य अष्टाक्षरमनुं अष्टोत्तरशतं जप्त्वा तेनैव अष्टोत्तरशतं दद्यात्॥ दत्वा
ब्राह्मणभोजनपुरःसरं मौनी स्वयं भुंजीत॥ एवं मासं चरित्वा एकादश्यां उद्यापनं कुर्यात्॥ उक्तप्रकारेण
व्रताचार्यः सर्वतोभद्रस्थकलशे हैमं लक्ष्मीनारायणं विष्णोर्नुकमिति मंत्रेण संस्थाप्य पंचामृतपुरःसरं
संपूज्य रात्रिं जागरेणैव नयेत्॥ प्रातः अग्निं प्रतिष्ठाप्य अन्वादध्यात्॥ विष्णुं निषुसीदेति मंत्रेण तिलौदनेन
अराधिकाणे इति मंत्रेण घृतौदनेन अष्टाक्षरमंत्रेण पायसेन च अष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्मादि
देवताभ्य एकैकयाज्याहुत्या यक्ष्ये॥ ततः प्रतिमासं पंचदश ब्राह्मणांस्तदन्नेन संतर्प्य पीठं व्रतपूर्त्यर्थं गां च
आचार्याय दत्वा स्वयं भुंजीत॥ इति धारणपारणव्रतं॥ ॥आश्विनशुक्लैकादशीमारभ्य मासपर्यंतं मासो
पवासव्रतं॥ ॥विष्णुरहस्ये॥ तिथ्यादि संकीर्त्य आत्मनः अशेषपापक्षयपूर्वकचतुर्विधपुरुषार्थसिद्धि द्वा

११२ रामहाविष्णुप्रीत्यर्थंमासोपवासव्रतंकरिष्ये॥ प्रत्यहंत्रिकालस्नानंविष्णुमंत्रजपः विष्णुपूजनंतुलसीदला
नांअर्पणंअसदालापवर्जनंपुराणपठनंश्रवणंचब्राह्मणभोजनंयथाशक्तिनंचएवमादिनियमान्कुर्या
त्॥ अंतेएकादश्यांउद्यापनंकुर्यात्॥ उक्तप्रकारेणव्रताचार्यःसर्वतोभद्रस्थकलशोदेवंलक्ष्मीनारायणं
सहस्रशीर्षेतिऋचाद्वादशाक्षरमनुनावासंस्थाप्यपुरुषसूक्तेनपूजयेत्॥ कथाश्रवणादिनारात्रिंनीत्वा
प्रातःअग्निंप्रतिष्ठाप्यान्वादध्यात्॥ लक्ष्मीनारायणंपायसद्रव्येणसहस्रसंख्याकाहुतिभिःब्रह्मा
दिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये॥ ततःपीठंगांचआचार्यायदत्वावेदशास्त्रानांत्रिंशत्ब्राह्मणा
न्वस्त्रपात्रभूषणादिभिःसंपूज्यत्रिंशत्गाः तन्मोल्यंवादक्षिणालेनदत्वासोपस्करांशय्यांगुणवते
ज्ञानवनेद्विजायदत्वासदन्नेनद्विजान्संतर्प्यआशिषोगृहीत्वाविष्णुलोकगमनार्थंद्विजान्प्रार्थयेत्॥ ११२

भोजद्विजाअनुमोदध्वंविष्णुलोकंव्रजाम्यहं॥ ततःद्विजाःप्रतिवदेयुः॥ व्रजव्रजनरश्रेष्ठविष्णु
लोकमनामयं॥ विमानेवैष्णवंदिव्यंसर्वैश्वर्यंपरिकल्पितं॥ तेनविष्णुपदंयाहिसच्चिदानंदरूपि
णं॥ ततःदीनानाथान्संतोष्यस्वयंमौनीभुंजीत॥ अशक्तेनतुकंदमूलफलमोभक्षणादिनाकर्त
व्यं॥ सर्वपापमुक्तोभवति॥ ॥इतिसोपवासव्रतं॥ ॥अथचातुर्मास्येअवश्यंत्याज्यानिलिख्य
ते॥ श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा॥ दुग्धंआश्वयुजेमासिकार्तिकेद्विदलंत्यजेत्॥ इतिस्का
दात्॥ भविष्ये॥ द्विदलंबहुबीजंचवृंताकंजंबीरंराजमाषंरक्तमूलकंकूष्मांडंबदरीनूतनतिंतिणी
धात्रीपटोलंमसूरंकुलित्थंकलिंगंबिल्वंउदुंबरभिःसटाप्राण्यंगंचूर्णंभूमिजलंलवणंनिष्पावान्सं
धितानि॥ अन्यान्यपिनिषिद्धानित्याज्यानि॥ प्रत्येकंमासपर्यंतंतत्अंतेब्राह्मणायदत्वाव्रतपूर्तये

११२ गां च दत्वा स्वयं स्वयं भुंजीत॥ अन्यान्यपि व्रतानि सोद्यापनानि लिख्यंते॥ ॥तदुक्तं भविष्ये॥ ॥
सर्वेषां कार्त्तिक्यां उद्यापनं तत्र नक्तव्रते गौर्देया॥ एकांतरोपवासे गौः॥ भूशयने शय्या॥ षष्ठकाल
भोजने गौः॥ व्रीहिगोधूमादिधान्यत्यागे हैमव्रीह्यादि॥ शाकाशने गौः॥ पयोमधुदधिघृतत्यजने शुक्लवा
सोयुगं गौश्च॥ ब्रह्मचर्ये हैमविष्णुमूर्तिः॥ सोयुगं॥ मौने घृतकुंभं वस्त्रयुगं घंटां च॥ देवाग्रे रंगमालि
काकरणे धेनुः हैमपद्मं च॥ देवालये दीपकरणे दीपिका वासोयुगं च॥ भूमिभोजने पर्णभोजने च
कांस्यपात्रं गौश्च॥ चतुष्पथदीपकरणे गौः॥ गोग्रासे वृषभं॥ देवादीनां स्नानप्रदक्षिणाकरणे वस्त्रं॥
एवमेव अन्यवस्तुत्यागे गौर्देया॥ ॥अथ वारव्रतानि॥ सौरधर्मे॥ तत्र मार्गशीर्षादि रविवारे सूर्य
व्रतं॥ तिथ्यादि संकीर्त्य॥ आत्मनः रोगक्षयपुत्रलाभादिप्राप्तिपूर्वकअभीष्टकामसिध्यर्थं वर्षात्म ११२

कं सूर्यव्रतं करिष्ये॥ इति संकल्प्य॥ गोमयोपलिप्तभूमौ पंचरंगैः द्वादशारं पद्मं विलिख्य तत्र ता
म्रपात्रं निधाय तन्मध्ये रक्तचंदनादि पद्मं विलिख्य तत्र वक्ष्यमाणरीत्या सूर्यं संपूजयेत्॥ मार्गशी
र्षादि द्वादशमासेषु क्रमेण देवतानाम अर्घ्यनैवेद्यस्वभक्षणदानं च ज्ञेयं॥ तत्र मार्गे मित्रं नारिकेला
र्घ्यं॥ साज्यगुडतंदुलनैवेद्यं॥ तुलसीपत्रत्रयं भक्षणं॥ साज्यगुडभक्तदानं॥ पौषे॥ विष्णुं॥
बीजपूरं॥ कृसरान्नं॥ पलत्रयघृतं॥ घृतं च॥ माघे॥ वरुणं॥ पूगीफलं॥ तिलगुडं॥ मुष्टित्रयं
तिलाः॥ सगुडकुडवतिलाः॥ फाल्गुने॥ सूर्यं॥ जंबीरं॥ सघृतं दधि॥ पलत्रयं दधि॥ दधिमंडलाः॥
चैत्रे॥ भानुं॥ दाडिमं॥ घृतपूरिका॥ पलत्रयं दुग्धं॥ मिष्टान्नं॥ वैशाखे॥ तपनं॥ द्राक्षा॥ सघृतं मा
षान्नं॥ अंगुष्ठार्घ्यं॥ गोमयं॥ माषाः॥ ज्येष्ठे॥ इंद्रं॥ सकेदारं॥ करंभकं॥ अंजलित्रयं॥ जलं॥ द

११४ ध्योदनं॥ आषाढे॥ रविं॥ जातीफलं॥ पृथुकाः॥ मरीचित्रयं॥ पृथुकाः॥ श्रावणे॥ गभस्तिमंतं॥
चपसीफलं॥ यवसक्तु॥ मुष्टित्रयं यवसक्तु॥ यथेष्टं भोजनं॥ भाद्रपदे॥ यमं॥ कुष्मांडं॥ तंदुला
ज्यं॥ पदद्वयं गोमुत्रं॥ भोजनं॥ आश्विने॥ हिरण्यरेतसं॥ दाडिमं॥ शर्करा॥ पलत्रयमितश
र्करा॥ शर्कराभक्तं॥ कार्त्तिके॥ दिवाकरं॥ रंभाफलं॥ पायसं॥ पायसं॥ पायसं॥ एवं वर्षपर्यं
तं चरित्वा॥ ॥अंते मार्गशीर्षाद्यरविवासरे उद्यापनं कुर्यात्॥ ॥उक्तप्रकारेण व्रताचार्यः॥ म
ध्याह्ने सर्वतोभद्रे कलशं प्रतिष्ठाप्य॥ तदुपरि रक्ताक्षतयुतं ताम्रमयं पूर्णपात्रं निधाय तत्र द्वादशा
रं कमलं विलिख्य तन्मध्ये रौप्यमयं रथं प्रतिष्ठाप्य तदुपरि हैमं॥ संज्ञासहितं॥ सहस्रकिरणं आ
कृष्णेनेति प्रतिष्ठाप्य॥ परितः द्वादशदलेषु द्वादशमासाधिपान् क्रमेण पूजयेत्॥ मित्रं॥ विष्णुं ११४

वरुणं॥ सूर्यं॥ भानुं॥ तपनं॥ इंद्रं॥ रविं॥ गभस्तिं॥ यमं॥ हिरण्यरेतसं॥ दिवाकरं॥ ततः रक्ताक्ष
तपुष्पवस्त्रादिभिः संपूज्य परमान्नं नैवेद्यं दत्वा विशेषार्घ्यं नारिकेरयुतं दद्यात्॥ तत्र मंत्रः॥ नमः
सहस्रकिरण सर्वव्याधिविनाशन॥ गृहाणार्घ्यं मया दत्तं संज्ञया सहितो रवे॥ एवं पूजां समाप्य॥
ततः सूर्यदैवत्यं श्राद्धं कृत्वा ततः आचार्यः प्रतिष्ठाप्य॥ अन्वारभ्यात्॥ संज्ञानसहितं सहस्रकि
रण पायसद्रव्येण अष्टोत्तरशतसंख्याकाहुतिभिः॥ द्वादशपरिवारदेवताः ब्रह्मादिदेवताश्च एकै
कयाज्याहुत्या यक्ष्ये॥ ततः द्वादश ब्राह्मणान् पूर्वोक्तद्वादशनामभिः वस्त्राद्यदक्षिणादिना संपू
ज्य आचार्याय पीठं गां च दत्वा परमान्नेन ब्राह्मणान् संतर्पयेत्॥ ॥इति सूर्यव्रतं॥ ॥अथ आ
शादित्यव्रतं॥ भविष्ये॥ आश्विनाद्यरविवारमारभ्य प्रतिरविवारपर्यंतं कुर्यात्॥ तिथ्यादि संकी

११५ र्यआत्मनःसकलभोगनिरसनपूर्वकपुत्रपौत्रसकलाभीष्टसिद्धिद्वारासवितृप्रीत्यर्थंआश्वा
दित्यव्रतंकरिष्ये॥इतिसंकल्प्य॥गोमयोपलिप्तभूमौरक्तचंदनादिनावर्तुलमंडलंविलिख्य
तत्रमासादित्यदेवंआवाह्यषोडशोपचारैःसंपूज्यरक्तपुष्पाक्षतादियुतंसजलंअर्घ्यंताम्रपा
त्रेणभूमौजानुनीनिपात्यदद्यात्॥तत्रमंत्रः॥यथाशाविमलाःसर्वाःनभोभास्करभास्करभानु
भिः॥तथाशाविमलामह्यंकुरुनित्यंममार्घ्यतः॥ततःनमस्कारः॥नमोस्तुतेपापविनाशनाय
विश्वात्मनेसप्ततुरंगमाय॥सामऋग्यजुर्धामनिधेविधात्रेभवाब्धिपोतायनमःसवित्रे॥अ
नेनमंत्रेणमासाधिपनाममंत्रेणवापूजाकार्या॥मासाधिपनामानि॥सूर्यः॥सूर्यः॥धाता॥
वरुणः॥माधवः॥हरिः॥रविः॥रुद्रः॥भर्गः॥स्वर्णरेताः॥अर्यमा॥भानुः॥भास्करः॥एवं ११५

प्रतिप्रतिभानुवारंवर्षपर्यंतंचरित्वाअंतेआश्विनाद्यरविवारेउद्यापनंकुर्यात्॥तद्यथा॥पूर्वोक्तसंक
ल्प्यंतंवृत्वाचार्यःसर्वतोभद्रेरक्तवस्त्रवेष्टितंताम्रकलशंप्रतिष्ठाप्यतत्रताम्रमयंपूर्णपात्रंनिधायतत्रर
क्ताक्षतैःतत्रद्वादशारंपद्मंविलिख्यतन्मध्येरौप्यरथेहेमंसवितारंआकृष्णेनेतिसंस्थाप्यपरितःद्वादश
दलेषुपूर्वोक्तद्वादशमासाधिपान्प्रतिष्ठाप्यउक्तप्रकारेणपूजयेत्॥ततःअग्निंप्रतिष्ठाप्य॥अन्वादध्या
त्॥अत्रप्रधानं॥सवितारंपायसद्रव्येणअष्टोत्तरशतसंख्याकाहुतिभिः॥मासाधिपद्वादशदेवताःब्र
ह्मादिदेवताश्चयथैकैकयाज्याहुत्यायक्ष्ये॥ततःपूर्वोक्तद्वादशनामभिःद्वादशब्राह्मणान्वस्त्रादिनासंपू
ज्यतेभ्यःशालितंडुलसंभवैःपक्वान्नैःतंडुलैर्वापूरितान्रक्तकलशान्रक्तवस्त्रदक्षिणायुतान्दत्वाआ
चार्यायपीठंगांचदत्वासत्नेनद्विजान्संतर्प्यआशिषोगृहीत्वास्वयंनक्तंवाग्यतःस्वयंभुंजीत॥अत्रपाय

११५ संपूरितां ताम्रपात्रदानं युक्तं स्कांदे होमकरणमपि कृत्वा कृतं॥ मेवं कृते व्याध्यादि दुःखैर्विमुक्तो भवति
॥ ॥इति रविवारव्रतं॥ ॥अथ सोमवारव्रतं स्कांदे तत्र चतत्स्हद्रूणविधीः श्रावणे चैत्रे वैशाखे ज्येष्ठे च मा
र्गशीर्षके॥ एतेषां अन्यतमासेषु शुक्लपक्षे इंदुवारसुताष्टम्यां वा ग्राह्यं॥ अथवा प्रथमसोमवारे यावज्जी
वं कर्तव्यं॥ अथवा अष्टवर्षपर्यंतं कर्तव्यं॥ अंते उद्यापनं कुर्यात्॥ ॥तद्यथा॥ तिथ्यादि संकीर्त्य॥ आ
त्मनः अशेषपापक्षयपूर्वक सत्पुत्रप्राप्ति नंदान्यादिभिः॥ इद्धिद्वारा अमुककामनया वा आचरितस्य
सोमवारव्रतस्य सांगतासिद्ध्यर्थे तदुद्यापनं करिष्ये॥ व्रताचार्यः चतुर्द्वारोपशोभितमंडपांतः अशेदशां
गुलोत्सेधां वितस्तीद्वयविस्तृतां समचतुरस्रां मृदा वेदिं निधाय॥ तत्र शुक्लतंदुलैः षोडशोपकारं कम
लं विलिप्य॥ अथवा लिंगतो भद्रं विलिख्य तत्र ब्रह्मादिदेवताः आवाह्य तदुपरि अक्षतपुंजे श्वेतव ११५

स्त्रयुगोपेतं कलशं प्रतिष्ठाप्य तदुपरि साक्षतं पूर्णपात्रं निधाय तत्र हेमं शिवं त्र्यंबक मिति मंत्रेण दे
मीं गौरीं च गौरीर्मिमाय इति मंत्रेण पुरतः राजतं वृषभं माइ इति मंत्रेण प्रतिष्ठाप्य॥ परितः पूर्वादिक्र
मेण॥ अनंतं॥ सूक्ष्मं॥ शिवं॥ उत्तमं॥ त्रिमूर्त्तिं॥ रुद्रं॥ श्रीकंठं॥ खंडिनं॥ पुनः आग्नेय्यादि विदिक्षु॥
गणेशं॥ मातृः॥ दुर्गां॥ क्षेत्रपालं॥ पुनः पूर्वतः॥ लोकेशान् तत्तन्मंत्रैः प्रतिष्ठाप्य॥ पंचाक्षर्या पूजयेत्॥
पुष्पोत्तरं अंगपूजा॥ शिवाय॰ पादौ पू॰ शंकराय॰ गुल्फौ॰ भवहारिणे न॰ जानुनी॰ शूलपाणये॰
कटिं॰ स्वयंभुवे॰ गुह्यं॰ महादेवाय॰ नाभिं॰ विश्वकर्त्रे॰ उदरं॰ सर्वतोमुखाय॰ पार्श्वौ॰ स्थाण
वे न॰ स्तनौ॰ नीलकंठा॰ कंठं॰ देवाय॰ मुखं॰ त्रिनेत्राय॰ नेत्रे॰ शर्वाय॰ ललाटं॰ शशिभूषणाय॰
शिरः॰ देवाधिदेवाय॰ सर्वांगं पू॰ एवं संपूज्य॥ रात्रिजागरणादिना नीत्वा प्रातः अग्निप्रतिप्रतिष्ठा

११७ यः॥ अन्नाद्ध्यात्॥ सोमं॥ शिवं॥ त्र्यंबकमितिमंत्रेण पलाशसमिद्भिः आप्यायस्वेतिमंत्रेण घृ
ताज्येन त्वंसोमासीतिमंत्रेण यवव्रीहिपायसतिलाज्यद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः
गौरीं च त्रिमध्वाक्तदूर्वाभिः तावतीभिः परिवारदेवताब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये।
कञ्च गौरीहोमं पृथकुनेछति॥ तत~ उशत्रयोदशब्राह्मणान् वक्ष्यमाणनामभिः संपूज्य नाबते
फलपक्वान्नैः अभावे तंडुलैर्वा पूरितां वंशपात्रान् दक्षिणायुतान् दद्यात्॥ षोडशनामभिः सानि सोमेश्वराः
ईशानः शंकरः गिरिजाधवः महेशः सर्वभूतेशः स्मरारिः त्रिपुरारिनकः शिवः पशुपतिः शंभुः
त्र्यंबकः चंद्रशेखरः गंगाधरः महादेवः वामदेवः त्रयोदशपक्षे भवः शर्वः रुद्रः पशुपतिः॥ उग्रः
महान्॥ भीमः॥ ईशान्॥ सद्योजातः॥ वामदेवः॥ अघोरः॥ तत्पुरुषः॥ ईशानः॥ तत्पीठं व्रतपू ११७

तये च बलागां च आचार्याय दत्वा आशिषो गृहीत्वा स्वयं भुंजीत॥ भविष्ये तु प्रकारांतरेण सोम
वारव्रतमुक्तं॥ तत्र व्रतविधिः॥ प्रातः नद्यादौ स्नात्वा अमुककामनया सोमवारव्रतं करिष्ये॥
इति संकल्प्य॥ प्रदोषे पीठं देवं वक्ष्यमाणप्रकारेण संपूजयेत्॥ इदं सोमवारं अष्टंदुवारात्मकं नव
मे सोमवासरे उद्यापनं कुर्यात्॥ तत्र प्रथमसोमवासरे बीजपूरकाष्ठेन दंतधावनं॥ चूतपल्लवचंदना
दियुतं कुंभे साक्षतपात्रे आधारशक्तिसहितं शिवं पंचाक्षर्या प्रतिष्ठाप्य श्वेतवस्त्रपुष्पैः प्रपूज्य
विविधभक्ष्यभोज्यनैवेद्यं बीजपूरकफलं च दत्वा स्वयं चंदनं प्राश्य सोमेशं ध्यायन् दर्भशय्यायां
स्वपेत्॥ भौमवासरे ब्राह्मणभोजनपुरःसरं पारणं कुर्यात्॥ एवं सकृते सर्वव्याधिनाशनं भवति॥
द्वितीयादौ विशेषः लिख्यते। अन्यत् पूर्ववत्॥ स्नानं॥ द्वितीये करंजदंतकाष्ठं ज्येष्ठाशक्तिपु

१९८ तंसुक्षदेवं।शतपत्रंपुष्पं।नीरिंगफलं।घृतपाचितशुभ्रपूरिका।नैवेद्यं।आत्मनः मधुभक्षणं।एवं
कृतेगोलक्षफलप्राप्नोति।तृतीये।वटजदंतकाष्टं।रौद्रशक्तियुतं।शिवोत्तमंदेवं।जातिपुष्पं।शु
भ्रभक्ष्यंनैवेद्यं।दाडिमफलं।गोमूत्रप्राशनं।कन्याकोटिदानफलं।चतुर्थेअपामार्गदंतकाष्टं।ये
कविंशतियुतं।रुद्रदेवं।चंपकपुष्पं।कदलीफलं।क्षीरशर्करानैवेद्यं।दधिप्राशनं।अयुतयज्ञफलं।
पंचमे।अश्वत्थदंतकाष्टं।उमाशक्तियुतंरुद्रदेवं।पद्मपुष्पं।दधिभक्तिनैवेद्यं।कूष्मांडफलं।घृतप्रा
शनं।सप्तजन्मार्जितब्रह्महत्यानाशनरूपफलं।षष्ठे।जंबूदंतकाष्टं।त्रिमुर्तिशक्तियुतंबलदेवं।क
रवीरंपुष्पं।फलपायसमंडकनैवेद्यं।खर्जूरीफलं।कुशोदकप्राशनं।षडब्दफलप्राप्नोति।सप्तमे।
प्लक्षजंदंतकाष्टं।बलप्रमथनीशक्तियुतं।श्रीकंठदेवं।बकुलपुष्पं।पायसनैवेद्यं।नीरीकेरफलं।क्षी १९८

रभक्षणं।सप्तसागरसहितंभूमिदानफलं।अष्टमे।खदिरदंतकाष्टं।सर्वभूतदमनाशक्तियुतंशि
वंचडिनंदेवं।सुगंधपुष्पं।नानाविधफलं।नानाविधभक्ष्यभोज्यंनैवेद्यं।गोमयप्राशनं।सर्वदानो
द्भवफलं।सर्वरात्रौजागरणंपुराणपठनादिअवश्यकं।नवमेसोमवारेउद्यापनंकुर्यात्।तद्यथा।
तिथ्यादिसंकीर्त्यममअभीष्टकामनासिध्यर्थंआचरितंयत्सोमवारव्रतंतत्संपूर्णफलावाप्तयेत
दुद्यापनंकरिष्ये।पूर्ववत्।व्रताचार्यः।चतुर्द्वारोपशोभितमंडपांतः।स्त्रशअष्टांगुलोछ्रितांसमचतु
रस्रांअष्टादशांगुलप्रमाणांवेदींकृत्वातत्रलिंगतोभद्रंविरिच्यवेदीपरिमितः।अष्टदिक्षुपंचवर्ण
र्णैः।पद्मानिविरिच्यवेद्यांब्रह्मादिदेवताआवाह्यतत्रकलशंपूर्ववत्संस्थाप्यतत्ररुक्ममयाश्याया
हैमंसर्वशक्तियुतं।सोमेशं।ॐनमःशिवायेतिमंत्रेणप्रतिष्ठाप्यवेदीपरितः।स्थापनविधिना।अष्टो

११९ कलशान्संस्थाप्यातेषुक्रमेणदेवान्आवाहयेत्।अनंतंसूक्ष्मंशिवंउत्तमांत्रिमूर्तिंरुद्रंश्री
कंठंशिखंडिनं।इतिप्रतिष्ठाप्यपूजयेत्।देवायवस्त्रालंकारनानाविधपुष्पकर्पूरदीपविविधनैवे
द्यफलतांबूलदक्षिणाछत्रचामरादर्शादिसमर्प्य।स्वयंपंचगव्यंप्राश्यपुराणपठनादिनाप्रातःदेवं
संपूज्यअग्निप्रतिष्ठाअन्वादध्यात्।अत्रप्रधानं।सर्वशक्तियुतंसोमेशंपलाशसमित्घृतपायसति
लव्रीहियवमधुदूर्वाद्रव्यैःप्रतिद्रव्यंअष्टोत्तरसंख्याकाहुतिभिः।तथा।अनंतादिशिखंडिअंताअष्टौ
देवताःतैरेवद्रव्यैःअष्टाष्टसंख्याहुतिभिः।ब्रह्मादिदेवताश्चएकैकयाआज्याहुत्यायक्ष्ये।क्रमेणद्रव्याष्ट
कस्यहोममंत्राः।त्र्यंबकं।आप्यायस्वेति।ओंनमःशिवाय।नमीशानं।अभित्वादेवेति।कद्रुद्राय।
तत्पुरुषायविद्महे।ततःऋतंसत्यंपरंब्रह्मेति।परिवारदेवतानांनाममंत्राः।एवंहोमंसंपाद्य।आचार्यंव ११९

स्त्रादिनासंपूज्यपीठंव्रतपूर्त्यैगांचपयस्विनींदत्वाअन्यान्अष्टौब्राह्मणान्अष्टौब्राह्मणान्व
स्त्रादिनासंपूज्यशालितंडुलैद्रव्यपक्वान्नपूरितान्अष्टौकलशान्दक्षिणासहितान्दद्यात्॥तत्रमं
त्रः।पक्वान्नपूरितंकुंभंसदक्षिणादिसमन्वितं।गृहाणत्वंद्विजश्रेष्ठव्रतसंपूर्तिहेतवे॥इतिदत्वा।ब्रा
ह्मणभोजनपुरःसरंस्वयंभुंजीत॥ ॥इतिसोमवारव्रतं॥अथभौमवारव्रतं॥तत्रश्रावणशुक्लप्र
थमभौमवासरेमंगलागौरीव्रतं॥भविष्ये।तिथ्यादिसंकीर्त्यआत्मनःअवैधव्यपुत्रपौत्राद्यैहिकना
नाविधभोगप्राप्तिपूर्वकगौरीव्रतं॥भविष्ये॥तिथ्यादिसंकीर्त्यआत्मनःअवैधव्यंपुत्रपौत्रऐहिक
नानाविधभोगप्राप्तिपूर्वकगौरीलोकप्राप्त्यर्थंआचरितंमत्पंचवर्षात्मकंमंगलागौरीव्रतंतत्संपू
र्णफलावाप्तयेतदुद्यापनंकरिष्ये॥संकल्प्य॥व्रतान्तेआचार्यःयेकलिंगतोदुयेभद्रेब्रह्मादिदेवतास्थापन

पूर्वकं दृषदोपरि कलशं प्रतिष्ठाप्य तत्र हैमीं गौरीं गौरीर्मिमायेति मंत्रेण प्रतिष्ठाप्य पूजयेत्॥ परितः
पिष्टजान् डमरुकोकारान् षोडशतंतुवर्तियुतान् षोडशदीपान् प्रज्वाल्य समानसाग्रान् षोडशपर्व
युतान् षोडशदूर्वांकुरान् तत्समर्प्य सौभाग्यवस्तुजातसमर्प्य कथाश्रवणादिना रात्रिं निनयेत्॥ प्रातः
अग्निं प्रतिष्ठाप्य अन्वादध्यात्॥ गौरीं घृततिलाक्षतबिल्वदलं द्रव्यैः प्रतिद्रव्यं अष्टोत्तरशतसंख्याका
हुतिभिः ब्रह्मादिदेवताश्च एकैकया आज्याहुत्या यक्ष्ये॥ ततः षोडशान्ते चतुरो वा दंपतीन् अभावे एकं
वा संपूज्य सौभाग्यद्रव्यं वस्त्रदक्षिणाफलतांबूलादियुतं पक्वान्नपूरितं वंशपात्रं। उपनयनमिदं दे
वइति मंत्रं पठन् तेभ्यो दत्वा। ततः आचार्याय दत्वा संपूज्य रौप्यपात्रे सुवर्णवर्तसंयुक्तं प्रज्वलितं दीपं
कृत्वा आचार्याय दत्वा सोपस्करं पीठं व्रतपूर्तये गां च दत्वा परमान्नेन भूदेवान् संतर्प्य आशिषो गृही

त्वा मौनी इष्टजनैः सह भुंजीत॥ ॥इति मंगळागौरीव्रतं॥ ॥अथ भौमव्रतं॥ भविष्ये॥ तत्रादौ यंत्रप्रका
रमहा॥ त्रिकोणं पूर्वमुध्दृत्य पंचधा विभजेत्ततः॥ तृतीयरेखा चि— —ध्यां लांछयेत्समभागतः॥ अग्ररे
खाग्रयुतलं तृतीया चिह्नयेयोर्न्यसेत्॥ तृतीयरेखामध्ये तु चिह्नयेत्समभागतः॥ तुर्या चिन्हद्वयेना
थ त्रिभिश्चिह्नैः स्तु पंचमी॥ तृतीये तु प्रकुर्वीत पंचम्या मध्यचिह्नगे॥ तुर्याग्रयोजयेत्सम्यक् पंचम्या
चिह्नयोर्द्वयोः॥ तृतीयरेखामध्यांकात् पंचम्यांश्चिह्नयोर्द्वयोः॥ युक्त्या परम यादद्यात् त्रिकोणा
विंशतिर्भवेत्॥ तृतीयतुर्ययोर्मध्ये त्रिकोणे तु समर्चयेत्॥ एवं रतग्रतो मंत्रान् त्रिकोणे दक्षिणक्रमा
त्॥ मंडलाधानतारपूर्वान्नमोतान् येकविंशतिः॥ येकविष्पंतिकोष्ठेषु नाममंत्रान्समालिखेत्॥ त
तः पूजा प्रकर्तव्या पुत्रसंपत्तिहेतवे॥ ॥इति यंत्रं॥ अथ पूजाविधिः॥ मार्गशीर्षमासे वैशाखे शुभमा

१२१ सेवाशुक्लपक्षे चंद्रानुकूल्ये भौमवासरे अरुणोदयकाले अपामार्गकाष्ठेन दंतधावनं मौनेन कृत्वा॥
आचम्य तिलामलकचूर्णेन अंगोद्वर्तनं कृत्वा नद्यादौ गृहे वा स्नात्वा धौतरक्तवस्त्र रक्तोत्तरीयं च धृ
त्वा संध्यादि विधाय रक्तचंदनरक्ताक्षतै रक्तपुष्पैश्च ताम्रपात्रस्थजलेन अंगारक गायत्र्या अग्निर्मूर्द्धे
ति मंत्रेण वा एकविंशतिवारं अंगारकायार्घ्यं दत्वा ततः गृहं आगत्य आ भूमिपतिनेन मंत्रेण सुरभि
गोमयेन हस्तमात्रां भूमिं विलिप्य तदुपरि स्थाप्ये त्रिकोणं रक्तचंदनेन संविलिख्य तत्र प्रस्थ गोधूम
राशिं कृत्वा तत्र ताम्रपात्रं मृन्मयं वा कलशं संस्थाप्य तदुपरि ताम्रमयं पूर्णपात्रं निधाय रक्तचंदने
न त्रिकोणमंडलं विधाय तत्र ताम्रमयं भूर्जपत्रमयं वा त्रिकोणं एकविंशतिकोष्ठात्मकं एकविंशति
नामयुतं यंत्रं संस्थाप्य पूजासामग्रीं संपाद्य संकल्पं कुर्यात्॥ तद्यथा॥ शुद्धासन उपविश्य प्राणाना १२१

यम्य देशकालौ संकीर्त्य आत्मनः ऋणापनुतिपूर्वक धनधान्यपुत्रपौत्राभीष्टमनोरथसिध्यर्थं मं
गलप्रीत्यर्थं मंगलव्रतं तत्पूजनं च करिष्ये॥ इति संकल्प्य॥ गणेशपूजनं पूर्वकं पुण्याहवाचनादि कृ
त्वा पूजामारभेत्॥ तत्रादौ देवं प्रार्थयेत्॥ अथ देवेशानेभक्त्या करिष्ये तमुत्तमं॥ ऋणदुःखदिनाशा
य पुत्रसंतानहेतवे॥ अभीष्टान् मम देवेश कुरु पूर्णा मनोरथान्॥ ततः भूतशुध्यादि कृत्वा न्यासान् कृ
त्वा॥ ॐ मंगलाय नमः॥ शिखायां॥ भूमिपुत्राय॰ मूर्ध्नि॰ ऋणहर्त्रे॰ ललाटे॰ धनप्रदाय॰ चक्षुषोः॥
स्थिरासनाय॰ कर्णयोः॥ महाकायाय॰ नासिकयोः॥ सर्वकर्मावरोधकाय॰ मुखे॰ लोहिताय॰ द
नौ॰ लोहिताय॰ कंठे॰ सामगानां कृपाकराय॰ स्कंधयोः॥ धरात्मजाय॰ बाह्वोः॥ कुजाय॰ करयोः॥
भौमाय॰ हृदये॰ भूमिदाय॰ उदरे॰ भूमिनंदनाय॰ नाभौ॰ अंगारकाय॰ कटये॰ यमाय॰ ऊर्वोः॥

१२२ सर्वरोगापहारकाय॰जान्वोः॥वृश्चिकर्त्रे नमः॥जंघयोः॰वृष्टिप्रदर्त्रे॰गुल्फयोः॰सर्वकामफल
प्रदाय॰पादयोः॰ततः मांमींमूंमैंमौंमः इति षडाक्षरैः षडंगन्यासं कृत्वा॥स्ववामभागे कलशस्थाप
नं कृत्वा ततः पश्चिमतः स्ववामभागे त्रिकोण षट्कोण वृत्त चतुरस्रात्मके मंडले साधारमर्घ्यपात्रं नि
धाय॥जलेनापूर्य गंधाक्षत पुष्पादि तत्र प्रक्षिप्य मूलेन गायत्र्या वा अष्टवारं अभिमंत्रयेत्॥तद्दक्षि
णे त्रिकोण मंडले साधारं सजलं प्रोक्षणीपात्रं संस्थाप्य गंधपुष्पादि प्रक्षिप्य मूलेन गायत्र्या वा अष्ट
वारं अभिमंत्रयेत॥तज्जलं किंचित् अर्घ्यपात्रे निक्षिप्य धेनुमुद्रां प्रदर्श्य प्रोक्षणीपात्र जलेन आत्मा
नं दक्षिणस्थ पूजाद्रव्याणि प्रोक्ष्य पात्रांतर स्थापित यंत्ररूपदेवं ध्यायेत्॥पिंगाक्षरक्तवर्ण सुरत्नरुद
त्नभं रक्तवस्त्रेण युक्तं मेषारूढ यहेंद्रस्य भिलषित जनैः पूजितं प्रसन्नं ध्यायेदेतान्दधानं वरदकरयुतं शू १२२

लशक्तिगदां च भौमं चैश्वर्यसिध्यै निलखिल निधि विधिं मंतलं चिंतयामि॥येत्येहि भगवन्भौम स्था
ने चात्र स्थिरो भव॥त्वयि सर्वमिदं प्रोतं त्रैलोक्यं सचराचरं॥उज्जिन्यां समुद्भूतं शूलशक्तिगदाधरं॥
भरद्वाजकुलेः त्पन्न स्कंद प्रियनडित्प्रभा॥यावत्पूजा समाप्येत तावत्त्वं संनिधिभव॥पूजां गृहाण व
रदा भव॥ॐ क्रीं श्रीं ल्सं मंमंगलाय नमः॥अथ मूलमंत्रः॥अंगारकाय विद्महे भूमिपुत्राय धीमहि॥
तन्नो भौमः प्रचोदयात्॥इयं गायत्री॥अग्निर्मूर्धे दिति वैदिको मंत्रः॥मंगलं सांगं सपरिवारं आवा
हयामि॥प्रसुपचारं मंत्रत्रयं पठेत्॥भूमिपुत्राय॰आसनं॥धनप्रदाय॰पाद्यं॥स्थिरासनाय॰अ
र्घ्यं॥मंगलायन॰दधिमधुसर्पिर्युतं मधुपर्कं॥महाकालाय॰आचमनीयं॰ऋणहर्त्रे॰पंचामृत॰ततः
गंधादिभिः संपूज्य पुरुषसूक्तेन अभिषेकं कुर्यात्॥सर्वकर्मा विरोधकाय॰शुद्धोदकं॰ततः पूर्वस्थाप

१२२ नविधिनास्थापितेकलशे॥ग्रहवेमानिष्ठेनिप्रतिमास्थाप्यपरितः पूर्वादिक्रमेणपरिवारान्स्थापये
त्॥पूर्वेशक्तिं॥आग्नेयेशूलं॥दक्षिणे॥धेनुः॥नैर्ऋत्यांशरं॥पश्चिमेगदां॥वायव्यांदंडं॥उत्तरेप
द्मनं॥ईशान्यां॥धरां आवाह्यसंदेवपूजयेत्॥लोहिताय०वस्त्रं०लोहिताक्षाय०उपवीतं०सामगा
नांकृपाकराय०धरात्मजाय०पुष्पं०अथएकविंशतिकोष्ठेषुअंगानिएकविंशतिनामभिः पूजये
त्॥मंगलाय०पादौपू०भूमिपुत्राय०गुल्फौ०ऋणहर्त्रे०जंघेपू०धनप्रदाय०जानुनीपू०स्थि
रासनाय०ऊरूपू०महाकायाय०कटिं०सर्वकर्मावरोधकाय०नाभिं०लोहिताय०उदरं०लो
हिताक्षाय०हृदयं०सामगानांकृपाकरा०करौ०धरात्मजायबाहू०कुजायन०स्कंधौ०भौमा
य०कंठं०भूमिदाय०हनुं०भूमिनंदाय०मुखं०अंगारकाय०नासिकां०यमाय०कर्णौ०सर्व १२२

रोगापहारकाय०चक्षुषी०वृष्टिकर्त्रे०ललाटं०वृष्ट्यपहर्त्रे०मूर्धानं०सर्वकामफलप्रदाय०
शिखां०ततः नानापरिमलद्रव्यार्पणं॥कुजाय०धूपं०भौमाय०दीपं०भूमिदाय०गुडमिश्र
गोधूमान्ननैवेद्यं०सोपस्करंवा॥भूमिनंदनाय०फलं०अंगारकाय०तांबूलं०यमाय०दक्षिणां०
सर्वरोगापहारकाय०नीराजनं०नानावैदिकमंत्राणापुरःसरंवृष्टिकर्त्रे०पुष्पांजलिं॥मंत्रैनिपुष्पां
जलिः॥वृष्ट्यपहर्त्रेनमः॥प्रदक्षिणा॥सर्वकामफलप्रदायनमः॥नमस्कारः॥भूमिपुत्रमहातेजाः
स्वेदोद्भवपिनाकिनः॥धनार्थीत्वांप्रपन्नोस्मिगृहाणार्घ्यंनमोस्तुते॥अनेनमंत्रेणरक्तपुष्पाक्षतयुते
नताम्रपात्रस्थयुतेनजलेनएकविंशतिनाम्नांऊह्यःकार्यः॥ततःजपःकार्यः॥अस्यश्रीमंगलमंत्र
स्यविरूपाक्षऋषिः॥त्रिष्टुप्छंदः॥मंगलोदेवता॥मंबीजं॥मादेश्वरोभूमिपुत्रइतिशक्तिः॥ममऋणमोच

नाघभीष्टसिध्यर्थं एकविंशत्ताधिकद्विसहस्रपरिमितजपमहंकरिष्ये॥ मांमींमूंमैंमौंमः॥ अनेन
१२४ करन्यासंत्हृदयादिन्यासंचकृत्वाजपेत्॥ २०००॥ एवंमूलमंत्रंजप्त्वा अंते पूर्ववत्षडंगन्यासंक
करन्यासंत्हृदयादिन्यासंचकृत्वाजपेत्॥ २०००॥ एवंमूलमंत्रंजप्त्वाअंतेपूर्ववत्षडंगन्यासंक
त्वाकवचंचपेत्॥ तद्यथा॥ शिखायांमंगलः पातुभूमिपुत्रस्तुमूर्धनि॥ ललाटेंलक्षणहर्ताचचक्षुषोश्च
धनप्रदः॥ स्थिरासनःश्रवणयोः महाकायस्तुनासिके॥ अस्यजिह्वोष्ठदंतेषुसर्वकामविरोधकः॥
धरात्मजोभु
हर्त्तोमल्लोहितः पातुकंठेलोहितलोचनः॥ स्कंधयोरुभयोरक्षेत्सामगानांकृपाकरः॥ धरात्मजोभु
जौपातुकुजोरक्षेत्करद्वये॥ भौमोमांहृदयेत्पातुभूमिजस्तुस्तनोदरे॥ भूनंदनोथनाभौचकट्यां
अंगारकोवतु॥ सक्थिनीमेयमोरक्षेत्जान्वोरोपहारकः॥ जंघयोर्दैशिकर्त्ताचगुल्फयोः॥ पादांगु
ष्ठौचपादौचसर्वकामफलप्रदः॥ शक्तिमेपूर्वतोरक्षत्शूलरक्षेत्दक्षिणे॥ पश्चिमेमांधनूरक्षेदुत्तरे १२४

चक्रात्तस्तथा॥ उर्ध्वेषडाननः पातुअधस्तात्पृथिवीतथा॥ एवंचकवचंजप्त्वा पश्चाध्यानंसमाचरे
त्॥ अथहोमः॥ तिथ्यादिमुच्चार्य मंगलव्रतांगभूतंकृतजपदशांशेनहवनंकरिष्ये॥ देवताग्रेस
सम्मृदात्रिकोणंस्थंडिलंकृत्वागृह्यविधिनाग्निंप्रतिष्ठाप्यान्वादध्यात्॥ अत्रखादिरःइध्माःप्रधा
नं॥ मंगलंगुडाज्यंमिश्रतिलद्रव्येणकृतजपदशांशेनयक्ष्ये॥ मूलमंत्रेणजुहुयात्॥ खर्जूरीफलेन
पूर्णाहुतिंहुत्वाहोमशेषंसमापयेत्॥ ततः गायत्रीपठित्वामंगलंतर्पयामीतिगोदुग्धेनतर्पणंकुर्या
त्॥ ततवायनं॥ मंगलरूपिणेद्विजायइदंपाद्यमित्यादिसंपूज्यतांबूलदक्षिणासहितान्एकविंश
तिसंख्याकान्गुडउमिश्रिततिलचूर्णलड्डुकान्दद्यात्॥ तत्रमंत्रः॥ मंगलायनमःस्तुभ्यंसर्वमंगल
कारक॥ वायनेनेनचसंतुष्टेममकामान्प्रपूजयेत्॥ अनेनवायनेनऋणमोचनभौमःप्रीयतां॥ ततःखा

CC-0. Manuscripts at Residence of Bal Krishna Sharma, Gwalior

१२५ दिशं गोरकेण ऋणसंज्ञकरेखात्रयं कृत्वा वामपादतलेन मार्जयेत्॥ तत्र मंत्रः॥ दुःखदौर्भाग्यनाशा
य धनसंतानहेतवे॥ मार्ज्याम्यसिता रेखास्तिस्रो जन्मत्रयोद्भवाः॥ ततः मंगलस्तोत्रं पठेत्॥ मंग
लो भूमिपुत्रश्च ऋणहर्ता धनप्रदः॥ स्थिरासनो महाकायः सर्वकर्मावरोधकः॥ लोहितो लोहिताक्ष
श्च सामगानां कृपाकरः॥ धरात्मजः कुजो भौमो भूतिदो भूमिनंदनः॥ अंगारको यमश्चैव सर्वरो
गापहारकः॥ वृष्टिकर्ता पहर्ता च सर्वकामफलप्रदः॥ एतानि कुजनामानि नित्यं यः प्रयतः पठेत्॥
ऋणं न जायते तस्य धनं यच्छति वांछितं॥ ॥ ततः उत्तिष्ठ ब्रह्मणस्पते इति उत्थाप्य विसर्जयेत्॥ कथां
श्रुत्वा ब्राह्मणभोजनपुरःसरं सगुडं गोधूमान्नं मौनी भुंजीत॥ एवं प्रकारेण प्रतिभौमवासरे एक
विंशतिभौमवारपर्यंतं कर्तव्यं॥ ततः द्वाविंशतिभौमवासरे उद्यापनं कुर्यात्॥ तिथ्यादि संकीर्त्य १२५

अभीष्टकामनासिध्यर्थं आचरितं यत् भौमव्रतं तत्संपूर्णफलावाप्तये तदुद्यापनं करिष्ये॥ व्रताचा
र्यः उक्तविधिना सर्वतोभद्रे कलशप्रतिष्ठांतं कृत्वा ~~पुराणपठणादि~~ तत्र देवं मंगलं उक्तपूजाविधि
ना संपूज्य सुवर्णपुष्पैः विधिना विशेषपूजां कृत्वा पुराणपठणादिना रात्रिं निनयेत्॥ प्रातः अग्निं प्रति
ष्ठाप्यान्वादध्यात्॥ अत्र प्रधानं॥ मंगलं गुडाज्यमिश्रिततिलद्रव्येण अष्टोत्तरशत॥ १०८॥ संख्याका
हुतिभिः॥ मूलमंत्रेण गायत्र्या वा वैदिकेन वा एकविंशति परिवारदेवताः तेनैव द्रव्येण अष्टाष्टसं
ख्याकाहुतिभिः॥ ब्रह्मादिदेवताश्च एकैकाज्याहुत्या यक्ष्ये॥ मंगलो भूमिपुत्रश्च इत्याद्या एकविंशति
देवताः तासां नाममंत्रेण होमः॥ एवं होमं संपाद्य पूर्वोक्त एकविंशतिनामभिः एकविंशति द्विजान् सं
पूज्य तेभ्यो रक्तचंदनचर्चितान् गुडमिश्रतिलचूर्णपरितान् रक्तवस्त्रदक्षिणासहिता कलशान् दद्यात्॥

१२५ तत्रमंत्रः ॥ मंगलः प्रतिगृह्णातु मंगलोवेददातिच ॥ मंगलस्तारकोभाभ्यां मंगलायनमोनमः ॥
इतिदत्वाआचार्यरक्तवस्त्रादिनासंपूज्यतस्मैपीठंव्रतपूर्तयेरक्तांसुरभिंरक्तवृषंचदत्वाविप्र
वेसतिसोपस्करांशय्यांचदत्वासदन्नेनभूदेवान्संतर्प्यदक्षिणादिभिःप्रतोष्यआशिषोगृ
हीत्वाइष्टजनैःसहभुंजीत ॥ ॥इतिभौमवारव्रतं ॥ ॥अथशनैश्चरव्रतं ॥ स्कांदे ॥ श्रावणशु
क्लपक्षाद्यशनिवासरे ॥ तत्रविधिः ॥ प्रातःशमीकाष्ठेनदंतान्विशोध्यनद्यादौस्नात्वानित्यकर्म
निवर्त्यपूजासामग्रीमादायशमीमूलंतदभावेअश्वत्थमूलंगत्वातत्रमृदावेदिकांनिधायतत्र
धनुषाकारंमंडलंविलिख्यतत्रकृष्णायसनिर्मितांमहिषासनांद्विभुजांदंडपाशधरांशनीश्च
रमूर्तिंनिधायकृष्णवस्त्रवेष्टितांचकृत्वाएवंपूर्वपीठिकांसंपाद्यसंकल्पंकुर्यात् ॥ तद्यथा ॥ १२५

तिथ्यादिसंकीर्त्यआत्मनःअखिलदुःखदौर्भाग्यनिरसनपूर्वकइहजन्मनिजन्मांतरेचअतुल
सुखसुखपुत्रपौत्रधनधान्याद्यभिवृध्यर्थंशनैश्चरव्रतंकरिष्ये ॥ गणेशपूजनादिविधायपूजा
मारभेत ॥ तत्रादौप्राणप्रतिष्ठांतंकृत्वाध्यायेत् ॥ शनैश्चरंदीर्घदेहंदंडपाशधरंतथा ॥ पिंगाक्षं
स्थूलदेहंचध्यायामिरविनंदनं ॥ इतिध्यात्वा ॥ शमग्निरितिवैदिकेनशनैश्चरायनमः ॥ इति
नाममंत्रेणवापूजयेत् ॥ तिलतैलेनपुरुषसूक्तेनचाभिषेकंकुर्यात् ॥ कृष्णवस्त्रेणसंमतंतुभि
श्चवेष्टयेत् ॥ एवंषोडशोपचारैःसंपूज्यसप्तप्रदक्षिणाःसप्तनमस्कारान्कृत्वास्तुवीत ॥ नमः
कृष्णायनीलायश्वेतकंठनिभायच ॥ नमश्चर्पणगात्रायस्थूलरोम्णेनमोनमः ॥ तत्प्रसादार्थंदेहा
यनित्यंयोगधरायच ॥ स्तुवंतथैवभुंजीत ॥ एवंप्रकारेणत्रयस्त्रिंशत्शनिवारपर्यंतंप्रतिशनि

१२७ वासरं कर्त्तव्यं॥ असामर्थ्ये तु श्रावणशनिवारेषु कर्त्तव्यं॥ एवं चरित्वा अंते उद्यापनं कुर्यात्॥
पूर्वसंकल्पं उक्त्वा शनैश्चरव्रतोद्यापनं करिष्ये॥ व्रताचार्यः उद्यापनविधिना सकलप्रतिष्ठांतं
कृत्वा तत्र सुवर्णशमीपत्रे हैमं शनैश्चरं द्विभुजं उक्तविधिना ~~प्रकलशप्रतिष्ठांतं कृत्वा तत्र सुवर्ण~~
~~शमीपत्रे हैमं शनैश्चरं द्विभुजं~~ प्रतिष्ठाप्यान्वादध्यात्॥ प्रधानं॥ शनैश्चरं॥ शमीसमित्तिलाज्य
द्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्मादिदेवताश्च एकैकया आहुत्या यक्ष्ये॥ ततः स
प्तद्विजान् संपूज्य तेभ्यो दक्षिणायुतानि सप्त तिलपात्राणि दत्वा आचार्याय पीठं गां च दत्वा तिल
मिश्रितपक्वान्नैर्भूदेवान् संतर्प्य आशिषो गृहीत्वा स्वयं तथैव भुंजीत॥ इति शनैश्चरव्रतं॥ ॥
अथ शनिश्चररोहिणीव्रतं॥ भविष्ये॥ तत्र ज्येष्ठशुद्धप्रतिपदी यदा शनिवासरः रोहिणीनक्षत्रं च १२७

तदा कर्त्तव्यं॥ तिथ्यादि संकीर्त्य मम इह जन्मनि जन्मांतरे च व्याधिराजभयदारिद्र्यादिसर्वदुःखना
शपूर्वकदीर्घायुर्विपुलपुत्रपौत्राद्यभिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयाद्यभीष्टसिध्यर्थं
शनीश्वरप्रीत्यर्थं शनिरोहिणीव्रतं करिष्ये॥ गणेशपूजनादि विधाय सुवर्णादिघटिकायां रोहि
णीसहितं शनैश्चरं लोहं शमग्निरिति मंत्रेण प्रतिष्ठाप्य वक्ष्यमाणप्रकारेण पूजयेत्॥ ध्यानं॥ नीलां
जनसमाभासं रविपुत्रं यमाग्रजं॥ छायामार्त्तंडसंभूतं नीलांबरधरं विभुं॥ चतुर्भुजं मंदगतिं शू
लिनं गृध्रसंस्थितं॥ किरीटिनं धनुष्पंतं चिंतयामि शनैश्चरं॥ शमग्निरिति मंत्रं प्रत्युपचारं पठित्वा
पूजयेत्॥ सूर्यपुत्राय०॥ आवाहनं०॥ शनैश्चराय०॥ आसनं॥ पंगुशरीराय०॥ पाद्यं॥ अर्कनंदनाय०॥
अर्घ्यं॥ यमाय०॥ आचमनीयं॥ छायासुताय०॥ स्नानं॥ क्रोधमुखाय०॥ वस्त्रं॥ अंतकाय०॥ उपवीतं॥ कृष्ण

१२८ य०॥गंधं॥रुद्राय०॥पुष्पं॥बभ्रुमरवाय०॥धूपं॥पिंगललोचनाय०॥दीपं॥काश्यपाय०॥नैवेद्यं॥यमा
ग्रजाय०॥तांबूलं॥नीलांजनसमाभासाय०॥दक्षिणां॥भास्करनंदनाय०॥नमस्कारः॥एवं संपूज्य॥
ततः तिलानां वायनं दत्वा देवं लोहं सदक्षिणं विप्राय दत्वा सुवर्णगुटिकां रक्षसि धृत्वा ब्राह्मणभोज
नपुरःसरं तिलमिश्रितपक्कान्नं स्वयं भुंजीत॥एवं प्रतिरोहिणीं रोहिणीसप्तकपर्यंतं कर्त्तव्यं॥प्र
तिरोहिण्यां एकोनरवारवृध्या गुटिकावृद्धिः कर्त्तव्यां एवं चत्वारि अष्टम्यां रोहिण्यां उद्यापनं
कुर्यात्॥व्रताचार्यः सर्वतोभद्रस्थकलशे एकोनरवृध्या संपादितसुवर्णगुटिकासु हेमं रोहिणी
सहितशनीश्वरं पूर्ववत् संस्थाप्य संपूजयेत्॥ततः अग्निं प्रतिष्ठाप्याग्निं अन्वादध्यात्॥अत्र प्र
धानं॥रोहिणीसहितशनैश्वरशमीसमित्॥पायसाज्यतिलद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याका १२८

हुतिभिः॥ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥होममंत्रस्तु॥अनृणे निमंत्रस्य विश्वेदे
वा ऋषयः कल्पोक्तादेवता॥त्रिष्टुप्छंदः॥हवने विनि०॥अनृणा अस्मिन्निति०॥एवं होमं संपा
द्य सप्त द्विजान् संपूज्य तेभ्यः दक्षिणासहितान् तिलपूरिताकरकान् दत्वा आचार्याय शनिप्रति
मां कृष्णां गां च दत्वा॥ब्राह्मणभोजनपुरःसरं स्वयं भुंजीत॥एकोनरवारवृध्या संपादितगुटिका
सुवर्णस्य अंगुलीयकं कृत्वा या वज्जीवं धारयेत्॥एवं कृते सर्वपीडानिरसनपूर्वकसर्वमनोरथा
वाप्तिर्भवति॥इति शनिरोहिणीव्रतं॥ ॥इति व्रतोद्यापनकौमुद्यां वारव्रतानि समाप्तिः॥ ॥
अथ संक्रांतिव्रतानि॥तत्रादौ धान्यासंक्रांतिव्रतं॥हेमाद्रौ स्कांदे॥इदं व्रतं एकवर्षात्मकं॥तत्र व्र
तग्रहणविधिः॥अयनसंक्रांतौ विषुवसंक्रांतौ वा व्रतग्रहणं॥संक्रांतिदिने प्रातः शुक्लतिलैः नद्या

१२९ दौस्नात्वागोमयेनोपलिप्यशुद्धदेशेकुंकुमादिनाअष्टदलपद्मंविरिच्यपूजासामग्रींसंपाद्यसंक
ल्पंकुर्यात्॥तद्यथा॥तिथ्यादिसंकीर्त्यममअग्निष्टोमादिफलप्राप्तिपूर्वकसप्तजन्मधनधा
न्यपुत्रपौत्रादिसमन्वितनिर्व्याधिसुरूपत्वादिसिद्धिद्वारासवितृरूपीपरमेश्वरप्रीत्यर्थंधान्य
संक्रांतिव्रतंकरिष्ये॥इतिसंकल्प्य॥गणेशंसंपूज्यपूर्वनिर्मितपद्मकर्णिकायांविश्वात्मनेन
मइतिनाममंत्रेणावाह्यपूर्वादिअष्टपत्रेषुक्रमेणदेवताआवाहयेत्॥भास्करं॥विवस्वंतं॥
पूषणं॥आदित्यं॥तपनं॥मार्तंडं॥भानुं॥एवंआवाह्यपूजयेत्॥अर्घ्यमंत्रः॥कालात्मन्सर्व
देवात्मन्वेदात्मन्विश्वतोमुख॥व्याधिमृत्युजराशोकसंसारभयनाशन॥ततःप्रस्थपरि
मितंधान्यंसदक्षिणाकंब्राह्मणायदत्वाआशिषोगृहीत्वामौनेस्वयंभुंजीत॥एवंप्रतिसंक्रां १२९

तौवत्सरांतेउद्यापनंकुर्यात्॥मंडलेपूर्वोक्तप्रकारेणदेवताआवाह्यसुवर्णनिर्मितअर्घ्यपात्रे
णअर्घ्यंदत्वासंपूज्यंचद्रोणपरिमितंतदर्धंतदर्धंवाधान्यं॥आचार्यायपीठसहितंदत्वागांचदत्वा
ब्राह्मणान्संभोज्यस्वयंभुंजीत॥ ॥इतिधान्यसंक्रांतिव्रतं॥ ॥अथलवणसंक्रांतिव्रतं॥स्कांदे॥
तिथ्यादिसंकीर्त्यअनेकविधिसुखप्राप्तिपूर्वकसूर्यलोकप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंलवणसं
क्रांतिव्रतंकरिष्ये॥पूर्ववत्पद्मेभास्करंसंपूज्यतदग्रेसगुडंलवणपात्रेनिधायदेवंप्रार्थयेत्॥पूजि
तस्त्वंयथाशक्त्याप्रसीदममभास्कर॥व्रतसंपूर्णतांयातुत्वत्प्रसादाद्दिवाकर॥ततःसगुडंलवणंद
क्षिणायुतंब्राह्मणायदत्वास्वयंभुंजीत॥वत्सरांतेपूर्ववत्मंडलेसौवर्णंभानुंसंपूज्यसुवर्णनिर्मितक
लयुतंद्रोणपरिमितलवणंदक्षिणायुतंदत्वाब्राह्मणान्भोजयेत्॥ ॥इतिलवणसंक्रांतिव्रतं॥ ॥

१३० अथभोगसंक्रांतिव्रतं॥ ॥स्कांदे॥तिथ्यादिसंकीर्त्यआत्मनः अनेकविधभोगप्राप्तिपूर्वकंश्री
परमेश्वरप्रीत्यर्थंभोगसंक्रांतिव्रतंकरिष्ये॥इतिसंकल्प्य॥पूर्ववत्पद्मेभानुंसंपूज्यत्रिभ्योपिका
निमिथुनानिसंपूज्यतेभ्योवासनानिकुंकुमकज्जलसिंदूरसुगंधिपुष्पतांबूलशालितंदुलदक्षि
णायुतानिदत्वाभुंजीत॥वत्सरांतेमंडलेसुवर्णभानुंसंपूज्यद्वादशमिथुनेभ्यः पूर्वोक्तानिवस्त्रयु
गसहितानिदत्वागांचदत्वाब्राह्मणान्भोजयेत्॥ ॥इतिभोगसंक्रांतिव्रतं॥ ॥अथरूपसंक्रांति
व्रतं॥ ॥स्कांदे॥तिथ्यादिसंकीर्त्यकामनीयरूपप्राप्तिपूर्वकश्रीपरमेश्वरप्रीत्यर्थंरूपसंक्रांति
व्रतंकरिष्ये॥पद्मेपूर्ववत्॥भानुंसंपूज्यकांस्यपात्रस्थघृतेरूपंवीक्ष्यदद्यात्॥वत्सरांतेमंडलेसौ
वर्णभानुंसंपूज्यहेमपात्रस्थघृतहिरण्यसहितंदत्वागांचदत्वाफलभूयस्त्वकामोघृतधेनुमपि १३०

दत्वाब्राह्मणान्भोजयेत्॥इतिरूपसंक्रांतिव्रतं॥ ॥अथतेजःसंक्रांतिव्रतंस्कांदे॥ ॥तिथ्यादिसं
कीर्त्यआत्मनःअतितेजस्त्वप्राप्तिपूर्वकसवितृप्रीत्यर्थंतेजःसंक्रांतिव्रतंकरिष्ये॥इतिसंकल्प्य॥
पूर्ववत्पद्मेसवितारंसंपूज्यतत्पुरतःशालितंदुलपूर्णकरंसंस्थाप्यतन्मध्येमोदकंतदुपरिदी
पंज्वलंतंकृत्वाब्राह्मणंसंपूज्यतस्मैदद्यात्॥संवत्सरांतेमंडलेसौवर्णभानुंसंपूज्यतत्पुरतःशालि
तंदुलचूर्णेताम्रकरेसुवर्णनिर्मितदीपंकृत्वाब्राह्मणायदत्वागांचदत्वाद्विजान्भोजयेत्॥ ॥
इतितेजःसंक्रांतिव्रतं॥ ॥अथसौभाग्यसंक्रांतिव्रतं॥ ॥स्कांदे॥तिथ्यादिसंकीर्त्यआत्मनःअ
नुपमसौभाग्यप्राप्तिपूर्वकभानुप्रीत्यर्थंसौभाग्यसंक्रांतिव्रतंकरिष्ये॥इतिसंकल्प्य॥पूर्ववत्भा
नुंसंपूज्यगांचसंपूज्यसपत्नीकायद्विजायसौभाग्याष्टकसंयुक्तंवस्त्रयुग्मसहितंचवायनंदत्वा

१२९ अथलवणंमौनीभुंजीत॥वत्सरांतेमंडलेसौवर्णंभानुंसंपूज्यतत्पुरतःयथाशक्तिलवणाचलंका
तदुपरिकांचनंकमलंकृत्वातंसंपूज्यसुरभिसहितंविप्रायप्रतिपादयेत्॥सौभाग्याष्टकंतु॥ऐक्ष
वंराजिकास्तद्वन्निष्पावाश्चसुशोभनाः॥धान्यकंजीरकंचैवकौसुंभंकुसुमंतथा॥लवणंचा
ष्टमंतच्चतद्वत्सौभाग्याष्टकमुच्यते॥ ॥इतिसौभाग्यसंक्रांतिव्रतं॥ ॥अथतांबूलसंक्रांतिव्र
तंस्कांदे॥ ॥तिथ्यादिसंकीर्त्यआत्मनःभर्त्रासहअतुलसुखप्राप्तिपूर्वकसवितृप्रीत्यर्थंतांबूल
संक्रांतिव्रतंकरिष्ये॥पूर्ववत्भानुंसंपूज्य॥ततःदंपतीचंदनादिनासंपूज्यतयोःसोपस्करंतांबू
लंदद्यात्एवंप्रतिदिनंवत्सरपर्यंतंअंतेऽब्देपूर्ववत्भानुंसंपूज्यदंपतीसंपूज्यतस्मैएलालवंग
जातिफलंकोलजातीपत्रखदिरादिप्रसेकंभांडेनिधायरौप्यमयंचूर्णपात्रंपूगप्रस्फोटनंचपूगीफ १२९

लानिनागवल्लीदलानिचसतिसामर्थ्येसुवर्णनिर्मितानिकानिनागवल्लीदलानिचरौप्या
दिमयेपात्रेनिधायसंकल्पपूर्वकंदद्यात्॥तांबूलंश्रीकरंभद्रंब्रह्माविष्णुशिवात्मकं॥अ
स्यप्रदानाद्देवेशापूर्णाःसंतुमनोरथाः॥इतिदत्वागांचदत्वाब्राह्मणान्भोजयेत्॥ ॥
अथप्रकारांतरेणतांबूलव्रतंभविष्ये॥ ॥तत्रव्रतग्रहणं॥यदाआषाढशुक्लप्रतिपदि
शशिनक्षत्रंतदाग्राह्यं॥ ॥अथवाआषाढशुक्लदशम्यांचातुर्मास्यव्रतं॥ ॥तिथ्यादि
संकीर्त्यतांबूलव्रतकल्पोक्तफलावाप्तयेमहाविष्णुप्रीत्यर्थंतांबूलव्रतंकरिष्ये॥इतिसंक
ल्प्य॥पीठफणान्वितशेषनागकन्यायुतंहरिंपुरुषसूक्तेनसंपूज्यतदग्रेद्विजंसपत्नीकंच
संपूज्यसोपस्करंतांबूलवीटीद्वयंदेवायद्विजायचदत्वानमेत्॥एवंप्रतिदिनं॥अंतेकार्ति

१३२ कश्रुक्लएकादश्यांपौर्णमास्यांवाउद्यापनंकुर्यात्॥तद्यथा॥तिथ्यादिसंकीर्त्यआत्मनःअने
कदानफलप्राप्तिसकलभोगयुतनिरतिशयानंदप्राप्तिपूर्वकविष्णुलोकप्राप्तिद्वाराश्रीशापप
र्यंकशायीनागकन्यायुतनारायणप्रीत्यर्थंआचरितंयत्तांबूलव्रतंतत्संपूर्णफलावाप्तयेतां
बूलव्रतोद्यापनंकरिष्ये॥इतिसंकल्प्य॥गणेशपूजनादिविधायाचार्यंवृणुयात्॥आचार्यःपू
र्ववत्मंडलेब्रह्मादिदेवताःसंस्थाप्यततःउपरिकलशेरौप्यमयशेषेहाटकनिर्मितंनारायणं
नागकन्यायुतंसहस्रशीर्षेतिमंत्रेणसंस्थाप्यपरितःपूर्वादिदिक्षुब्रह्माणंईशानंदुर्गांक्षेत्रा
धिपतिंचतत्तन्मंत्रैराबाह्यपुरुषसूक्तेनपंचामृताभिषेकपुरःसरंपूजयेत्॥नानाविधभक्ष्यभो
ज्ययुतपायसोपहारंनिवेदयेत्॥देवाग्रेद्रोणसंख्यापूगानियथाशक्तिवानागपर्णयुतंचसंस्था १३२

प्यदेवंस्तोत्रैस्स्तवीततःदशनववातास्रपात्राणिकुंभवापूगयुक्तानिरौप्यमयानितावंतिचूर्ण
पात्राणिततःतीक्ष्णपूगप्रस्फोटनानितथासुवर्णनिर्मितानिकानिचित्नागपत्राणितथाएलाल
वंगादिसुखवासद्रव्यपात्राणिरौप्यमयानितत्तद्द्रव्यपूरितानिचनवेश्चर्पनवकेनिधायवस्त्रद्वयेन
संवेष्ट्यसप्तधान्योपरिदेवाग्रेनिधायतत्रनागरूपंध्यायेत्॥पूजयेत्॥प्रार्थयेच्च॥नागेनागमहा
राजवल्यातत्रप्रपूजनात्॥इप्सितंदेहिमेशीघ्रंसर्वसौख्यंसदाप्रभो॥ततःगीतवादित्रपुराणपठ
नादिनारात्रिंनिनयेत्॥प्रातःदेवंसंपूज्यअग्निंप्रतिष्ठाप्यान्वादध्यात्॥अत्रप्रधानं॥नाराय
णंभ्रतोदेवेतिमंत्रेणखंडमिश्रितसाज्यपायसद्रव्येणअष्टोत्तरसहस्रसंख्याकाहुतिभिः॥त
तःसमस्तव्याहृतिमंत्रेणपलाशसमित्॥तिलव्रीहिद्रव्यैःप्रत्येकंअष्टोत्तरशतसंख्याकाहुतिभिः॥

१२२ ब्रह्मादि आवरणदेवताः पायससमित्तिलव्रीहिद्रव्यैः अष्टाविंशतिकाहुतिभिः मंडलदेवता
श्च एकैकयाज्याहुत्या यजेत्॥ एवं होमं समाप्य दंपतीनवकं वस्त्रादिना संपूज्य पूर्वस्थापितं श्रू
नवकं तेभ्यो दद्यात् मंत्रमंत्रः॥ तांबूलं श्रीकरं भद्रं ब्रह्माविष्णुशिवात्मकं॥ अस्य प्रदानाद्देवे
वास फलं मे मनिकांक्षितं॥ ततः तेभ्यो नवगोदानानि तदभावे तन्मौल्यं वा दक्षिणात्वेन दत्वा॥ दे
वं प्रार्थयेत्॥ तांबूलदानमहात्म्यात् प्रीतो भव जनार्दन॥ संपूर्णं कुरु मे देव कांक्षितं पुरुषोत्त
म॥ ततः पीठं आचार्याय दत्वा कपिलां गां च दत्वा ब्राह्मणभोजनपुरःसरं स्वयं भुंजीत॥ ॥
इति तांबूलव्रतं॥ ॥अथ विशोकसंक्रांतिव्रतं स्कांदे॥ ॥तिथ्यादि संकीर्त्य आत्मनः विशो
कसमन्वितपुत्रपौत्रादिवृद्धिद्वारा श्रीसवितृप्रीत्यर्थं विशोकसंक्रांतिव्रतं करिष्ये॥ इति सं १२२

कल्प्य॥ पद्मे पूर्ववत् भास्करं संपूज्य ताम्रपात्रे संपूज्य रक्तवस्त्रादिभ्यां परिधाय पूर्ववत्
अर्घ्यं दत्वा ब्राह्मणाय गुडपूर्णकुंभं सदक्षिणाकं दद्यात्॥ वत्सरांते मंडले हेमं भास्करं पूज्य गु
डपर्वतेन सह पीठं कपिलासहितं दद्यात्॥ ॥इति विशोकसंक्रांतिव्रतं॥ ॥अथ आयुःसंक्रां
तिव्रतं॥ ॥स्कांदे॥ तिथ्यादि संकीर्त्य आत्मनः दीर्घायुःस्तेजस्त्व पूर्वकापमृत्यु राहित्य कामः
नया सवितृप्रीत्यर्थं आयुःसंक्रांतिव्रतं करिष्ये॥ इति संकल्प्य॥ पद्मे पूर्ववत् भानुं संपूज्य ब्रा
ह्मणाय कांस्यपात्रस्थितं गोघृतं दद्यात्॥ वत्सरांते मंडले हेमं भानुं पूर्ववत् संपूज्य द्वात्रिंशत्पल
मिते कांस्यपात्रे गोघृतं निधाय सहिरण्यं ब्राह्मणाय दद्यात्॥ तत्र मंत्रः॥ कांस्यपात्रस्थितं ग
व्यं आयुरारोग्यकारकं॥ सहिरण्यं ददाम्येवं व्रतं संपूर्णहेतवे॥ ततः कपिलां गां दत्वा विप्रा

१३४ न्भोजयेत्॥ ॥इति आयुःसंक्रांतिव्रतं॥ ॥अथ धनसंक्रांतिव्रतं॥ ॥हेमाद्रौ स्कांदे॥ तिथ्या
दिसंकीर्त्य आत्मनः विपुलधनधान्यप्राप्तिपूर्वक आयुरारोग्यपुत्रपौत्रादिप्राप्तिकामनाया
सवित्रप्रीत्यर्थं धनसंक्रांतिव्रतं करिष्ये॥ इति संकल्प्य॥ पश्चेयापूर्णकलशे निधाय तत्र सुवर्ण
पात्रे भास्करं संपूज्य सहिरण्यं कलशं द्विजाय दद्यात्॥ एवं प्रतिमासं वत्सरांते पूर्ववत् मंडले यथा
शक्तिघटितसुवर्णकलशोपस्थहस्तं हैमं भानुं संपूज्य सुवर्णधेनुसहितं पीठं द्विजाय दत्वा सदस्येन
द्विजान्भोजयेत्॥ सर्वसंक्रांतिव्रतेषु इति कर्तव्यता धान्यसंक्रांतिवत् ज्ञातव्या॥ ॥इति श्रीम
त्पतितपावनकुलाब्धिसंभवधारस्कपनामकबल्लजसूरिसूनुशंकरविरचितायां व्रतोद्यापनकौ
मुद्यां संक्रांतिव्रतानि समाप्तानि॥ ॥अथ व्यतीपातयोगव्रतं॥ वराहे॥ तत्र व्रतग्रहणविधिः॥ १३४

मार्गशीर्षादिशुभे मासे यदा व्यतीपातयोगः॥ तद्दिने नद्यादौ प्रातः स्नात्वा धौतवासानी जप्त्वा सं
कल्पं कुर्यात्॥ तद्यथा॥ तिथ्यादिसंकीर्त्य आत्मन निरतिशयैहिकसुखप्राप्तिसकलपापक्षय
पूर्वकदिव्यविमानारूढगीतनृत्यविलाससहितअप्सरोगणवीज्यमानसकलभोगयुतकल्पको
टिसूर्यलोकनिवासोत्तरपुत्रपौत्रादिसकलसंपत्सहितमहदैश्वर्यादिगुणयुक्तराजराजित्वकामः
अमुककामो वा व्यतीपातयोगव्रतं करिष्ये॥ इति संकल्प्य॥ गणेशपूजनादि निर्वर्त्य शुद्धभूमौ
पंचरंगोपेतकमले कलशस्थापनप्रकारेण शर्करापूरितं ताम्रकलशं प्रतिष्ठाप्य तत्र तत्ताम्रमये पू
र्णकांचनाब्जे अष्टादशभुजं कांचनं व्यतीपातविग्रहं नाममंत्रेण प्रतिष्ठाप्य पूजयेत्॥ ततः पंच
रत्नान्वितपुष्पांजलिं दद्यात्॥ तत्र मंत्रः॥ नमस्तेस्तु व्यतीपात सोमसूर्यसुतप्रभो॥ यद्दानादिक

१३५ तंकिंचित्तजदनंतमिहास्त्वमेद्रुनिदत्वा॥ यथाशक्तिसुवर्णादिदत्वापुराणपठनादिनारात्रिंनि
नयेत्॥ तद्दिनेउपवासः॥ प्रातःदेवंसंपूज्यसपत्नीकंद्विजंचसंपूज्यसपत्नीकंद्विजंचसंपूज्य
तस्मैहंसुवर्णसहितंतस्मैदत्वाब्राह्मणभोजनपुरःसरस्वयंभुंजीत॥ कुर्यादेवंमासिव्यतीपा
तत्रयोदश॥ चतुर्दशीव्यतीपातेउद्यापनंकुर्यात्॥ तद्यथा॥ पूर्वोक्तसंकल्पांतेआचरितस्य
व्यतीपातव्रतस्यसांगतासिद्ध्यर्थंतदुद्यापनंकरिष्ये॥ इतिसंकल्प्य॥ व्रताचार्यःसर्वतोभद्रस्थ
शर्करापूरितकलशोताम्रमयपूर्णपात्रंनिधायतत्रसुवर्णपद्मेआष्टादशभुजंव्यतीपातंवि
प्रहंसौवर्णंसंपूज्यपूर्ववत्पुष्पांजलिंदत्वारात्रिंनिनयेत्॥ प्रातःअग्निंप्रतिष्ठाप्यअन्वाध्या
त्॥ प्रधानंदेवंव्यतीपातंक्षीरवृक्षसमिदाज्यपयफलद्रव्यचतुष्टयेनप्रत्येकंअष्टोत्तरशतंसं° १३५

ख्याकाकृतिभिः॥ ब्रह्मादिदेवताश्चएकैकयाज्याहुत्यायक्ष्ये॥ ततःआचार्यसंपूज्यतस्मैसौ
पस्करांशय्यांपीठंचप्रातः॥ तत्रमंत्रः॥ देवंव्यतीपातमहंमहांतंरवींदुसूनुंसकलेष्टलब्ध्यै॥ सम
स्तपापस्यक्षयोस्तुपुण्याधनस्यवृद्धिर्ममसर्वदास्तु॥ इतिदत्वाव्रतपूर्तयेगांचदत्वाब्राह्मणान्भो
जयेदिति॥ ॥इतिबाराहोक्तव्यतीपातव्रतं॥ ॥अथप्रकारांतरेणनारदीयपुराणोक्तंव्यतीपा
तव्रतं॥ ॥तिथ्यादिसंकीर्त्यसकलपापक्षयपूर्वकाभीष्टसिध्द्यनंतरंविष्णुसायुज्यकामःव्यती
पातव्रतंकरिष्ये॥ इतिसंकल्प्य॥ व्यतीपातदिनेप्रातःपंचरंगोपेतपद्मेगोक्षीरपूरितकांस्यभाज
नेचतुर्भुजंचक्राद्यायुधोपेतंसौवर्णपद्महस्तंलक्ष्म्यान्वितंविष्णुंविष्णोरराटमसीतिमंत्रेणसंस्था
प्यजातीपुष्पादिनापुरुषसूक्तेनसंपूज्यशर्करोपेतपायसोपहारंनिवेद्यएवंप्रार्थयेत्॥ व्यतीपा

१२५ तद्दिनेदेवनवसर्वंसमर्पितं॥भवत्वनंतफलदंममजन्मनिजन्मनि॥ततःद्विजंसंपूज्यतिलपूर्ण
ताम्रवंसगुडंससुवर्णंचदत्वासोपस्करांशय्यापीठंगांचदत्वाब्राह्मणान्भोजयेदिति॥ ॥
इतिव्रतोद्यापनकौमुद्यामनंतीपानव्रतं॥ ॥अथलक्षपूजाविधानं॥ ॥तत्रादौशिवलक्षपू
जाविधिः॥ ॥ब्रह्मांडपुराणे॥माघादिपुण्यमासेषुचातुर्मास्येवाश्रावणेविशेषेणचंद्रानुकू
लेषुशुभेदिनेप्रातःनद्यादौस्नात्वानित्यकर्मनिर्वर्त्यकर्मनिर्वर्त्यदेवागारंप्रविश्यतिथ्यादिसं
कीर्त्यअखिलपापक्षयपूर्वकंऐहिकामुष्मिकनिरवधिसुखप्राप्तिद्वाराअमुककामनाया
उमासहितसदाशिवप्रीत्यर्थंअमुकलक्षपूजांकरिष्ये॥इतिसंकल्प्य॥पीठेशिवंसंपूज्यसह
स्रनामभिःमूलमंत्रेणवातत्तद्द्रव्येणपूजयेत्॥प्रत्यहंपंचामृताभिषेकः॥कर्पूरार्तिक्यंचद १३५

ध्योदनोपहारः॥प्रथमदिनेयावतीसंख्यातावतीसमाप्तिपर्यंतं॥अयुतांतेअयुतांतअयुता
तेस्वर्णपुष्पं॥अभावेलक्षांते॥समाप्तिदिनेविशेषेणशिवंसंपूज्यशतफलपरिमितपंचामृते
नस्नापनं॥नारिकेलार्घ्यदानं॥शिवोपरिध्वजपताकारोपणं॥श्वेतवस्त्रद्वयंदानंच॥ततःपु
ष्पांजलित्रयं॥अष्टभिर्नामभिः॥भवाय॥शर्वाय॥रुद्राय॥पशुपतये॥उग्राय॥महते॥
भीमाय॥ईशानाय॥इतिदत्वाप्रार्थयेत्॥विरूपाक्षमहेशानंविश्वरूपमहेश्वरं॥मयाकृतां
लक्षपूजांगृहीत्वावरदोभव॥ततःनमंत्र॥मत्स्कंजयायययज्ञायदंदंदेवायत्रांमंत्रे॥आग्नि
नेत्रायसर्वायमहादेवायतेनमः॥नमःशिवायशांतायसगणायससुतेचे॥सर्वेश्वरायदे
वायकारणत्रयहेतवे॥ततःयथाशक्तिब्राह्मणान्भोजयेदिति॥व्रतपूर्तयेगांचदद्यात्॥

१२७ पूजाद्रव्याणि॥ चंपकैर्मल्लिकापुष्पैः जातीकिंशुकपाटलैः॥ द्रोणपुष्पैः कदंबैश्च बिल्वपत्रा
खादलैस्तथा॥ नागवल्लीदलैर्वापि रत्नैर्नानाविधैरपि॥ नलकालोद्भवैपुष्पैः पत्रैर्वैकोमलैर
पि॥ धान्यैश्च विविधैः शुद्धैरखंडैर्व्रीहितंदुलैः॥ लक्षपूजां प्रकुर्वीत नामभिर्मूलमंत्रतइति
॥ ॥ अथ प्रकारांतरेण लक्षपूजाविधानं॥ ॥ अग्निपुराणे॥ पूर्ववत्देवं संपूज्य सहस्रना
मभिः॥ ॐ नमः शिवायेति वा मंत्रेण पुष्पादि एकरूपतया समाप्तिपर्यंतं समर्प्य। अंते शुभदि
ने उद्यापनं कुर्यात्॥ तिथ्यादि संकीर्त्य अनेकजन्मार्जितदुरितादिनिवृत्तिपूर्वकऐकाहिकपु
त्रपौत्रादिविविधसुखप्राप्त्यनंतरशिवलोकनिवासकामनया कृतस्य लक्षपूजाविधानंतत्सं
पूर्णफलावाप्तये तदुद्यापनं करिष्ये॥ यदर्चितं तद्रुद्रैः संकल्प्य कार्यः॥ व्रतान्याचार्यः वेदिका १२०

यां लिंगतोभद्रस्थकलशे धान्यपूरितपूर्णपात्रे मध्ये सौवर्णमहेशं नमः शंभवे च मयो
भवे चेति मंत्रेण संस्थाप्य तद्वामभागे सौवर्णां गौरीं च गौरीर्मिमायेमंत्रेण संस्थाप्य पुर
तः राजतं वृषभं वृषभं मेति संस्थाप्य परिवारदेवता स्थापयेत्॥ पूर्वादिदिक्षु॥ अधर्मं॥
अवैराग्यं॥ अनैश्वर्यं॥ महेश्वरं॥ तद्बहिः ईशान्यां॥ ईशानवक्त्रायनमः॥ पूर्वे॥ त
त्पुरुषवक्त्रायनमः॥ दक्षिणे॥ अघोरवक्त्रायनमः॥ पश्चिमे सद्योजाताय वक्त्राय॰ उत्त
रे वामदेवायवक्त्राय। पुनः पूर्वादि। वामायै॰ ज्येष्ठायै॰ काल्यै॰ उन्मन्यै॰ पुनः पूर्वादि
मारभ्य ईशानीपर्यंतं। अजैकपादे॰ अहिर्बुध्न्याय॰ भवाय॰ शर्वाय॰ उमापतये॰ रुद्रा
य॰ पशुपतये॰ शंभवे॰ वरदा॰ शिवाय॰ ईश्वराय॰ पुनः पूर्वे नंदिकालै॰ दक्षिणे भृं

१३८ शिवं ॐ। पश्चिमे वृषभस्कंधौ। उत्तरे देवाकालौ॥ ततः इंद्रादिलोकेशान् एवं संस्थाप्य पूज
येत्॥ ध्यानं॥ शुद्धस्फटिकसंकाशं त्रिनेत्रं चंद्रशेखरं। भस्मोद्धूलितसर्वांगं ध्रिंसंनकव
सलं॥ स्थापनमंत्रेण पूजयेत्॥ एकं दत्त्वा वा सुवर्णपुष्पं समर्प्य॥ नमः शिवाय शांताये ति न
मस्कारः॥ पुराणपठनादिना रात्रिं नयेत्॥ प्रातः अग्निं प्रतिष्ठाप्य॥ अन्वादध्यात्॥ प्रधानं
देवं सोमं महेशं तिलद्रव्येण अयुतसंख्याकाहुतिभिः सहस्रपरिमिताभिर्वा परिवारदेव
ताः मंडलदेवताश्च एकैकया तिलाहुत्या आज्याहुत्या वा यक्ष्ये॥ स्थापनमंत्रेण होमः॥ पुष्पा
यमंत्रेण वा॥ होमांते आचार्यं संपूज्य पीठं गोमिथुनं च प्रतिपाद्य अधिकफलप्राप्तये सोपस्क
रं शय्यां च दत्त्वा षोडश ब्राह्मणान् विशेषाकारेण संपूज्य दक्षिणां च दत्त्वा सदन्नेन द्वि — न्तर्पये १३८

दिति॥ ॥इति शिवलक्षपूजाविधिः॥ ॥अथ विष्णुलक्षपूजाविधानं॥ ॥अग्निपुराणे॥
चातुर्मास्ये तु संप्राप्ते लक्षपूजां समाचरेत्॥ माघादिपुण्यमासेषु लक्षपूजा करेः स्मृता॥ यद्य
दत्तो भवेन् पुष्पं विष्णवे तत्तदर्पयेत्॥ अतसी तुलसी धात्री पद्मं दूर्वांकुरास्तथा॥ करवीरं
कर्णिकारं च नागपत्रं च केतकं॥ पंचकं मोगरं चैव सौवीरं कनकं तथा॥ जाती पुष्पं पाटलकं
पुन्नागं चकदंबकं॥ बदरं च मल्लं पूगं फलैरन्यैश्च पूजयेत्॥ सुगंधैस्तु संभूतैः सततैः पा
दवपत्रैर्वैरिति॥ यद्यत्पूजयते पुष्पं तत्तच्चरूपां हिरण्मयं॥ कारयेत् शतकैकैकं सहस्रं वापि र
कारयेत्॥ लक्षे वा दापयेद्धीमान् यथा वित्तानुसारतः॥ विष्णोर्नामसहस्रेण गायत्र्या मूलमं
त्रतः॥ सहस्रं द्विसहस्रं वा त्रिसहस्रं यथाविधि॥ उपक्रमदियावत्प्रत्यहं तावतीं भवेत्॥ २

१३९ नि॥ तिथ्यादि संकीर्त्य अखिलनानाविधपातकशमनपूर्वकं ऐहिकामुक्तिनिरतिशयसानं
दप्राप्तिद्वारा श्री॰ अर्थं लक्ष्मीनारायणप्रीत्यर्थं तुलस्यादिलक्षपूजां करिष्ये॥ इति संकल्प्य॥
पीठं पुरुषसूक्तेन देवं संपूज्य नाममंत्रैः तुलस्यादि अर्पयेत्॥ समाप्तौ उद्यापनं कुर्यात्॥ पूर्व
संकल्पांते अमुकलक्षपूजोद्यापनं करिष्ये इति संकल्प्य॥ सायं व्रताचार्यः वेदिकायां सर्व
तोभद्रे ब्रह्मादिदेवतास्थापनपूर्वकं कलशं प्रतिष्ठाप्य तत्र देवं पूजयेत्॥ तत्रायं क्रमः॥ सर्व
तोभद्रे ब्रह्मादिदेवताः संस्थाप्य तदुपरि प्रस्थतिलपुंजं तदुपरि प्रस्थगोधूमं तदुपरि प्रस्थ
परिमितशुद्धतंदुलपुंजं कृत्वा तत्र कुंकुमेन अष्टदलपद्मं विलिख्य तत्प्रथेताम्रयविधानस
हितं ताम्रकलशं प्रतिष्ठाप्य तत्र सौवर्णं चतुर्भुजं लक्ष्म्यालिंगितवामांगं नारायणं सहस्रशी १३९

र्षेति मंत्रेण संस्थाप्य पुरतः सौवर्णं रजतं वा गरुडं॥ सामध्वनिशरीरस्त्वं वाहनं परमेष्ठि
नः॥ विषपापहरो नित्यं अतः शांतिं प्रयच्छ मे॥ ततः ईशानादिदिक्षु शंखचक्रं गदापद्मं
चततः परितः लोकेशान् संस्थाप्य पूजयेत्॥ प्रातः अग्निं प्रतिष्ठाप्य अन्वादध्यात्॥ अत्र
प्रधानं॥ लक्ष्मीनारायणं॥ ॐ नमो नारायणायेति मंत्रेण मधुत्रयाभिश्रिततिलपायस
घृतशर्कराघृतचरुचतुष्टयेन प्रतिद्रव्यं अष्टोत्तरसहस्राहुतिभिः अष्टोत्तरशताहुतिभिर्वा प्रति
द्रव्यचतुष्टयेन अयुताहुतिभिः सहस्राहुतिभिर्वा सहस्रनाममंत्रैर्यक्ष्ये॥ परिवारदेवताः
मंडलदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ ततः आचार्याय पीठं अनेन मंत्रेण दद्यात्॥ अनंत
यीब्रह्मपितायद्धर्मैस्सचराचरं॥ अनंतभोगशयनः प्रीयतां मे जनार्दनः॥ इति दत्वा गां पर

१४० नीत्वदत्वा अधिककलावाप्तये सोपस्करां शय्यां चदत्वा दशांधिकान् द्विजान् सदन्नेन भोजये
दिति॥ एवमेव विधानेन गेशांधिकयान्न पा॥ तन्नमंत्रेण पूजा तु तन्नामसहस्रकैः॥ गणे
शालतुकैर्होमं पंचखाद्यैस्तथापि वा॥ पायसेन तु देव्याश्चा तिलैर्वा केवलैरपि॥ एवं कृत्वा विधा
नेन स्वर्गलोके महीयते॥ इति॥ ॥इति लक्षपूजाविधानं॥ ॥अथ लक्षनमस्कारव्रतं॥ ॥
भविष्ये॥ वसिष्ठ उवाच॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं यदिच्छसि॥ तदा लक्षनमस्कारव्रतं
कुरु महीपते॥१॥ चातुर्मास्ये तु संप्राप्ते केशवे शयनं गते॥ आषाढस्य सिते पक्षे एकादश्यां
समाचरेत्॥ कार्तिकस्य सिते पक्षे पौर्णिमास्यां समापयेत्॥ मार्गशीर्षे माघे चैत्रे वैशाखे वा
पौर्णमास्यां तु समापयेदिति॥ तिथ्यादि संकीर्त्य अनेकजन्मार्जितनानाविधपातकनाशनपू १४०

र्वकं अतुलभोगमोक्षसिद्धारा श्रीप्रीत्यर्थं विष्णोः अमुकदेवस्य तिलनलक्षनमस्कारव्रतं करि
ष्ये॥ इति संकल्प्य॥ तुलस्याश्च अश्वत्थमूले गंगातीरे गवां गोष्ठे वा अन्यत्र शुभस्थले वा
यद्देवताप्रीतये व्रतं तद्देवं पुरुषसूक्तेन संपूज्य नमोस्त्वनंताय इति स्तुत्वा तद्देवतानामसहस्रे
ण तद्देवप्रकाशकं वैदिकमंत्रेण मूलमंत्रेण वा नमस्कारान् अष्टांगान् एकरूपेण समाप्तिप
र्यंतं कुर्यात्॥ समाप्तोउद्यापनं कुर्यात्॥ तिथ्यादि पूर्वकं संकल्प्यां ते लक्षनमस्कारस्य व्रतस्य
सांगतासिद्ध्यै तदुद्यापनं करिष्ये॥ इति संकल्प्य॥ व्रताचार्यः सर्वतोभद्रे कलशोपरिदेवं दे
वं तत्तद्देवताप्रकाशमंत्रेण संस्थाप्य संपूज्य विशेषार्घ्यं त्वयं दद्यात्॥ देवदेव जगन्नाथ सर्वक्र
तुफलप्रद॥ व्रतेनानेन सुप्रीतो गृहाणार्घ्यं मयार्पितं॥ ततः अग्निप्रतिष्ठाप्याज्यादध्यान्॥

१४१ अत्र प्रधानं॥ देवं विष्णुं अमुकं वा सप्तदश्याः पौरुषेण चरुणेण चरु तिल व्रीहि पलाश समित्
सर्पिर्द्रव्यैः प्रतिद्रव्यं यक्ष्ये॥ ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ होमं समाप्य॥
ततः पीठं गां च आचार्याय दत्वा अष्टोत्तरशताधिकान् द्विजान् यथाशक्ति वा भोज्येदिति
॥ ॥इति लक्षनमस्कारव्रतं॥ ॥अथ लक्षप्रदक्षिणाविधानं॥ ॥विष्णुधर्मोत्तरे॥ आ
षाढशुक्लपौर्णिमायां प्रारंभः॥ कार्तिक्यां समापनं॥ अथवा शुभे मासे वा प्रारंभसमा
पने॥ सुरालये अश्वत्थमूले तुलस्या गोव्रजे तथा वा कुर्यात्॥ प्रदक्षिणा सर्वा पूजयित्वा य
थाविधिः॥ तिथ्यादि संकीर्त्य आत्मनः अखिलपातकरोगपीडानिरसनपूर्वक अभीष्टसि
द्धिद्वारा॰ विष्णोः अमुकस्येति वा लक्षप्रदक्षिणाव्रतं करिष्ये॥ इति संकल्प्य॥ गणेशादिसं १४१

पूज्य॥ पूजासामग्रीं गृहीत्वा अश्वत्थादिसमीपं गत्वा पुरुषसूक्तेन संपूज्य सहस्रना
मादि पठन् करचालनादिरहितः एकाग्रचित्तः प्रदक्षिणाः तत्साहुण्यार्थं तदुद्यापनं क
रिष्ये॥ इति संकल्प्य॥ व्रताचार्यः सर्वतोभद्रे कलशोपरि हैमं कृतप्रदक्षिणादेवतान्मं
त्रेण संपूज्य साष्टांगं प्रणमेत्॥ ततः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ प्रधानदेवं विष्णुं
विष्णुगायत्र्या अष्टोत्तरशतं चरुयाहुतिभिः ब्रह्मादिदेवताः एकैकयाज्याहुत्या यक्ष्ये॥ त
तः पीठं कपिलां गां च दत्वा यथाशक्ति द्विजान् भोजयिष्ये॥ अत्र योदनताकृतप्रदक्षि
णाः तन्नदेवताः प्रकोमंत्रः॥ पूजादौ ग्राह्यः॥ अथ प्रकारांतरेण अश्वत्थप्रदक्षिणावि
धिः॥ भविष्ये॥ संकल्पादि पूर्ववद्यान्नविशेषः आदौ आराधयेत् विष्णुं ध्यानावाहनपू

१४२ र्चकं॥ तथैव पिप्पलतरुं नाम नारायणस्वरूपिणं॥ अर्चयेत्पुरुषसूक्तेन उपचारैश्च षोड
शैः॥ ततः प्रदक्षिणं कुर्यात्तत्सर्वं सफलं भवेत्॥ लक्षमेकं द्विलक्षं वा त्रिचतुःपंचलक्षकं॥
कार्यस्य गौरवात्तत्तेयद्वा दशांशं समाचरेत्॥ ब्रह्मचारी हविष्याशी स्वपःशायी जितेंद्रियः
मौनी ध्यानपरो भूत्वा पिप्पलस्य स्तुतिं पठेत्॥ विष्णोर्नामसहस्रं च पौरुषं च वैष्णवं तथा॥
ततो लक्षदशांशेन सघृतं पायसं हुनेत्॥ तर्पणं तद्दशांशेन भोजनं तद्दशांशतः॥ होमादौ विष्णु
गायत्रीनामसहस्रं वा ग्राह्यं॥ होमांतरे द्रोणपरिमिततिलपुंजोपरि पलादधिकरौप्यपी
ठोपरि सुवर्णादधिकहेमं अश्वत्थतरुं संस्थाप्य श्वेतवस्त्रेण संछाद्य संपूज्य द्विजाय दद्यात्॥
तत्र मंत्रः॥ पिप्पलो वृक्षराजेंद्रोऽस्य अग्निगर्भस्त्वमेव हि॥ प्रभुर्वनस्पतीनां च पूर्वं जन्मनि यत् १४२

कृतं॥ आयोधं नाशय क्षिप्रं तरुरूपप्रदानतः॥ ततः द्विजं प्रार्थयेत्॥ अमुं तरुं गृहाण त्वं वि
ष्णुरूप द्विजोत्तम॥ स्वीकृत्य दुष्कृतं घोरं क्षिप्रं शांतिं प्रयच्छ मे॥ व्रतपूर्त्यै शुक्लां गां च दत्वा
दद्यादिति॥ ॥इति व्रतोद्यापनकौमुद्यां लक्षपूजानमस्कारलक्षप्रदक्षिणाविधानं समा
प्तं॥ ॥अथ लक्षवर्तिव्रतं॥ ॥तत्र आदौ एकसूत्रवर्तिकाव्रतं॥ वायुपुराणे॥ श्रावणशु
क्लप्रतिपदादारभ्य कार्तिकपौर्णमासीपर्यंतं प्रत्यहं एकसहस्रवर्तिकादीपनं कार्यं॥ अंते
उद्यापनं॥ अथवा माघवैशाखपौर्णिमायां॥ एतेषां अभावे शुभकाले कार्यं॥ तिथ्यादिसं
कीर्त्य आत्मनः रजःसंपर्कादि विविधपातक स्त्रयागम्यागमनकोटिनाशन विवर्धद्धिक पु
त्रपौत्रादिसुखप्राप्तिपूर्वकविष्णुलोकप्राप्तिद्वाराश्रीप्रीत्यर्थं आचरितं प्रलक्षवर्ति व्रतं तत्संपू

१४३ र्णफलावाप्तयेतदुपापनाख्यंकर्मकरिष्ये॥इतिसंकल्प्य॥ततआचार्यःसर्वतोभद्रेकलशं
प्रतिष्ठाप्यतन्मध्येदेवोइदंविष्णुरितिमंत्रेणदेवंश्रियासहितंविष्णुंतद्दक्षिणेसावित्र्यास
हितंब्रह्माणंब्रह्मजज्ञानमितिमंत्रेणविष्णोरुत्तरेउमयासहितंशंभुंनमःशंभवेचमयो
भवेचेतिमंत्रेणइतिदेवतात्रयंसंस्थाप्यपुरतःरजतंगरुडंप्रतिष्ठाप्यसंपूजयेत्॥चंदनो
त्तरंअंगपूजा॥कालायनमः॥शिरःपूजयामि॥विष्णवे०।ललाटंपू०।वह्नये०।नेत्रंपू०।रवे०।
कर्णौ०।दीप्ताय०।नासां०।निशाकराय०।मुखंपू०।रुद्राय०।कंठं०।शेषाय०।स्कंधौ०।जगद्व्या
पिने०।बाहू०।तेजोरूपाय०।स्तनौ०।सर्वेश्वराय०।वक्षःपू०।निरंजनाय०।उदरं०।फलाध्य
क्षाय०।नाभिंपू०।विश्वरूपिणे०।कटिं०।जगत्प्रभवे०।गुदं०।वरप्रदाय०।ऊरू०।स्वयंभ्वो १४३

तिने०।जानुनीपू०।चतुर्व्यूहाय०।गुल्फौ०।जनाधिपाय०।पादौ०।परब्रह्मणे०।सर्वांगंपू०।वि
शेषोपहारादिसमर्प्य॥रात्रिंनिनयेत्॥प्रातःसाज्यतिलैर्यवैः॥अग्नेनयसुपथेतितज्जाव
र्यादशांशतःतर्पणंकृत्वातर्पणदशांशेनहोमंकुर्यात्॥तद्यथा॥अग्निंप्रतिष्ठाप्य॥अ
न्वादध्यात्॥प्रधानदेवंलक्ष्मीसहितंविष्णुंघृताक्तपायसपलाशसमित्घृतद्रव्यैःसहस्र
संख्याकाहुतिभिः।तथाब्रह्मशंभुअष्टाविंशतितिलाहुतिभिः।मंडलदेवताश्चएकैकयाज्या
हुत्यायक्ष्ये॥अत्रक्रमः॥अग्नेनयसुपथायमंइदंविष्णुरितिमंत्रेणपलाशसमिदःविष्णुग
यत्र्याघृतंचहुनेत्॥ततःपीठस्थंदेवंसंपूज्यगोघृतेनाष्टोत्तरसहस्रवर्तिभिःआरार्तिकंकृत्वा
ततःआचार्यंसंपूज्यपीठघृतपूरितत्रिंशत्पलपरिमितंकांस्यपात्रंयथाशक्तिवातथासुवर्ण

 र्त्तिसंयुक्तं रौप्यप्रणितांचदद्यात्॥ तत्रमंत्राः॥ रौप्यपात्रस्थितं देवैर्हेमी वार्त्तिसमन्वितं॥ कां
स्यपात्रेण सहितं ददामि व्रतपूर्त्तये॥ ततो गां च दत्वा दशाधिकान् विप्रान् सदन्नेन भोजयेत्॥ इति
एवमेव माणिक्यलक्षवर्त्तिव्रतं॥ पूर्वोक्तेन विधानेन कुर्यात् सर्वमतंद्रितं॥ ॥ इति एकसूत्रल
क्षवर्त्तिमाणिक्यलक्षवर्त्तिव्रतं॥ ॥ अथ रुद्रलक्षवर्त्तिव्रतं॥ ॥ तिथ्यादि संकीर्त्य अखिलदु
रितनाशाभीष्टसिध्यर्थं पूर्वक शिवलोकप्राप्तिद्वारा सांबसदाशिवप्रीत्यर्थं आचरितरुद्रलक्ष
वर्त्तिव्रतस्योद्यापनं करिष्ये॥ इति संकल्प्य॥ व्रताचार्यः लिंगतोभद्रे तांम्रकलशोपरि हैमं सां
बं रुद्रं॥ कद्रुद्रायेति मंत्रेण प्रतिष्ठाप्य रौप्यं पुरतः वृषभं च संपूज्य पुराणपठनादिना रात्रिं नि
नयेत्॥ प्रातः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ प्रधानदेवं सांबं रुद्रं रुद्रसूक्तेन ॐ नमः शिवा

येति मंत्रेण वा घृतपायससबिल्वद्रव्यैः सहस्राहुतिभिः मंडलदेवताश्च एकैकया आहुत्या यक्ष्ये॥
ततः पीठं गां दीपं च दत्वा एकादशाधिकान् द्विजान् भोजयेदिति॥ अत्र वत्तर्दशांशः तर्पणं तद्
शांशतः हवनं तद्दशांशतः द्विजभोजनं च प्रतिपदोक्तं नास्ति होमदशांशतः साधारणं तर्प
णं॥ कांस्यपात्रसहितं दीपदानं च पूर्ववत् कर्त्तव्यं॥ एवमेव स्कंदभविष्ययोः॥ बिल्वलक्षव
र्त्तिव्रतोद्यापनं उक्तं॥ ॥ रुद्रलक्षवत्तर्वत्॥ सर्वमनुष्ठानं ज्ञेयं॥ रुद्रलक्षकर्पूरदीपदानमु
क्तं शैवागमे॥ तिथ्यादि संकीर्त्य अखिलपापक्षयपूर्वक शिवलोककामनया आचरितल
क्षकर्पूरदीपसांगतासंसिद्ध्यर्थं तदुद्यापनं करिष्ये॥ इति संकल्प्य॥ व्रताचार्यः पीठे सांबं भवं॥
नमो भवाय च रुद्राय चेति मंत्रेण संस्थाप्य पूजयेत्॥ प्रातः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ अ

त्रप्रधानं॥भवं सहस्रतिलाहुतिभिः मंडलदेवताश्च एकैकयाज्याहुत्यायक्ष्ये॥ततः पाठं गां

१४५ त्रप्रधानं॥भवंसहस्रतिलाहुतिभिः मंडलदेवताश्च एकैकयाज्याहुत्यायक्ष्ये॥ततः पाठं गां
चदत्वाद्विजान्भोजयेत्॥होममंत्रः स्थापनोक्तः॥इतिकर्पूरलक्षदीपविधिः॥ ॥
अथलक्षदीपविधानं॥ ॥विष्णुधर्मोत्तरे॥पंचायतनदेवतानांआराधस्यैवचाग्रतः॥
चातुर्मास्येथसंप्राप्ते शुभेवामासिभूमिप॥प्रसेकंचैकदीपंचदीपितंगोघृतेनच॥तिलतै
लेनवाकुर्यात्कर्पूरेणसमन्वितं॥दीपप्रज्वाल्यविधिवत्वर्साकार्पाससंभवा॥एकस्त्र्या
त्रिवर्ती॥ वाबिल्वाख्यामाणिकान्विता॥एवंप्रकारेणलक्षदीपदानदेवायकत्वाकार्त्तिका
पौर्णमायांउद्यापनंकुर्यात्॥तद्यथा॥तिथ्यादिसंकीर्त्य आत्मनः विविधपापक्षयपूर्वक
अभीष्टकामसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थं आचरितलक्षदीपदानसांगतासिद्ध्यर्थंतदुद्यापनाख्यं १४५

कर्मकरिष्ये॥व्रताचार्यः सर्वतोभद्रस्थकलशोपरि हैमंपूज्यदेवंतत्तन्मंत्रेण संस्थाप्यसंपूज्य
रात्रौजागरंकृत्वाप्रातः आग्निंप्रतिष्ठाप्यअन्वादध्यात्॥अथप्रधानं॥पूज्यंदेवंतंघृतात्क्तति
लद्रव्येणसहस्राहुतिभिः मंडलदेवताश्च एकैकमाज्याहुत्यायक्ष्ये॥ततः पीठंसुवर्णवर्ति
संयुक्तंरौप्यपात्रस्थदीपंघृतपूरितकांस्यपात्रसहितंब्राह्मणायदत्वागांचप्रतिपाद्यद्विजा
न्भोजयेत्॥ ॥इतिचतुर्विधव्रतोद्यापनंकर्पूरलक्षदीपपृथक्पृथक्लक्षदीपविधा
नंचसमाप्तं॥ ॥अथपार्थिवलिंगोद्यापनं॥ ॥लैंगेरुद्रयामलभविष्योत्तरोवागमेउक्तं॥
तत्रविधिः॥सहस्रंवाप्यलक्षंवाकोटिंवाथविधानतः॥लिंगानीपूजयित्वाचसर्वान्कामा
नवाप्नुयात्॥मल्लिंगंपार्थिवंमल्लक्षणंभुक्तिमुक्तिमुक्तिकरंपरं॥त्रिसंध्ययोर्च्चयेल्लिंगंकृत्वा

१४५ बिल्वेनपार्थिवं॥एकंदशशतंवापिसर्वाभीष्टमवाप्नुयात्॥शुद्धप्रदेशसंभूतांमृदमा
हृत्ययत्नतः॥शुद्धेनवारिणाभ्युक्ष्यसुसंक्ष्यंतुतत्पुनः॥लिंगानांसंख्ययाकुर्यात्पृथक्
पिंडान्यथाक्रमं॥पलद्वयान्नकर्तव्यंन्यूनंलिंगंसदैवहि॥अखंडंतुचरंलिंगंद्विखंडंस्था
वरंस्मृतं॥लिंगंआदौविधायाथपीठिकांरचयेत्ततः॥पक्वजंबूफलाकारंलिंगंकुर्यात्
मनोरमं॥वर्तुलंचतुरस्रंवासमंपीठेद्वयंशुभं॥दर्शनादेवलिंगस्यदेवगंधर्वदानवाः॥
तत्क्षणंपूजयेत्साशुरर्चितंवैनसंशयः॥साक्षात्तंस्थापयेत्तस्मात्निर्माणक्षणएवतत्॥
पूजास्थानंस्कंदे॥पाषाणदारुजेदेशेदर्भांतरितसुस्थले॥पुष्पप्रकरसंकीर्णेप्रांगणेवावे
दिकाभुवि॥सबिल्वताम्रपात्रेवास्थापयेत्पार्थिवंशिवं॥मृद्भिःसहस्रएवाशुसंक्षालितं १४५

करोथवा॥पंचाष्टषोडशप्रोक्ताःद्वात्रिंशदुपचारकाः॥यस्तुपूजयेभक्त्यालिंगंत्रिभुवने
श्वरं॥संस्वर्गराज्यमोक्षाणांक्षिप्रंभवतिभाजनं॥आदौकल्याणंरंचलिंगंकुर्यात्ततःप
रं॥पश्चाच्छक्तितत्तस्कंदंततोलिंगान्यथाविधि॥हरोमहेश्वरःशंभुःशूलपाणिःपिनाक
धृक्॥मृडःपशुपतिश्चैवमहादेवइतिक्रमात्॥मृदानयनसंघट्टप्रतिष्ठाह्वानमेवच॥स्न
पनंपूजनंदेवक्षमस्वेतिविसर्जनं॥अथकामनापरत्वेनएकादशप्रकारः॥तदुक्तंपार्थि
वचिंतामणौ॥ऋणमोचनकामश्चएकशतदिनपर्यंतंप्रत्यहंएकलिंगंकृत्वार्चयेत्पुष्प
धनेनैवेद्यं॥अनृणाअस्मिन्इतिऋचंअष्टोत्तरशतंजपः॥आशानेनप्रतनोपिदृश्यनेनअ
ष्टोत्तरशतदूर्वार्पणं॥पुत्रोभवति॥कन्याकामस्तुत्रिंशतदिनंप्रत्यहंलिंगाष्टयंकृत्वाकरपी

१४७ रपुष्पंशर्कराननैवेद्यं॥पावीरवीतिकन्येतिमंत्रअष्टोत्तरशतंजपेत्॥मानतेनप्रत्तनोषीति
अष्टोत्तरशतंदूर्वार्पणं॥कन्याभवति॥ ॥द्रव्यकामस्तुचतुःशतदिनपर्यंतंमत्स्यचत्वारि
लिंगानिकृकिंशुकंपुष्पंकदलीफलनैवेद्यं॥श्रीसूक्तंदशावारंप्रत्यहंपठेत्॥द्रव्यागमोभव
ति॥विवाहकामः प्रत्यहंपंचलिंगानिपंचशतदिनपर्यंतंकृत्वाचंपकपुष्पंपायसंनैवेद्यं॥
गौरीर्मिमायेतिसूक्तंअष्टोत्तरशतंजपेत्॥कलहनिवृत्तिकामः॥त्रिंशत्दिनपर्यंतंप्रत्यहं
षट्लिंगानिकृत्वाबकुलपुष्पंमधुनैवेद्यं॥मुंचामित्वेतिसूक्तंदशधाजपेत्॥तीर्थयात्रा
कामः॥पंचाशत्दिनपर्यंतंप्रत्यहंसप्तलिंगानिकृत्वाशतपत्रपुष्पंदध्योदननैवेद्यं॥रु
द्रैकादशानीजपः॥विद्याकामः॥ ॥त्रिंशत्दिनपर्यंतंप्रत्यहंअष्टौलिंगानिकृत्वाबिल्व १४७

पत्रंलड्डुकनैवेद्यं॥यछंदसामृषभोविश्वरूपःइत्यनुवाकंदशधाजपेत्॥अपमृत्युहर
णकामः॥एकशतदिनपर्यंतंप्रत्यहंनवलिंगानिकृत्वाधत्तूरपुष्पंदध्योदननैवेद्यं॥त्र्यंब
कमितिमंत्रंआद्यंतप्रणवंअष्टोत्तरसहस्रंजपेत्॥दूरगतसुतदागमः॥वर्षमेकंप्रत्य
हंदशलिंगानिकृत्वाकांचनपुष्पंअपूपनैवेद्यं॥योरुद्रोअग्नावितिअष्टोत्तरशतंजपेत्॥
सर्वदारिद्र्यनिवृत्तिकामः वर्षमेकंप्रत्यहंदशलिंगानिकृत्वारक्तद्रोणपुष्पंसर्वान्ननैवेद्यं
घृताक्तंनमोहिरण्यबाहवेइतिमंत्रंअष्टोत्तरशतंजपेत्॥इत्येकादशप्रकारः॥कारागृ
हमेमचनविशेषः॥कारागृहमोक्षकामः एकविंशतिदिनपर्यंतंएकोत्तरवारवृध्यालिं
गानिकृत्वात्रिंशद्दिनमारभ्यपुनःएकैकह्रासेनलिंगानिकृत्वायावत्लिंगानिभवंतिता

१४८ चतप्रसहस्रं रुद्रैकादशान्याभिषेक ॥ पालाशपुष्पं ॥ दधिमधुघृतमिश्रान्नं नैवेद्यं ॥ अष्ट
सहस्रं त्वरितरुद्रं जपेत् ॥ निगडान्मुक्तो भवति लिंगसंख्या मूलभेदमाह ॥ एकं पापहरं
लिंगं द्विलिंगं श्रीकरं त्रिलिंगं सर्वकामदं विद्याकामे सहस्रं स्त्रीकामे पंचशतं जपं कृत्वा
पुत्रकामे पंचशतायुतानि कन्याकामे अयुतत्रयं भूकामे सहस्रं वारूपकामे त्रिसहस्रं
राज्यकामे लक्षं मारणे सप्तसहस्रं उच्चाटने पंचसहस्रं स्तंभने त्रिसहस्रं जारणे द्विसहस्रं
कारागृहमोचन अयुतं ॥ निगडमोचने सार्धमयुतं डाकिन्यादिभये पंचशतं राजभये
अयुतं दारिद्र्यमोचने पंचसहस्रं सर्वकामे सप्तायुतानि मोक्षकामे लक्षं ॥ परमसायु
ज्ये कामे कोटिः ॥ सौवर्णलिंगं सौभाग्यकारं ॥ राजतं यशस्करं ॥ ताम्रमयं पुष्टिकरं ॥ १४८

पित्तलमयं तुष्टिकरं ॥ कांस्यमयं कार्त्तिकरं ॥ लोहमयं शत्रुमारणकरं ॥ सीसमयं आ
युःकरं ॥ पाषाणमयं पुण्यकरं ॥ काश्मीरं श्रीकरं ॥ मारकतं शांतिप्रदं ॥ स्फाटिकं बहु
स्वामित्वकरं ॥ इंद्रनीलमयं पोषणकरं ॥ मुक्तामयं श्रेयस्करं ॥ पारदं सर्वसिद्धिकरं ॥ चंदनजं
ज्वरनाशकरं ॥ कर्पूरजं शांतिकरं ॥ कस्तूरीभवं सुगंधिकरं ॥ गोरोचनभवं करूपकरं ॥
यक्षकर्दमजं प्रीतिकरं ॥ गोमयजं सर्वरोगहरं ॥ भस्मोद्भवं मोक्षकरं ॥ हरिद्रं प्रीतिकर्ष
णं ॥ नवनीतजं कीर्त्तिकरं ॥ दधिजं लक्ष्मीकरं ॥ दुग्धजं सुखकरं ॥ शार्करोत्थं पुत्रकरं ॥ ल
वणोत्थं सर्वलोकवशंकरं ॥ कृष्णतिलोद्भवं शिवलोकप्रदं ॥ उक्तेष्वेतेषु लिंगेषु पार्थिवं
क्षिप्रसिद्धं ॥ कृते मणिमयं लिंगं त्रेतायां हेमसंभवं ॥ द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे ॥

१४९ इति॥ अथारंभकालः॥ शैवागमे॥ कार्तिके मार्गशीर्षे वा माघे वैशाखसंज्ञिते॥ श्रावणे
बहुले पक्षे व्रतस्याचरणं भवेत्॥ स्थलविशेषमाह॥ पुण्यारण्ये नदीतीरे पर्वताग्रे शिवाल
ये॥ श्रीवृक्षाश्वत्थतुलसीछायायुते वने॥ गोष्ठे गृहे वा देवाग्निसूर्यगोविप्रसन्निधौ॥ शि
वपूजाविधानस्यापूर्वपूर्वं महाफलं॥ समापनकालः॥ कार्तिकादिशुभे मासि लिंगानां च
समापनं॥ चतुर्दशी दर्शयुक्ता अष्टमी नवमीयुता॥ समाप्तिस्तत्र कर्त्तव्या रौद्रयुक्ते पुनर्वसौ
॥ अन्येष्वपि च कालेषु शुभेषु च समापनं॥ ॥ अथोद्यापनं॥ तिथ्यादि अन्येष्वपि च का
लेषु शुभेषु च समापनं॥ तिथ्यादि संकीर्त्य अमुककामनामुद्दिश्य कृतानां पार्थिवलिंगानां
पार्थिवलिंगानां पूर्णफलावाप्तये तदुद्यापनं करिष्ये॥ इ तिसंकल्प्य॥ पुण्याहवाच १४९

नादि विधाय॥ व्रताचार्यः सर्षपादिना भूतान्युत्सार्य द्वारपूजां कुर्यात्॥ चतुर्दशी पक्षे भि
त्तिमंडपस्येशानभागे स्थितासदाशिवमंडपाय नमः॥ प्राग्द्वारपार्श्वयोः नंदिने नमः॥ म
हाकालाय नमः॥ विघ्नर्त्तये न॰ मयाशान्त्यै॰ द्वारश्रियै॰ वास्तुपुरुषाय॰ दक्षिणद्वारपार्श्व
योः॥ गणेशाय॰ वृषभाय॰ चित्रशान्त्यादि पूर्ववत्॥ उत्तरद्वारपार्श्वयोः॥ रटिने न॰ चंडी
श्वराय॰ शान्त्यादि पूर्ववत्॥ ततः पश्चिमद्वारेण प्रविश्य वेदिपश्चिमतः उपविश्य लिंगतोभ
द्रमत्स्यादि देवतास्थापनपूर्वकं कलशं प्रस्थाप्य॥ तदुपरि देवं स्थापयेत्॥ तत्र आदौ न्यासं कुर्या
त्॥ ललाटे शिवाय॰ कंठे रुद्राय॰ नाभौ ईशानाय॰ जान्वोः शंकरा॰ पादयोः सदाशिवाय॰।
तत आरभ्य नमस्त्यनुवाकेन पयोधारया लिंगस्य अभ्युत्तारणं कुर्यात्॥ लिंगप्रमाणं तु॥ प्र

१५० सहस्रावर्तमानमलिंगंक्रियतेताम्रमानंतदर्धंतदर्धंवाकुर्यात्सौवर्णंराजतंवाकुर्यात्॥ततः
प्राणप्रतिष्ठांतंकृत्वापंचामृताभिषेकंचकृत्वाततःकलशेनमःशंभवेचमयोभवेचनमः
शंकरायचेतिमंत्रेणपंचाक्षरेणवालिंगंसंस्थाप्यतद्वामभागेगौरीम्हिमायेति ॐनमोभगव
त्यैउमादेव्यैशिवप्रियायैनमःइत्यागममंत्रेणवादेवींगौरींप्रतिष्ठाप्यतद्दक्षिणभागे॥तत्पु
रुषायविद्महेवक्रतुंडायधीमहि॥तन्नोदंतिःप्रचोदयात्॥इतिहेरंबंगणेशं॥तद्दक्षिणे॥
तत्पुरुषायविद्महेमहासेनायधीमहि॥तन्नोषण्मुखःप्रचोदयात्॥इतिहेमंस्कंदं॥पु
रतःराजतंवृषभंवृषभंमेतिमंत्रेणसंस्थाप्य॥परितःलोकेशान्प्रतिष्ठाप्यपूजयेत्॥॥
ध्यानं॥मंगलायतनंदेवंभवंकांतंमनोरमं॥ध्यायेत्कल्पतरोमूलेसमासीनंसहोमया॥ १५०

सहस्राणिसहस्रशइतिध्यात्वा॥ॐनमोभगवतेरुद्रायेतिलिंगोपरिअक्षतान्निक्षिपेत्॥ १५०
नमस्ताराययेत्यासनं॥नमःशंभवेतिपाद्यं॥नमःशंकरायेत्यर्घ्यं॥नमःशिवायेत्याचमनीयं॥
नमस्तीर्थ्यायेतिरुद्रसूक्तेनस्नानं॥भवं॥शर्वं॥रुद्रं॥पशुपतिं॥उग्रं॥महांतं॥भीमं॥ई
शानं॥देवंतर्पयामि॥मानस्तोकेतिवस्त्रं॥नमोहिरण्यबाहवइतिउपवीतं॥नमोवः[illegible]
येभूषणं॥नमःश्वभ्यःइतिगंधं॥नमःसोमायेत्यक्षताः॥नमःपापीयेतिपुष्पं॥नमःकप
र्दिनेचेतिधूपं॥नमआशवेचेतिदीपं॥नमोबभ्लुशायेतिआर्तिक्यं॥ततोलिंगोपरिन
मःशर्वायचपशुपतयेचारभ्यनमोवृहतेचवर्षीयसेचेत्यंतेनपुष्पांजलिः॥एषतेरुद्रइति
प्रदक्षिणा॥नमोरुद्रेभ्यइतिनमस्कारः॥ततःस्तोत्रंपठेत्॥नमओंकाररूपायनमो[illegible]पु॥

१५९ र्धते ॥ नमो नादात्मने तुभ्यं नमो बिंदुकलात्मने ॥ अलिंगलिंगरूपाय रूपातीताय ते नमः ॥
त्वं पिता सर्वलोकानां त्वमेव जगतः पिता ॥ त्वं भ्राता त्वं सुहृन्मित्रं त्वं पिता त्वं पितामहः ॥ न
मस्ते भगवन् रुद्र भास्करामिततेजसे ॥ नमो भवाय देवाय उमाकांतसहिताय च ॥ सर्वात्मकृ
तिरूपाय सदा सुरभिणे नमः ॥ पशूनां पतये चैव पावकामिततेजसे ॥ भीमाय व्योमरूपाय व
ह्निरूपाय ते नमः ॥ महादेवाय सोमाय अमृताय नमो नमः ॥ उग्राय यजमानाय नमस्तेक
र्मयोगिने ॥ इति स्तुत्वा क्षमापयेत् ॥ अंगहीनं क्रियाहीनं विधिहीनं महेश्वर ॥ पूजितोसि
मया देव तत्क्षमस्व जगत्पते ॥ इति क्षमाप्य ॥ पुराणपठनादिना रात्रिं निनयेत् ॥ रात्रौ प्रारंभः ॥
तद्दिने उपोषणं ॥ प्रातः अग्निं प्रतिष्ठाप्याज्यादध्यात् ॥ अन्यप्रधानं ॥ होमः ॥ शिवकृतलिंग १५९

दशांशेन दशांशेन वा पायसा मधुराक्तराज्यतिलाक्षतबिल्वपत्रशतपत्रद्रव्याण्येकैकेन के
वलरूपायसेन वा नमः शिवायेति मंत्रेण पंचाक्षरेण वा यक्ष्ये ॥ तथा गौरीगणेशं षण्मुखं च
उक्तद्रव्यैः प्रतिद्रव्यं दशदशाहुतिभिः ॥ वृषभं लोकेशान् ॥ ब्रह्मादिदेवताश्च दशदशाहु
तिभिः ॥ द्वारदेवताश्च एकैकयाहुत्या कुर्याद्यक्ष्ये ॥ शेषेण स्विष्टकृतमित्यादि होमं समा
प्य पूर्णाहुत्यादि कर्मशेषं समापयेत् ॥ ततः होमदशांशेन तर्पणं तद्दशांशेन मार्ज
नं कृत्वा विशेषाकारेण पीठस्थं शिवं संपूज्य आचार्यं च संपूज्य पीठं दद्यात् ॥ तत्र मंत्रः ॥
पीठं गृहाण भूदेव शिवशक्त्यादिसंयुतं ॥ वांछितार्थं प्रयच्छाशु देहि मे व्रतजं फलं ॥ ततः
व्रतपूर्त्यै गां च दत्वा मार्जनदशांशतः यथाशक्ति वा सदक्षिणेन ब्राह्मणान् संतर्प्य व्रतपूर्ण

१५२ तां वाचयित्वा आशिषो गृहीत्वा इष्टैः सह भुंजीत ॥ अत्र मैथुनर्निर्वाणामेव अधिकारः ॥
स्त्रीशूद्राणां तु पूर्वैर्वा पापनाशसिद्धिरिति विशेषात् ॥ ॥ इति श्री वागमोक्त पार्थिवलिंगोपा
पनं ॥ ॥ अथ पार्थिवगणेशोपापनं रुद्रयामले ॥ ॥ महादेव उवाच ॥ यथा पार्थिव
लिंगं तु सर्वसिद्धिविधायकं ॥ यथा विघ्नेश्वरं देवं पार्थिवं सर्वकामदं ॥ निर्विघ्नं जायते का
र्यं सर्वसिद्धिं पुमान् लभेत् ॥ षट्कर्माणि तथा च शृणुष्वैकमना भव ॥ रक्तोपचारैः सिं
दूरैः रक्तमाल्यांबरैस्तथा ॥ जपापुष्पैः करवीरैः सुकुमैः क्षीरपायसैः ॥ संपूज्य वश्य
ता भियं चिंतयते नरः ॥ शुक्लमाल्यैः शुक्लवस्त्रैः ओदनैर्दधिमिश्रितैः ॥ माल
तीकुसुमैर्धूपैर्दशांगैः शांतिलभ्यते ॥ कवितायाः पडिं सजायते नात्र संशयः ॥ मो १५२

हनेमधुभिः स्नाप्य मधुपायसमर्पयेत् ॥ असितैः कुसुमैः पूज्यो दमनेन सिताऽगुरुं ॥ समारो
ध्याचयेद्व तस्या त्रैलोक्यं मोहयेत्क्षणात् ॥ स्तंभने निशाया युक्तैरुपचारैः समर्चयेत् ॥ अट
कीभक्तनैवेद्यैश्वेतदूर्वाभिरेव च ॥ कारयेन्निंबरजसं धूपं रात्रौ स्तंभयेत् ॥ मारणे माहिषे
चर्मण्या स्थाप्यासितकं बलं ॥ धत्तूरैरर्चयेत्पुष्पैः सर्षपाक्षतमिश्रितैः ॥ नैवेद्यं गुडसंमिश्रमा
हिषीक्षीरसंयुतं ॥ भक्तं दद्यात्क्षुद्रं वदेयं छागमांससमन्वितं ॥ अभिषेकं स्नतैलेन महागणप
तये निवेदयेत् ॥ धूपं दमनजं नरो पुष्पैः सप्त समर्पयेत् ॥ एवं गणाधिपं कृत्वा पूजयेत्पार्थिवं नरः ॥
यं यं कामं अभिध्यायन् तं तं सद्यः समाप्नुयात् ॥ इति ॥ पार्थिवविशेषः ॥ सहस्रं दशसाहस्रं लक्षं
कोटिं तथैव च ॥ यः करोति गणेशानां पार्थिवानां नरोत्तमः ॥ स सर्वसिद्धिमाप्नोति नात्र कार्या वि

१५२ धारणा॥ कारागृहमोचनकामः॥ एकविंशतिदिनपर्यंतं एकोत्तरवारं वृध्या पार्थिवग
णेशान् कृत्वा वक्ष्यमाणप्रकारेण संपूज्य पुनः॥ द्वाविंशतिदिनमारभ्य एकैकह्रासप्रथ
मदिनपर्यंतं गणेशान् कृत्वा यावत् गणेशा भवंति तावत् प्रत्यहं गणेशाथर्वशिरसाभिषे
कः॥ मूलमंत्रस्यापि तावत्सहस्रजपः अभीष्टसिद्धिर्भवति॥ एकविंशति पुष्पाणि॥
दाडिमी च जटामांसी बदरी नागचंपकः॥ बृहती च तथा पाची भृंगराजस्तथैव च॥ मा
लती कुसुमैश्चैव तुलसी माधवी तथा॥ पारिजातं जपापुष्पं बंधूकं चैकविंशतिः॥ पु
ष्पाभावे पत्रं ग्राह्यं॥ अपूपशर्करा[illegible]ं नैवेद्यं कदलीफलं॥ नारिकेरं ससिंदूरं दूर्वा गु
ग्गुलधूपः॥ इदं प्रत्यहं साधारणं॥ अथ सर्वसाधारणपूजोच्यते॥ ॥ अभीष्टसिध्य १५२

र्थं पार्थिवगणेशपूजां करिष्ये॥ इति संकल्प्य॥ अश्वत्थमूलजां तुलसीमूलजां वा शुद्ध
स्थलजां वा मृदं आनीय पृथ्वी त्वया धृतेति धरां प्रार्थ्य दत्वा॥ ॐ गां गणेशाय नमः॥ मृदा
हरणं॥ ॐ गीं गणपतये नमः॥ सेचनं॥ ॐ गूं हेरंबाय नमः॥ संघट्टनं॥ ॐ गैं धरणीधराय नमः॥
ॐ क्षिप्रप्रसादनाय नमः॥ चतुर्भुजां एकदंतां सुंदरां मूर्तिं कृत्वा ॐ गः सर्वसिद्धिप्रदाय नमः॥
मस्तकोपरि रक्ताक्षतान् दत्वा तद्दिक्षु देवं मानसोपचारैः संपूज्य नासारंध्रेण अंजलिस्थ सा
क्षतपुष्पे संयोज्य देवमस्तके अक्षतापुष्पादि निधाय प्राणप्रतिष्ठां कुर्यात्॥ ततः स्ववामभा
गे कलशं संपूज्य देवं ध्यायेत्॥ तत्रादौ स्वशरीरे देवे च न्यासं कुर्यात्॥ ॐ गां गीं गूं गैं गौं गः॥
षडंगं कृत्वा मूलमंत्रेण षडंगं कुर्यात्॥ तद्यथा॥ अस्य श्री गणपतिमंत्रस्य गणपतिऋषिः॥ नि

१५७ वृत्तगायत्रीछंदः॥गणपतिर्देवता॥गंबीजं॥ॐ शक्तिः स्वाहा कीलकं॥न्यासादौ विनियो
गः॥ॐ नमो हेरंबमदमोदित मम संकटान् निवारय निवारय स्वाहा॥एवं षडक्षरन्यासं
कृत्वा ध्यायेत्॥रक्तो रक्तांगरागांशुककुसुमयुतः स्कंदिलश्चंद्रमौलिर्नेत्रैर्युक्तस्त्रिभिर्वामना
नकरचरणो बीजपूरात्तनासः हस्ताग्राक्लृप्तपाशांकुशरदवरदो नागवक्त्रोऽहिभूषो देवः प
पद्मासनो नो भवति सुरनतो भूपते विघ्नराजः॥इति ध्यात्वा मूलमंत्रेण नाममंत्रेण च पूजयेत्
॥ॐ गणंजयाय नमः॥आवाहनं॥गणपतये नमः॥आसनं॥हेरंबाय०॥पाद्यं॥धरणीध
राय नमः॥अर्घ्यं॥महागणपतये०॥मधुपर्कं॥यक्षेश्वराय०॥आचमनीयं॥क्षिप्रप्रसादना
य०॥मलापकर्षस्नानं॥अमोघसिद्धये०॥पंचामृतस्नानं॥अमृताय०॥शुद्धोदकस्नानं॥रुद्रे १५७

णगाणपत्येन सूक्तेन अथर्वशीर्षसाम्ना वा महाभिषेकः॥मंत्राय नमः०॥वस्त्रं॥चिंतामणये
नमः०॥उपवीतं॥निधये०॥गंधं॥सुमंगलाय०॥रक्ताक्षतान्॥बीजाय०॥पुष्पं॥आशापूरका
य०॥सुगंधद्रव्यं॥वरदाय०॥दीपं॥शिवाय०॥महानैवेद्यं॥कश्यपाय०॥तांबूलं॥नंदनाय०॥
दक्षिणां॥वाचासिद्धाय०॥फलं॥ढुंढिविनायकाय०॥नीराजनं॥सर्वकेटसेनाराय०
मंत्रपुष्पं॥कुमारगुरवे नमः॥प्रदक्षिणा॥अपनाशनाय०॥नमस्कारः॥एवं चतुर्वि
शत्युपचारान् समर्प्य॥ततः गणंजयादारभ्य ढुंढिविनायकांतं एकविंशतिः नामभिः
एकविंशतिश्चेत दूर्वांकुरान् आभावे अन्यान् समर्प्य मूलमंत्रं अष्टोत्तरशतं जप्त्वा विशे
षार्घ्यं दत्वा क्षमापयेत्॥अंगहीनं क्रियाहीनं भक्तिहीनं गणेश्वर॥पूजितोसि मया देव

१५६ तत्क्षणमसञ्जायते॥ इति शैवागमोक्तपूजाविधिः॥ एवं प्रकारेण सहस्रं अयुतं लक्षं कोटिं
पार्थिवान् गणेशान् कृत्वा अंते माघादिशुभे काले उद्यापनं कुर्यात्॥ ॥तद्यथा॥ तिथि
ध्यादि संकीर्त्य अमुककामनां कृतानां पार्थिवगणेशानां संपूर्णफलावाप्तये तदुद्याप
नं करिष्ये॥ इति संकल्प्य॥ ततआचार्यः चतुर्द्वारोपशोभितमंडपांतर्वेदिकायां सर्वतोभ
द्रे ब्रह्मादिदेवतास्थापनपूर्वकं कलशं प्रतिष्ठाप्य तत्र देवं स्थापयेत्॥ तत्रादौ पूर्वोक्तान्
न्यासान् कृत्वा अश्मन्नूर्जमिति अनुवाकेन पयोधारया प्रतिमायाः अग्न्युत्तारणं कुर्यात्॥
प्रतिमाप्रमाणं तु प्रसृतं यावन्मानं मतं गणेशं त्रिः पतितावन्मानेन तदर्धेन तदर्धेन वासौ
वर्णराजतं वादेवं कुर्यात्॥ ततः प्राणप्रतिष्ठां कृत्वा मूलमंत्रेण गणानां त्वेति वा प्रतिष्ठाप्य १५६

आवर्णानि पूजयेत्॥ पूर्वादिक्रमेण॥ वक्रतुंडाय नमः॥ एकदंष्ट्राय०॥ गजाननाय०॥
महोदराय०॥ विकटाय०॥ विघ्नराजाय०॥ धूम्रवर्णाय०॥ हेरंबाय०॥ ततः ब्राह्म्यै पूर्वादि॥ ब्रा
ह्म्यै०॥ माहेश्वर्यै०॥ कौमार्यै०॥ वैष्णव्यै०॥ वाराह्यै०॥ इंद्राण्यै०॥ चामुंडायै०॥ विनायक्यै०॥ ततः
लोकेशान् आवाह्य पूर्वोक्तपूजाप्रकारेण पूजयेत्॥ पुष्पोत्तरं अंगपूजा॥ गणनाथाय०॥
पादौ०॥ गणेशाय०॥ जानुनी०॥ गणंजयाय०॥ ऊरू०॥ गणक्रीडाय०॥ कटिं०॥ वक्रतुंडाय०॥ हृ
दयं०॥ लंबोदराय०॥ कंठं०॥ गजाननाय०॥ स्कंधौ०॥ हेरंबाय०॥ हस्तौ०॥ विकटाय०॥ आस्यं पू०॥
विघ्नराजाय०॥ नेत्रे०॥ धूम्रवर्णाय०॥ शिरः पू०॥ सर्वसिद्धिप्रदायकाय०॥ सर्वांगं पू०॥ एवं संपूज्य
स्तोत्रं कृत्वा पुराणपठनादिना रात्रिं निनयेत्॥ प्रातः अग्निं प्रतिष्ठाप्य॥ अन्वारभ्यात्॥ प्रधा

१५७ तः॥प्रधानं देवं। महागणपतिं पायसाज्यमोदकरक्ताक्षतपंचखाद्यशमीदूर्वा१ केन तिल
पायसेन वा कृतगणेशदशांशेन शतांशेन वा यक्ष्ये॥ आवर्णदेवताः मंडलदेवताश्च दश
तिलाहुतिभिः यक्ष्ये॥ एक्ष्ये॥ एवं होमं समाप्य॥ देवं संपूजयेत्॥ होममंत्रास्तु॥ आनून
इंद्र इति गणानां त्वेति मूलमंत्रो वा ततः होमदशांशेन तर्पणं तद्दशांशात मार्जनं कृत्वा
ततः आचार्याय संपूज्य पीठं निवेद्य गां च दत्वा एकविंशति ब्राह्मणान् संपूज्य पक्वान्न
पूरितकलशान् वस्त्रयुग्मसहितं सदक्षिणं तेभ्यः प्रत्येकं पूर्वोक्त पुष्पांजलिस्थ एकविंश
तिनामभिः दत्वा मार्जनतद्दशांशतः ब्राह्मणभोजनसंकल्पं कृत्वा भूयसीं च दत्वा सद
न्नेन द्विजान् संतर्प्य व्रतपूर्णतां वाचयित्वा शिषो गृहीत्वा इ१जनैः सह भुंजीत॥ अयं उ १५७

द्यापनप्रकारः॥ रुद्रयामलोक्तः॥ ॥इति चित्तपावनकुलाब्धिसंभवपारेस्कपनाम
कबल्लाळसूरिसूनुशंकरविरचितायां व्रतोद्यापनकौमुद्यां पार्थिवलिंगगणेशोद्यापनं
समाप्तं॥ ॥अथ तुलसीविवाहविधिः॥ ॥विष्णुयामले॥ आदावेवाथ तुलसीं वने वा
स्वगृहेपि वा॥ मासमात्रेण संवर्ध्य ततो यजमानमारभेत्॥ सौम्यायने प्रकर्तव्यं गुरुशुक्रो
दये तथा॥ अथवा कार्तिके मासि भीष्मपंचदिने यथा॥ वैवाहिके सुनक्षत्रे सुपौर्णिमायां वि
शेषतः॥ मंडपं कारयेत्तत्र कुंडवेदीविवाहवत्॥ ब्राह्मणं देशिकं चैव चतुरश्च तथर्त्विजः॥
गृह्ययज्ञे पुरस्कृत्य समावर्णं यजनं तथा॥ कृत्वा नांदीमुखश्राद्धं सौवर्णं स्थापयेद्धरिं॥ कृत्वा
तुरीयं तुलसीलग्नेत्यस्य मित्तेरवौ॥ गोधूलिके लग्ने इत्यर्थः॥ संपूज्यालंकृतां तां च प्रदद्या

१५८ द्विजतोहस्तोहरेः॥हरयेइत्यर्थः॥समश्रुतेन मंत्रेण वस्त्रयुग्मेन वेष्टयेत्॥यदाबध्नेतिमं
त्रेण कंकणे पाणिपल्लवे॥आजंददातिदिमंत्रेण करग्रहं विधायते॥कर्त्तव्यश्चततोहो
मः विशेषाद्विधिपूर्वकं॥आचार्येवेदिवाकुंडेजुहुयाच्चनचाहुती॥ॐ नमोभगव
तेवासुदेवायस्वाहा॥ॐ नमोनारायणायस्वाहेतिवा॥यजमानः सपत्नीकः॥सहा
मासेश्वगोत्रजैः॥प्रदक्षिणाः प्रकुर्य्याच्चततस्तोविष्णुनासहितंतुलसीइत्यर्थः॥पठे
युः॥शांतिकाध्यायात्तथावैष्णवसंस्तवान्॥गायंतुमंगलंनार्योभेरीतूर्यादिनिस्वनैः॥
गांपीठंचतथाशय्यांआचार्यायनिवेदयेत्॥ऋत्विग्भ्योदक्षिणांदद्यात्॥सदन्नैर्भोज
येद्विजान्॥एवंप्रतिष्ठितांदेवीविष्णवेयः समर्चयेत्॥आजन्मोपार्जितान्पापात्मु १५८

च्यतेनात्रसंशयः॥ ॥अथप्रयोगः॥ ॥तिथ्यादिसंकीर्त्यममअखिलविविधपा
तकशमनपूर्वकअभीष्टसिद्धिद्वाराश्रीमहाविष्णुप्रीत्यर्थंतुलसीविवाहंकरिष्ये॥इ
तिसंकल्प्य॥तदंगस्वस्तिवाचनादिग्रहयज्ञांतंकृत्वाएकंआचार्यंऋत्विजंकृत्वातुलस्या
आलवालंपरितः मंडपंचकृत्वावेद्यांसर्वतोभद्रेहेमंविष्णुंइदंविष्णुरितिमंत्रेणरौप्यमयीं
तुलसींच॥तुलसीश्रीसखिशुभेपापहारिणिपुण्यदे॥नमस्तेनारदनुतेनारायणमनःप्रि
ये॥इतिसंस्थाप्यसंपूज्यवस्त्रभूषणादिनाभूषइत्वागोधूललग्नमध्येअंतःपटंधृत्वावि
वाहवत्सर्वमंगलाष्टकानिपठित्वाअंतःपटंनिःसार्यॐपुण्येसुकृत्वासंकल्प्यपूर्वकंसा
२२२ लंकृतांवस्त्रयुग्मवेष्टितांहरयेतुलसींप्रतिपाद्ययदाबध्नेतिमंत्रेणउभयोःकंकणंबध्वा

१५९ आवदद्यादिति मंत्रेण करग्रहं च कृत्वा आचार्यो वेदिकायां पाकयज्ञविधानेन अग्निं
प्रतिष्ठाप्य॥ तुलसीविवाहहोमे देवतापरिग्रहार्थं मन्वाधानं करिष्ये॥ अत्र प्रधानं॥
विष्णुं त्रयोदशाक्षरे अष्टाक्षरेण वा मंत्रेनानवाज्याहुतीर्यक्ष्ये॥ शेषेण स्विष्टकृतमिति॥
ततो यजमानः॥ चतस्त्राः प्रदक्षिणाः कृत्वा शांतिपाठादि पठित्वा तूर्यादिघोषपूर्वकय
थाविभवं विष्णुतुलसी च संपूज्य पीठं गां च आचार्याय दत्त्वा ऋत्विग्भ्यो दक्षिणां दत्त्वा ब्रा
ह्मणान्भोजयेदिति॥ ॥अथ तुलसीपूजन विष्णुधर्मोत्तरोक्तं लिख्यते॥ तुलसी अं
गणे वेदिकायां रोपयित्वा पूजयेत्॥ अभीष्टसिध्यर्थं तुलसीपूजां करिष्ये॥ ततः कलशं
संपूज्य ध्यायेत्॥ ध्यायामि तुलसीं देवीं श्यामां कमललोचनीं॥ प्रसन्नां पद्मकल्हारवरा १५४

भयचतुर्भुजां॥ किरीटिहारकेयूरकुंडलादिविभूषितां॥ धवलांशुकसंयुक्तां पद्मासननि
षेदुषीं॥ ध्यानं समर्पयामि॥ भगवत्यै० आवाहनं॥ विष्णुवल्लभायै० आसनं॥ सर्वदेवम
यै० पाद्यं॥ सर्वतीर्थमयायै० अर्घ्यं॥ दैत्यांतकप्रियायै० आचमनीयं॥ सर्वलोकहिता
यै० ~~धूपं पापहारिण्यै० दीपं० भगवत्यै०~~ स्नानं॥ लक्ष्मीसहोदरायै० वस्त्रं॥ महादेव्यै०
गंधं॥ रमावासायै० पुष्पं॥ अभीष्टदायै० धूपं॥ पापहारिण्यै० दीपं॥ भगवत्यै० नैवेद्यं॥
अमृतसंभूतायै० तांबूलं॥ अमृतरूपिण्यै० दक्षिणां॥ जगद्धात्र्यै० नीराजनं॥ मृदक्षि
णायै० प्रदक्षिणां॥ परमेश्वर्यै० नमस्कारः॥ अभीष्टदायै० प्रार्थना॥ ततः तुलसीमंत्रं अ
ष्टोत्तरशतं यथाशक्ति वा जपेत्॥ तुलसी श्रीसखि शुभे पापहारिणि पुण्यदे॥ नमस्ते नारदनु

१५० तेनारायणनमःप्रियेः ॥ततःस्कांदोक्तंतुलसीकवचंपठेत् ॥ ॥अस्यश्रीतुलसीकवच
स्यविष्णुऋषिः ॥अनुष्टुपछंदः ॥तुलसीदेवता ॥अभीष्टसिध्यर्थजपेविनि॰ ॥तुलसी
मेशिरःपातुभालंपंकजधारिणी ॥दृशौमेपद्मनयनीश्रीसखीश्रवणेमम ॥घ्राणंसुगंध
मेपातुमुखेचसुमुखीमम ॥जिह्वांमेपातुशुभदाकंठंविद्यामयीमम ॥स्कंधौकल्हारिणी
पातुभुजौमेपापहारिणी ॥करौपद्मकपोरौतुल्हदयंविष्णुवल्लभा ॥पुण्यदामध्यमंपातु
नाभिंसौभाग्यदायिनी ॥कटिंकुंडलिनीपातुउरूनारदवंदिता ॥जननीजानुनीपातु
जंघेसकलवंदिता ॥नारायणप्रियापादौसर्वांगंसर्वरक्षका ॥संकटेविषमेदुर्गेभयेवादे
महाहवे ॥नित्यंहिसंध्ययोःपातुतुलशीसर्वतःसदा ॥इतीदंपरमंगुह्यंतुलस्याःकवचा १५०

मृतं ॥तुलस्याकाननेतिष्ठन्आसीनोवाजिपेदिदं ॥सर्वान्कामानवाप्नोतिविष्णुसायुज्य
मश्नुते ॥इतितुलसीकवचं ॥ ॥अथधात्रीव्रतं ॥विष्णुधर्मोत्तरेतत्रविधिः ॥ ॥आश्वि
नपौर्णिमासस्याकार्तिकपौर्णिमापर्यंतंकर्तव्यं ॥अशक्तौअंतिमदिनत्रयंपौर्णिमायां
वाकार्यं ॥तिथ्यादिसंकीर्त्यममआखिलपापक्षयपूर्वकचतुर्विधपुरुषार्थसिद्धिद्वाराअ
मुकसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंधात्रीमूलविष्णुपूजांकरिष्ये ॥धात्रीपूजांकरिष्ये ॥
इतिसंकल्प्य ॥धात्र्याःआलवालंकृत्वातन्मूलेपंचरंगोपेतांवेदिकांकृत्वा ॥तत्रविष्णुंसंस्था
प्यपूजयेत् ॥तत्रशांताकारंभुजगशयनमितिध्यात्वापुरुषसूक्तेनपूजयेत् ॥पूर्वात्मा कृअं
गपूजा ॥दामोदरायनमःपादौपूजयामि ॥केशवाय॰ ॥कटिंपू॰ ॥नारायणाय॰ ॥उदरपू॰ ॥

१५९ वामनाय०। कंठं०। श्रीधराय०। बाहुं०। गोविंदाय०। मुखं०। सहस्राक्षाय०। नेत्रे०। सर्वेश्वराय०।
ललाटं०। विष्णवे०। शिरः पू०। त्रिविक्रमाय०। सर्वांगं पू०। नमस्कारानंतरं विरोधार्घ्यं॥
पुष्पफलसंयुक्तं दद्यात्॥ तत्र मंत्रः॥ नमः सहस्रशीर्षाय सहस्राय नमेनमः॥ नमस्ते
सहस्रपदे पुरुषाय नमोस्तुते॥ सहस्रनाम्ने देवेश प्रसीद त्वं ममाच्युत॥ अर्घ्यं गृहाण
भगवन् सर्वकामप्रदो भव॥ ततः प्रार्थयेत्॥ भगवंदेवदेवेश लोकनाथ नमोस्तुते॥ अ
क्षया संततिर्मेस्तु दामोदर नमोस्तुते॥ ततः धात्र्ये०॥ इति नाममंत्रेण षोडशोपचारैः
धात्रीं संपूज्य अथवा षोडश नामभिः षोडशोपचारान् कल्पयेत्॥ शांत्यै०। कांत्यै०। मे
धायै०। प्रकृत्यै०। विष्णुपत्न्यै०। महालक्ष्म्यै०। रमायै०। कमलायै०। इंदिरायै०। कल्याण्यै०। १५९

कमनीयायै०। सावित्र्यै०। जगद्धात्र्यै०। गायत्र्यै०। धृत्यै नः। अव्यक्तायै०॥ १६॥ अंगपूजा॥
गंधोत्तरं॥ विश्वरूपायै०। पादौ०। सुरूपायै०। कटिं०। अब्धिसंभवायै०। हृदयं०। लोकमात्रे०।
मुखं०। धात्र्यै०। शिरः०। एवं संपूज्य ततः अष्टदिक्षु दीपान् बलीन् धात्र्यै नमः इति दत्वा तथैव
अष्टकत्वः सूत्रेण वेष्टिं कृत्वा॥ अष्ट कृत्वा प्रदक्षिणाः नमस्कारान् कृत्वा प्रार्थयेत्॥ धा
त्रि देवि नमस्तुभ्यं सर्वपापक्षयंकरि॥ वर्चस्व कुरु मां देवी धनवंतं तथा कुरु॥ पुत्रान् पौ
त्रान् बलं प्रज्ञां देहि मे जगदेश्वरी॥ संवत्सरं कृतं पापं दूरी कुरु ममाक्षये॥ ततो धात्रीमूले
सव्येनैव तर्पयेत्॥ पिता पितामहश्चान्ये अपुत्रा ये च गोत्रिणः॥ वृक्षयोनिगता ये च ये च
कीटत्वमागताः॥ तिर्यग्योनिगता ये च ये चान्ये स्थावरजंगमाः॥ पित्रा चत्व गता ये च कीटत्वा

१५२ मागता॥ तेपिबंतुमयादत्तंधात्रीमूलेस्वयंपयः॥ तेसर्वेतृप्तिमायांतुधात्रीमूलेनिषेच
नात्॥ एवंप्रत्यहंमासपर्यंतंकृत्वाअंतेउद्यापनंपूर्ववत्विधिनामंडलेसौवर्णींधात्री
मूलेहैमंविष्णुंपूर्ववत्संपूज्यघृताक्ततिलैः अष्टोत्तरशतंपृथक्पृथक्तत्तन्मंत्राभ्यां
कृत्वाआचार्यायपीठंव्रतपूर्तयेगांचदत्वासर्वसंपूर्णतासिद्धयेसुवर्णयुक्तघृतपूरित
कांस्यपात्रंदद्यात्॥ तत्रमंत्रः॥ कांस्यंब्रह्ममयंप्रोक्तंआज्यंभोज्यंदिवौकसां॥ सुवर्णं
अग्निदैवत्यंअतःशांतिंप्रयच्छमे॥ ततोद्विजान्संभोज्यआशिषोगृहीत्वास्वयंभुंजीत॥
॥ ॥इतितुलसीविवाहविधानंधात्रीविधानंसमाप्तं॥ ॥अथध्वजारोपणं॥ ब्रह्मनारदी
ये॥ यःकुर्याद्विष्णुभुवनेध्वजारोपणमुत्तमं॥ संपूज्यतेविरिंचाद्यैःकिमन्यैर्बहुभाषितं॥ १५२

सर्वपापहरंकर्मध्वजारोपणसंज्ञितं॥ महापातकयुक्तोपियुक्तोवासर्वपातकैः॥ ध्वजं
विष्णुगृहेधृत्वासर्वपापैःप्रमुच्यते॥ यावद्दिनानिवसतिध्वजंविष्णुगृहेद्विजाः॥ ताव
द्युगसहस्राणिहरितारूपमश्नुते॥ स्वारोपितोध्वजोविष्णुगृहेधून्वन्पटंस्वकामं॥ कर्तुः
सर्वाणिधून्वंतिपापानिनिमिषार्द्धेनइति॥ तत्रविधिः॥ कार्तिकसितदशम्यांनियमान्वि
तःएकादश्यांउपोषितःविष्णुःस्मरणतत्परः॥ द्वादश्यांप्रातःयथाविधिस्नात्वानित्य
कर्मनिर्वर्त्यसंकल्पंकुर्यात्॥ तिथ्यादिसंकीर्त्यअशेषपापोपक्षरोगेकलाभीष्टसिद्धि
पूर्वकविष्णुसारूप्यकामःविष्णुद्वारेध्वजारोपणंकरिष्ये॥ इतिसंकल्प्य॥ पुण्याहवाच
नादिकृत्वाआचार्यंचतुरःऋत्विजःवृत्वातैःसहदेवालयेविष्णुंपौरुषेणसंपूज्यततः

१५२ अस्युध्वजस्तंभौ हारिद्राक्षतगंधपुष्पादिभिः भूषयित्वा शुद्धभूमौ स्थंडिले अग्निं प्रतिष्ठा
प्य अन्वादध्यात्॥ अत्र प्रधानं॥ विष्णुं अष्टोत्तरशतपायसंघृताहुतिभिः सूर्यं बैनतेयं दि
मांश्चुद्धातरंच अष्टाष्टसंख्याकाहुतिभिः पायसाज्याहुतिभिः शेषेण स्विष्टकृतमित्यादि॥
विष्णुहोममंत्राः षोडशर्चं पौरुषं सूक्तं विष्णोर्नुकं इरावतीइति प्रतिद्रव्यं अष्टादशभिर्मं
त्रैः षडावस्याहोमयेत्॥ उदुत्यंजातवेदसः सूर्यस्य॥ सामध्वनिशरीरस्त्वमिति गरुडस्य॥
सोमोधेनुमिति दिमांशोः धातुः धाताददातुनोरयिंमीशानोजगतस्पतिः॥ समः पूर्णेन
वावतत्॥ विधातुः॥ योनः पिताजनितायोविधाता॥ योनः सतोअभ्यासज्जनानइति॥
ततः सौरमंत्रान् शांतिसूक्तानि पठित्वा जागरणादिना रात्रिंनिनयेत्॥ प्रातः देवंसंपू १५२

ज्य ततः सूक्तपाठैः स्तोत्रपाठैः नृत्यमंगलवाद्यघोषैः सह देवं प्रदक्षिणीकृत्य देवालयं
ध्वजौ आनीय देवस्य द्वारदेशिषोशैरस्थरेयासुस्थिरौ कृत्वा पुरुषसूक्तं पठित्वा तौ संपूज्य
पुनः देवालये देवं विशेषाकारेण संपूज्य इदं स्तोत्रं पठेत्॥ ॥स्कंद उवाच॥ ॥नमस्ते
नमस्ते पुंडरीकाक्ष नमस्ते विश्वभावन॥ नमस्तेस्तु हृषीकेश महापुरुषवर्जन॥ यत्रेम
खिलं जातं यत्र सर्वं प्रतिष्ठितं॥ लयमेष्यति यत्रैतत् प्रपन्नोस्मि केशवं॥ न जातं पित
रं भावं यत्र ब्रह्मादयः सुराः॥ योगिनो यं न पश्यंति तं वंदे ईशरूपिणं॥ अंतरिक्षं तु येना
भिः द्यौर्मूर्धा यस्य चैव हि॥ पृथिवी यस्य पादौ च तं वंदे विश्वरूपिणं॥ यस्य श्रोत्रे दिशः स
र्वाः यच्चक्षुर्दिनकृच्छशी॥ ऋक्सामयजुषो नेति तं वंदे ब्रह्मरूपिणं॥ यन्मुखात् ब्रह्मणो

१५४ जावायद्वाद्धोरभवंतपा ॥ वैश्यायस्योरुतोजाता: पद्भ्यांशूद्रोअजायत ॥ मायासंग
स्यमात्रेणवदंतिपुरुषोत्तमं ॥ स्वभावविमलंशुनिर्विकारंनिरंजनं ॥ एकोविष्णुर्महद्भू
तंपृथग्भूतान्यनेकशः ॥ त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः ॥ योदेवःभू
तानांअंतरात्माजगन्मयः ॥ निर्गुणःपरमानंदःसमेविष्णुःप्रसीदतु ॥ परेशःपरमा
नंदःपरात्परतरःप्रभुः ॥ चिद्रूपश्चित्परज्ञेयसमेवि० ॥ ज्ञानिनांकर्मिणांचैवतथाभक्ति
मतांनृणां ॥ गतिदाताविश्वगम्यःस० ॥ यइदंकीर्तयेन्नित्यंस्तोत्राणामुत्तमोत्तमं ॥ सर्व
पापविनिर्मुक्ताःपरंसायुज्यमाप्नुयात् ॥ इतिततोब्राह्मणान्संभोज्यदक्षिणादिनाप्रतो
ष्यआशिषोगृहीत्वास्वयंभुंजीत ॥ एवमेवत्रिबोदीनां ॥ तत्रगरुडस्थानेवृषभः ॥ अन्य १५४

तत्समानं ॥ होमेपिरोरुपंत्र्यंबकंकद्रुद्रायेति ॥ ॥ इतिध्वजारोपणं ॥ ॥ अथकार्तिकादि
मासस्नानोद्यापनं ॥ ॥ पाद्मे ॥ आदौमध्येअंतेवापौर्णमास्यांकार्यं ॥ तिथ्यादिसंकीर्त्य
आत्मनःसकलपापनाशपूर्वकऐहिकामुष्मिकविविधसुखप्राप्तिद्वाराश्रीपरमेश्वर
प्रीत्यर्थंयत्कार्तिकादिमासस्नानंतत्संपूर्णफलावाप्तयेतदुद्यापनंकरिष्ये ॥ इतिसंक
ल्प्य ॥ व्रताचार्यःत्रिंशत्प्रमाणेयथाशक्तिवाकृतेमंडपेपंचरंगोपेतमंडलेब्रह्मादिदेव
तास्थापनपूर्वककलशंहैमंरौप्यंताम्रंषोडशाफलमितंवाप्रतिष्ठाप्यतत्रपूर्णपात्रेअष्ट
दलेकर्षमात्रतंतदर्धंतदर्धंवाहैमंलक्ष्मायुक्तंदामोदरंइदंविष्णुरितिमंत्रेणप्रतिष्ठाप्यपु
रतःगरुडंपरितान्लोकेशान्आवाह्यपुरुषसूक्तेनसंपूज्येस्तोत्रैस्तत्राजागरादिना

१६५ रात्रिंनीत्वाप्रातःअग्निंप्रतिष्ठाप्यअन्वादध्यात्॥अत्रप्रधानं॥लक्ष्मीयुतंदामोद
रंसाज्यंचरुंतिलमिश्रीनतिलांश्चअश्वत्थसमिश्रीततिलांश्चअश्वत्थसमित्घृतपंचरत्वापद्रव्य
चतुष्टयेनअष्टोत्तरसहस्राहुतिभिःपरिवारदेवताब्राह्म्यादिदेवताश्चदशदश
तिलाहुतिभिःयक्ष्ये॥ततःआचार्यायपीठंदध्यात्॥तत्रमंत्रः॥दामोदरललक्ष्मी
कसुप्रतीकजनार्दन॥त्वम्मामोचयपापाद्वैतवमूर्तिप्रदानतः॥अधिकफलावा
प्तयेसोपस्करंशय्यांगांचदद्यात्ततःत्रिंशत्एकवापक्वान्नपूरितकांस्यपात्रंसद
क्षिणंदद्यात्॥तत्रमंत्रः॥कांस्यंविष्णुमयंप्रोक्तंपक्वान्नैःपरिपूरितं॥ब्राह्मणायप्र
दास्यामिकेशवःप्रीयतामिति॥ततोब्राह्मणान्संभोज्यदक्षिणांदत्वाआशिषोगृ १६५

हीत्वाबंधुजनैःसहभुंजीत॥एवमेवमाघवैशाखयोः॥माघेमाधवोदेवोवैशाखेमधु
सूदनः॥ ॥इतिकार्तिकादिमासोद्यापनं॥ ॥अथत्रिपुरविधिः॥पाद्मे॥कार्तिकमा
सपर्यंतंप्रत्यहंदीपदानंकृत्वाअंतेपौर्णिमायांत्रिपुरंप्रज्वालयेत्॥तत्रविधिः॥पौ
र्णिमायांसंध्याकालेदेवद्वारस्थत्रिपुरस्यतदभावेतुलस्यावापश्चात्मृद्वेदिकानि
र्मायतत्रकंदर्पंपूजयेत्॥तद्यथा॥तिथ्यादिसंकीर्त्यअभीष्टसिद्धिद्वाराश्रीप्रीत्यर्थंत्रि
पुरज्वालनंकरिष्ये॥इतिसंकल्प्य॥अक्षतपुंजेगणेशंशंभुंसंपूज्यवेदिकायां॥अ
ष्टदलेनताम्रकलशोद्विभुजंदेवंकंदर्पनाममंत्रेणप्रतिष्ठाप्य॥परकूलेनसंछाद्यपं
चामृतस्नानपूर्वकंविष्णुमंत्रेणषोडशोपचारैःपूजयेत्॥ततःआज्येनतिलैर्मंते

१५५ वा त्रिपुरं पूजापुरःसरं प्रज्वालयेत्॥ तत्र मंत्रः॥ कीटाः पतंगा मशकाश्च जले स्थले
ये विचरंति जीवाः॥ दृष्ट्वा प्रदीपं न च जन्म भागिनो भवंति नित्यं श्वपचा हि विप्राः॥ दी
पमंत्रः॥ आज्येन वर्त्तिसंयुक्तं त्रिपुरं वह्नियोजितं॥ गृह्य कंदर्पदेवेश प्री[illegible]॥ ॥उ
तो भव समाहितः॥ तदानीं तूर्यादिघोषः कर्त्तव्यः॥ ततः दह्यमाने त्रिपुरे प्रदक्षि
णात्रयं कुर्यात्॥ ततः आचार्यं संपूज्य कंदर्पमूर्त्तिं दत्वा गां च दत्वा द्विजेभ्यो दक्षि
णां दत्वा बंदिजनान् तोषयेत्॥ इति त्रिपुरविधिः॥ ॥ अथ व्यासपूजनं॥ ॥
आषाढ्यां कार्त्तिक्यां वा कार्यं॥ तिथ्यादि संकीर्त्य मम इह जन्मनि जन्मांतरे वा चतुर्द
शविद्याभिगमसिद्धिद्वारा॰ श्री॰ प्री॰ व्यासपूजां करिष्ये॥ इति संकल्प्य गणेशपूज १५५

नादि विधाय देवालये वा मठे वा पीठे वा मध्यभागे नारायणस्वरूपं व्यासं पूर्वादि पैलं वैशं
पायनं जैमिनीं सुमंतुं पुरतः शुकं परितः सप्तऋषीन् गुरुं परमगुरुं परमेष्ठिगुरुं परात्पर
गुरुं च संपूज्य अनंत कूर्म पृथ्वी च उपचारैः संपूज्य ततः यतीन् कौपीनादिना प्रपूज्य द्वि
जेभ्यो दक्षिणां दत्वा आशिषो गृहीत्वा नमेत्॥ इति व्रतो॰॥ ग्रा कार्त्तिकोद्यापन ध्वजारोप
ण त्रिपुरदीप व्यासपूजनविधानानि समाप्तानि॥ ॥ अथ अश्वत्थोद्यापनं॥ ॥ तदुक्तं॥
शौनकीये॥ स्थापनादष्टमे वर्षे द्वादशे कादशेपि वा॥ उत्तरायणे गुरौ शुक्रोदये माघफा
ल्गुनचैत्रवैशाखेषु शुक्लपक्षे शुभे नक्षत्रे सुवारतिथिलग्नके॥ स्कंदर्पणां कुर्यान्नितेनित्यपुरा
वासि अनाभिदत्ते अश्वत्थस्य उद्यापनं कुर्यात्॥ तथादौ कनककुंडले कनकसूत्रेण कनकमौं

१८७ जीहोमद्रव्याणि॥ सर्वसंभारान्यथासंभवं संभृत्य अश्वत्थस्य चतुरस्रां वेदिकां विधाय अ
श्वत्थमूले वर्तुलं चतुरस्रं स आलवालं कृत्वा तत्र तुलसीमपूक्षं शाखां शमीं चरोपयित्वा
अश्वत्थवेदिकायां चतुरस्रं समन्ताच्चतुर्द्वारं चतुर्हस्तं अधिकं वा मंडपं अश्वत्थात्पूर्वप
श्चिमे उत्तरे वा उक्तलक्षणं मंडपं अन्यं वा कृत्वा स्वगृहे ज्योतिर्विदादिष्टे मुहूर्ते प्रधानसं
कल्पं कुर्यात्॥ तद्यथा॥ तिथ्यादि संकीर्त्य॥ आत्मनः अखिलपापक्षयाभीष्टसिद्धिपू
र्वकं आत्मना सह एकविंशतिपुरुषोद्धर्तुकामः श्रीप॰र्थं अश्वत्थोद्यापनं तत्तथा॥ अ
श्वत्थस्याभीष्टसिद्धिदातृत्वार्थं तदुपनयनं च करिष्ये॥ तदंगं विहितं गणेशपूजनं पु
ण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यादिवर्णं च करिष्ये॥ इति संकल्प्य॥ १८७

स्वगृह्यविधिना तानि कृत्वा आचार्यादीन्वृणुयात्॥ अस्मिन्कर्मणि आचार्यं त्वामहं वृ
णे॥ वृतोस्मीति स वदेत्॥ एवं ब्रह्माणं सादस्यं उपद्रष्टारं त्वा सर्वान्मधुपर्कादिना संपू
ज्य प्रार्थयेत्॥ अस्य यागस्य निष्पत्तौ भवंतोभ्यर्थिता मया॥ सुप्रसन्नैः प्रकर्तव्यं कर्मेदं
विधिपूर्वकं॥ ततः स्वगृहे एव यह्ममखादि विधाय ततः सालंकृतः सपत्नीको यजमानः संपू
र्णकलशहस्तः भद्रं कर्णेभिरिति मंत्रेण मंगलतूर्यघोषेण सह अश्वत्थमंडपमदक्षिणे
न मंडपपश्चिमद्वारमागत्य तत्र द्वारं संपूज्य मंडपं प्रविश्य कलशं अश्वत्थसमीपे निधा
य निर्ऋतिवरुणमध्ये उपविशेत्॥ ततः आचार्यः आचार्यकर्म करिष्ये॥ शरीरशुध्यर्थं
भूतशुध्यादि यो रुपजनपंच कृत्वा यदत्र संस्थितमिति सर्षपलाजान् विकीर्य स्थापित पंचगव्ये

१५८ नकुर्यात् सर्वत्र प्रोक्षणं॥ शुचीवोहव्येति आपोहिष्ठेति उत्तरनारायणेन च कार्यं॥ ततः दे
वाः आयांतु यातुधाना अपआयांतु विष्णोदेवयजनं रक्षस्वेति स्वस्त्ययनं तार्क्ष्यमिति
पठेत्॥ ततः यथोक्तमंडपकरणे मत्कृत रुद्रानुष्ठानकौमुदीरुद्र प्रकारेण मंडपं पूजये
त्॥ साधारण मंडपे तु प्राक्द्वारे अमत्रकं चूतपल्लवं तोरणं॥ ~~पश्चिमे वटपल्लवतो~~
~~रणं॥ उत्तरे अशोक~~पल्लव दक्षिणे प्लक्षपल्लवतोरणं॥ पश्चिमे वटपल्लवतोरणं॥ उत्तरे अ
शोकपल्लवतोरणं॥ बध्वा॥ तथैव प्रागादि चतुष्टयश्वेतकृष्णहरितरक्तपताकाः अश्व
त्थशिरसि विचित्रध्वजं च बध्वा तथैव प्रागादिद्वारचतुष्टये वेदादि क्रमेण द्वौ द्वौ एकं
वा जपार्थं ब्राह्मणं वृणुयात्॥ ततः आचार्यः अश्वत्थस्य हरिद्रातैलरोपणादि लौकिकं १५८

विधाय अश्वत्थवेदिकायां ईशान्यप्रदेशे कृतान्यग्न्युत्तारण सौवर्ण प्रतिमायां इदं विष्णु
रिति मंत्रेण वासुदेवं तद्वामतः अधः स्वायोषणेति मंत्रेण रुक्मिणीं तद्दक्षिणतः सत्यासत्ये
ति मंत्रेण सत्यभामामायांततः प्रक्षोदसाधायसेति मंत्रेण सरस्वती आतूनइंद्रेति गणप
तिं चावाह्य पौरुषेण संपूज्य ततः अश्वत्थपरितः पीठसमंततो वा अष्टौ लोकपालान् स्था
पन क्रमेण संस्थाप्य ततः पूर्वकलशे शुद्धोदकं अपोहिष्ठेति नवर्चेन सूक्तेन द्वितीये गंधो
दकं आनोभद्रेति दशर्चेन॥ तृतीये क्षीरोदकं स्वस्तिनो मिमीतेति मंत्रेण पंचर्चेन॥ चतुर्थे
पंचगव्यं शन्नइंद्राग्नी इति पंचदशर्चेन॥ पंचमे हारिद्रोदकं एतोन्विंद्रेति त्र्यृचेन॥ षष्ठकलशे
सर्वौषध्युदकं समुद्रज्येष्ठा इति चतसृभिः॥ सप्तमे कुशोदकं मादिव्या इति॥ अष्टमे गंगो

१६९ दकं प्रसुवआपोमइतिनवत्त्वेन॥ उक्तप्रकारेण पूर्णपात्रांतं कृत्वा तत्र पूर्वादिक्रमे
णइंद्रादीन्तत्तन्मंत्रैः शबात्पसंपूज्ययेत्॥ ततः अश्वत्थंपुरुषसूक्तेन अथर्वशिरसाच
संशोध्य पंचामृताभिषेकं चकृत्वा काषाययुग्मवस्त्रेणा वेष्टयततः पूर्वादिदिक्षुचत्वा
रिस्थंडिलानिविधायतेषुहोमार्थंचतुरः आचार्यान्वृत्वातेस्वगृह्यविधिना अग्निंस्था
पयेयुः॥ अत्रकेचनईशानपूर्वयोमध्येग्रहहोमादिकर्तुंपंचइच्छंति॥ बहवः पूर्वकुं
डेएवग्रेहप्रधानहोमादिकं कुर्वंति॥ पूर्वंअकृतग्रहयज्ञेइदानींईशानावेदिकायां म
त्स्यकृतरुद्रानुष्ठानकौमुदीस्थप्रकारेण ग्रहान्आवाह्यसंपूज्यअन्वादध्यात्॥ अत्रपूर्व
कुंडेपूर्वेग्रहयज्ञेआदित्यादिनवग्रहान्अमुकसंख्याअर्कादिसमिच्चर्वाज्यद्रव्यैः अ १६९

धिदेवताः प्रत्यधिदेवताश्च अमुकसंख्याकैरेवद्रव्यैः तथा॥ आनोभद्रेतिमंत्रेणवि
श्वान्देवान्चरुद्रव्येण अष्टोत्तरसंख्यया॥ तथा॥ दामोदरादिपीठदेवताः इंद्रादिलो
कपालांश्च एकैकयाज्याहुत्या यक्ष्ये॥ पंचयक्षआदौतत्रअग्निप्रणयनं॥ तस्माच्चतुर्षु
अग्निप्रणयनंतत्रग्रहहोमः॥ दामोदरादीनांहोमः॥ ब्रह्मादीनांच॥ पूर्वकुंडेविश्वेदे
वानांलोकपालानांचहोमः॥ अथदक्षिणकुंडे गणपतितिलाज्यद्रव्येणअष्टोत्तरश
तसंख्यायायक्ष्ये॥ पश्चिमेअष्टौलोकेशान्वास्तुंचशमीसमिद्भिः अष्टोत्तरशतसंख्या
याअष्टाविंशतिसंख्ययावायक्ष्ये॥ उत्तरनारायणंपौरुषेणयाजुः मस्त्रचंआज्यद्रव्येण
अष्टोत्तरशतसंख्यया यक्ष्ये॥ एवंतत्तन्मंत्रैर्होमंसंपाद्यस्विष्टकृतादिबल्यंतंकृत्वाअधिव

१७० सेत्॥ पुराणादिना रात्रिं निनयेत्॥ केचन काषायवस्त्रदानांतं कृत्वा परेद्युरेव होमादिकं
इच्छंति॥ प्रातः पीठदेवताः संपूज्य अष्टकलशदेवताः विसर्ज्य॥ अष्टभिः ब्राह्मणैः तान्
गृहयित्वा आचार्यः यजमानः सुवर्जनरत्नानुवाकेन अश्वत्थं त्रिः परिषिच्य किंचिदव
शिष्टोदकान् कलशान् पूर्वस्थाने स्थापयेत्॥ ततः यजमानः आचार्यो वा अश्वत्था
पश्चिमे स्थंडिले संस्कारहोमं कुर्यात्॥ ॥तद्यथा॥ अश्वत्थस्य व्याहृति द्वारपुंसवनादि स
मावर्तनांतान् संस्कारान् करिष्ये॥ इति संकल्प्य॥ अग्निं पवमानं प्रतिष्ठाप्य अन्वाधाय
त्॥ अत्र प्रधाने॥ अग्निं वायुं सूर्यं प्रजापतिं च आज्यद्रव्येण प्रतिसंस्कारं चतुःसंख्याकु
तिभिः यक्ष्ये॥ प्रतिसंस्काराहोमांते वनस्पते शतवल्शा इति मंत्रेण अश्वत्थस्य शौत्॥ ए १७०

वं उपनयनपर्यंतं कृत्वा यजमानाश्वत्थांतराले पटं धृत्वा सुमुहूर्ते मंगलपाठ्या पुरः
सरं तदेव लग्नमिति पठित्वा ते अंतःपटं निःसार्य ध्रुवसूक्तं पठित्वा येयज्ञेनेति वर्गपंचकं
रात्र्यानरस्य मन्त्राश्च पठित्वा कौपीनं कनकमयीं दर्भमयीं वा मेखलां दंडं च तत्तन्मंत्रैः
दत्त्वा समर्पणं वा सव्याहृतिकां सावित्रीरस्कां गायत्रीउपदेशावत्॥ इत्युपनयनं॥ ततः म
हानाम्न्यादि समावर्तनांतं कृत्वा कनककुंडलेऽलंकारांश्च दत्त्वा आयुष्यं वर्चस्यमि
ति पठित्वा मौंजीविसर्जनं कृत्वा ममाग्ने इति सूक्तं पठित्वा ततः स्विष्टकृतादि होमशे
षं समापयेत्॥ ॥अथ विवाहः॥ ॥तत्रादौ अश्वत्थालवाले शातकुंभामितं शुद्धज
लं क्षिप्त्वा दुग्धमधुघृतकुंभैश्च सिक्त्वा वस्त्रयुग्मेन अश्वत्थं तुलस्यादि शाखाः वेष्टयि

१७१ त्वातुलस्याः कंचुकीवस्त्रकंठभूषणंमौक्तिकंकर्णपादभूषणंचदत्वा।।अश्वत्थवि
वाहविधिंकरिष्यइतिसंकल्प्य।।पूर्वसंस्कारहोमस्थंडिलोत्तरप्रदेशेस्थंडिलंनिर्माय
योजकनामानंअग्निंप्रतिष्ठाप्यअन्वादध्यात्।।अत्रप्रधानं।।ब्रह्माणं।।द्वासुपर्णे
तिमंत्रेणअष्टोत्तरशतसंख्यायातिलाज्यद्रव्येण।।तद्यथा।।महाव्याहृतिभिःतिला
ज्यद्रव्येणअष्टोत्तरसंख्यायायक्ष्ये।।महाव्याहृतयस्तु।।भूरग्नयेचपृथिव्यैचमहतेच
स्वाहा।।भुवोवायवेचांतरिक्षायचमहतेचस्वाहा।।सुवरादित्यायचदिवेचमहतेच
स्वाहा।।भूर्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचःस्वाहा।।एवंहोमंकृ
त्वा।।तुलस्याश्वत्थयोःचतुरःशाखामयान्हस्तान्गृभ्णामीतिमंत्रेणयोजयेत्।। १७१

ततःस्विष्टकृतादिहोमशेषंसमाप्य।।ततोश्वत्थंपुरुषसूक्तेनषोडशोपचारैःसंपू
ज्यअश्वत्थंत्वंतुलसींचप्रार्थयेत्।।अश्वत्थस्त्वंजगन्नाथपुरादेवैर्विनिर्मितः।।पापा
त्संत्राहिनोदेवपुण्यंदेहिमहत्फलं।।क्षीरोदधिसमुद्भूतेतुलसीहरिवल्लभे।।अ
श्वत्थोद्यापनंपुण्यंमह्यंदेहिश्रियैनमः।।अतःआचार्यःक्षेत्रपालबलिंदत्वासे
वैआचार्याःस्वस्वकुंडेपूर्णाहुतिंहुत्वाकर्मशेषंसमापयेयुः।।ततःयजमानःपीठ
पूजादिविधायकृतस्यअश्वत्थोद्यापनस्यसांगतासिद्ध्यैआचार्यादिभ्योदक्षिणाप्र
दानमहंकरिष्ये।।इतिसंकल्प्य।।पूजापूर्वकंदक्षिणांदत्वाततःआचार्यादयःपूर्वस्था
पिताष्टकलशोदकेनदूर्वापल्लवैःसपत्नीकंयजमानंअभिषिंचेयुः।।तत्रमंत्राः।।आ

१७२ नोभद्रेतिदशर्चस्यसूक्तं॥ अस्यवामस्येतिद्विपंचाशत्॥ सर्वंसूक्तं॥ परोमात्रेतिच
तुर्दशर्चंसूक्तं॥ मुंचामित्वेतिपंचदशर्चंसूक्तं॥ समुद्रज्येष्ठाइत्यादयः॥ सुरास्त्वामभि
षिंचंत्विसाद्याः॥ एवंअभिषिक्तोयजमानःतिलकादिधृत्वा अग्निंपीठदेवतांश्चसंपू
ज्यउत्तिष्ठब्रह्मणस्पतेइतिउत्थाप्यसोपस्करपीठंआचार्यायदत्वामंडपंसंपूर्णतासि
द्धयेगांचदत्वामंडपंसदस्यायवाआचार्यायदत्वाभूयसींचदत्वाकर्मेश्वरार्पणंकृत्वा
शताधिकान्ब्राह्मणान्भोज्याशिषोगृहीत्वाअश्वत्थोद्यापनपूर्णतांवाचयित्वा
इष्टजनैःसहभुंजीत॥ एवंयःकुरुतेतस्यवर्धतेश्रियमायुषं॥ कुलकोटिंसमुद्धृ
त्यविष्णुलोकेमहीयते॥ इतिशौनकीये॥ ॥अथोद्यापनंसमाप्तं॥ ॥अथवटोद्या १७२

पनं॥ भविष्यस्कंदयोः॥ उदगयनेमुहूर्तेस्थिरलग्नेचंद्रताराअनुकूल्येरम्यप्रदेशेनाभि
मात्रगर्तेगृह्णावैप्रतिष्ठेतिमंत्रेणवटपादपरोपणंकार्यं॥ तदेवपादपरोपणे॥ रोपणात्
अष्टमेवर्षेद्वादशेवावाराखापत्रांकुरुतेउदगयनादिशुभेकालेउद्यापनंकुर्यात्॥ वटस्य
परितःचतुर्हस्तांदृढांवेदिकांकृत्वावटमूलेरम्यंचतुरस्रंवर्तुलंवाअलवालंकृत्वातत्रकां
डात्कांडादितिदूर्वारोपयेत्॥ वटपरितःचतुर्हस्तंपंचहस्तंवासुदृढंचतुर्द्वारंमंडपंकु
र्यात्॥ सामर्थ्येवटवेदिकायामेवतत्रप्रागादिद्वारचतुष्टयेआम्रोदुंबरप्लक्षाशोकपल्ल
वकृतानिचत्वारितोरणानि॥ तथाद्वारचतुष्टयेश्वेतकृष्णहरितपीतवर्णाःचत्वारःध्व
जाःपताकाश्च॥ वटशिरसिसर्ववर्णध्वजःकार्यः॥ एवंसर्वसंभृतसंभारःयजमानःज्यो

१७२ तिर्विदादिष्टेमुहूर्तेप्रधानसंकल्पंकुर्यात्॥तद्यथा॥तिथ्यादिसंकीर्त्यआत्मनःसकल
पापक्षयाकुलकोटिसमुद्धरणऐहिकामुष्मिकनिरवधिसुखप्राप्तिपूर्वकब्रह्मपदप्रा
प्तिकामःवटोद्यापनंतथा॥अभीष्टदातृत्वसिद्ध्यर्थंसर्वप्राणिसुखनिवासार्थंचवट
संस्कारंचकरिष्ये॥इतिसंकल्प्य॥तदंगविहितंगणेशपूजनंपुण्याहवाचनंमातृका
पूजनंनांदीश्राद्धंआचार्यादिवर्णनंचकरिष्ये॥स्वगृह्यविधिनातानिकृत्वाआचार्या
दीन्वृणुयात्॥अस्मिन्कर्मणिआचार्यत्वामहंवृणे॥वृतोस्मीतिसवदेत्॥एवंब्र
ह्माणंसदस्यंउपद्रष्टारंचवृत्वामधुपर्कादिनासंपूज्यप्रार्थयेत्॥अस्ययागस्यनिष्पत्तौ
इति॥ततःसर्त्विक्यजमानःपूर्णकलशहस्तःमंगलवाद्यतूर्यघोषेणसहशाकुंतक १७२

सूक्तंपठन्वटमंडपप्रादक्षिण्येनपश्चिमद्वारमागत्य॥तत्रभूमिर्भूम्नाद्यौरितिमंत्रेणध
रांसंपूज्यअर्घ्यंदत्वाप्रविश्यवटसमीपेकलशंनिधायवरुणनिर्ऋतिमध्येउपविशेत्॥त
तःआचार्यःआचार्यकर्मकरिष्ये॥इतिसंकल्प्य॥भूतशुध्यादिविधायमंडपांतःगौ
रसर्षपलाजान्यदत्रसंस्थितमितिविकीर्यसाधितपंचगव्येनकुशैःआपोहिष्ठे
त्यादिमंत्रैःसर्वत्रप्रोक्षणंकृत्वा॥देवाःआयांतु॥यातुधानाःअपयांतुविष्णो
देवयजनंरक्षस्वेति॥ततःस्वस्त्ययनंतार्क्ष्यमितिपठेत्॥यथोक्तमंडपेउक्तप्रका
रेणमंडमंडपपूजांकुर्यात्॥साधारणमंडपेउक्ततोरणपताकाध्वजान्बध्वाशांति
सूक्तजपार्थंवेदादिक्रमेणद्वौएकंवाब्राह्मणान्प्रागादिक्रमेणप्रतिद्वारंवृणुयात्॥

१७४ ततःआचार्यःवटपश्चिमेचतुरस्रांवेदिकांनिर्मायतत्रसर्वतोभद्रेउक्तप्रकारेण
ब्रह्मादिदेवताःआवाह्यतदुपरिअक्षतपुंजेकलशत्रयंप्रतिष्ठाप्यएकंवातत्रम
ध्यकुंभेब्रह्मजज्ञानमितिब्रह्माणं।।तद्दक्षिणे।।वषट्तेविष्णुरितिविष्णुंउत्तरेत्र्यं
बकमितिरुद्रं।।आग्नेयादिकोणेषुगणानांत्वेतिगणपतिं।।जातवेदसेइतिदुर्गां।।ज
ज्ञानंसप्तमातरोइतिमातॄः।।क्षेत्रस्यपतेतिक्षेत्रपालं।।ततःपरितःलोकेशान्तत्त
न्मंत्रैःआवाह्यसंपूज्यवेदिंपरितःअष्टौलोकेशान्स्थापनक्रमेणसंस्थाप्यतत्रपूर्वा
दिकलशेषुपंचगव्यं।।सप्तमृदः।।पंचपल्लवाः।।चंदनं।।पंचरत्नानि।।क्षीरं।।सर्वौ
षधिं।।गंधोदकं।।एवंक्षिप्त्वाशुद्धजलेनापूर्य।।पूर्णपात्रंनिधायतेषुइंद्रादीन्आ १७४

वाह्यसंपूजयेत्।।ततःहारिद्रातैलरोपणादिवटेकृत्वावस्त्रेणवेष्टयेत्।।इत्यधिवा
सनं।।परेद्युःप्रातःनित्यकर्मनिर्वर्त्यपीठदेवताःसंपूज्यप्रागादिद्वारचतुष्टयेषुच
तुरःकुंभान्संस्थाप्यतेषुउदकपंचरत्नपंचपल्लवादिनिधायतेषु।।इंद्रयमवरुणसो
मान्तत्तन्मंत्रैःआवाह्यसंपूज्यचतुर्द्वारेषुचतुर्वेदविदःद्विजाःशांतिसूक्तानिपठेयुः।।
ततःईशान्यांकुंडेस्थंडिलेवाअग्निंप्रतिष्ठाप्यतदुत्तरेवेदिकायांउक्तप्रकारेणग्रहा
नावाह्यसंपूज्यतदीशान्यांकलशंप्रतिष्ठाप्यजपार्थंब्राह्मणंवृणुयात्।।ततःप्राग
द्याचार्याःचत्वारःस्वस्वकुंडेस्वगृह्यविधानेनआचार्यकुंडात्श्रोत्रियागाराद्वा
अग्निंप्रणीयध्यायेयुः।।कुंडचतुष्टयपक्षेप्राक्कुंडान्अग्निप्रणयनंतन्मंत्रेणमुख

१७५ होमः॥ अथान्वाधानं॥ तत्र ईशानकुंडे ब्रह्मविष्णुरुद्रान् घृताक्तदूर्वाज्यद्रव्येण अ
ष्टोत्तरशतमिताहुतिभिर्यक्ष्ये॥ पूर्वे॥ इंद्रादिदशलोकपालान् पलाशसमित्चर्वाज्यैः
अष्टाविंशतिसंख्यया यक्ष्ये॥ दक्षिणे॥ गणपतिं दुर्गां सप्तमातृः क्षेत्रपालं घृताक्त
तिलद्रव्येणाष्टाविंशत्याहुतिभिः यक्ष्ये॥ पश्चिमे॥ स्वाधिप्रत्यधिदेवता आदित्यादिन
वग्रहान् अर्कादिसमित्चर्वाज्यतिलव्रीहिद्रव्यैः अष्टाविंशतिसंख्याहुतिभिर्यक्ष्ये॥ उ
त्तरे॥ सोमो धेनुमिति मंत्रेण घृताक्तचरु प्लक्षसमित्द्रव्येण अष्टोत्तरशतशतमित्या
हुतिभिः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ एवं तत्तन्मंत्रैः होमं संपाद्य ततः
आचार्यः वटस्य हारिद्रातैलादि दत्वा पंचोपचारैः संपूज्य पूर्वस्थापितअष्टकलशान् ब्रा १७५

ह्मणाग्राहयित्वा आपोहिष्ठा समुद्रज्येष्ठा इमा आपः इतोन्विंद्र मिति प्रत्येकं मंत्रान् वट
स्य अभिषेकं कुर्यात्॥ ततः आचार्यः प्रतीज्यां संस्कारहोमार्थे स्थंडिलं निर्माय संकल्प
येत् वटस्य पुंसवनादिविवाहांतान् संस्कारान् व्याहृतिद्वारा करिष्ये इति संकल्प्य॥ अग्निं
प्रतिष्ठाप्य अन्वादध्यात्॥ अत्र प्रधानं॥ अग्निं वायुं सूर्यं प्रजापतिं आज्यद्रव्येण प्रति
संस्कारं चतुः चतुः संख्याहुतिभिः यक्ष्ये॥ प्रतिसंस्कारहोमांते वनस्पते शतवल्शामिति
मंत्रेण वटं स्पृशेत्॥ एवं उपनयनपर्यंतं कृत्वा यजमान वधूवरयोरंतराले पटं धृत्वा सुमुहूर्ते कूर्मे
तदेव लग्नमिति पठित्वे अंतः पटं निसार्य भद्रं वस्त्रं कं ये यज्ञेन मिति पठित्वा कौपीनं यज्ञो
पवीतं मेखलां दंडं च तत्तन्मंत्रैः दत्वा उपदेशं वत् गायत्रीं श्रावयित्वा नमेत्॥ इत्युपनयनं

१७५ नं॥ ततः महानाम्न्यादिसमावर्तनांतं कृत्वा अलंकारान् दत्वा आयुष्यं वर्चस्यमिति प
ठित्वा मौंजीं विसर्जयेत्॥ ततः वटं दूर्वां च दुग्धादीनि सिक्त्वा वटं दूर्वां च वस्त्रयुग्मेन वेष्ट
य वस्त्रं कंचुकीं आभरणादि दत्वा पूर्ववत् कृत्वा गृभ्णामिति मंत्रेण वटदूर्वयोः पल्लवम
यान् हस्तान् योजयेत॥ ततः संस्कारहोमं संबधि स्विष्टकृदादि होमशेषं समाप्य पुरुष
सूक्तेन संपूज्य प्रार्थयेत्॥ आदित्यो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे॥ अग्रतो रुद्ररू
पाय वटवृक्षाय ते नमः॥ अकारमूलरूपाय उकारास्कंधशाखिने॥ मकारफलपुष्पा
य वटवृक्षाय ते नमः॥ ततः आचार्यः स्वस्तकुंडे स्विष्टकृदादि कृत्वा बलिं पूर्णाहुतिं
च कृत्वा यजमानः व्रतोद्यापनसांगतासिद्ध्यै दक्षिणां गां च दास्य इति संकल्प्य॥ १७५

क्रमेण दत्वा॥ ततः ऋत्विजः कलशोदकैः यजमानं समुद्रज्येष्ठा इत्यादि मंत्रैः अभि
षिच्य कर्मशेषं समापयेयुः॥ ततो यजमानः पीठदेवताः संपूज्य उत्तिष्ठ ब्रह्मणस्प
ते इति उत्थाप्य यांतु देवगणाः सर्वे इति विसृज्य पीठादि आचार्याय दत्वा मंडपं सदस्या
य दत्वा भूयसीं दत्वा शताधिका ब्राह्मणं भोजयिष्ये इति संकल्प्य॥ सदन्नेन संभोज्य
आशिषो गृहीत्वा व्रतोद्यापनपूर्णतां वाचयित्वा इष्टैः सह भुंजीत॥ ॥ इति श्रीमत्
शंकर्यां व्रतोद्यापनकौमुद्यां अश्वत्थवटोद्यापनं समाप्तं॥ ॥ शाके शरसऊंगचंद्रैः
र्मीनुरवाक्षयवत्सरे॥ शंकरं गच्छत् पूर्णत्वं व्रतोद्यापनकौमुदी॥ आलोच्य बहु शास्त्रं
सारमत्र समर्पितः॥ धारोस्तु पत्ता मत्रा वचितपावनसंहिता॥ वस्तालिना शंकर

१७७ रैणव्रतोद्यापनकौमुदी॥ रचितायास्तथादेवदत्त व्यक्तां परमेश्वरः॥ ७॥ श्रीसीताराम
चंद्रार्पणमस्तु॥ ॥ वर्षौके १७७० संवत् १९०५॥ श्रीकुलदेवाताप्रसन्नोस्तु॥ ॥
इदं पुस्तकं उपनामचक्रे काविटलभट्टात्मज काशीनाथेन लिखीतं स्वार्थं परोपकारार्थं
शुभंभवतु॥ लेखकपैन लिखितं॥ ५॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥

१७७

श्रीगणेशाय नमः ॥ ज्येष्ठशुद्धपौर्णिमायां पूर्वविद्धायां वटसावित्रीव्रतं ॥ तत्र त्रयो
१ दशीमारभ्य पौर्णमांतं कर्त्तव्यं ॥ तदुक्तं स्कांदे भविष्योः ॥ पौर्णमायां वीकार्यं ॥ त
त्रविधिर्निर्णयो दीति लामलकरजनी विलेपनपूर्वकं स्नात्वा वार्षिकवसुजादिकं नि
र्वर्त्य उद्यापनसंकल्पं कुर्यात् ॥ तद्यथा ॥ तिथ्यादि संकीर्त्य मम सतु पुत्रादी
नां च आयुरारोग्यऐश्वर्यादिप्राप्तिपूर्वक इहजन्मनि जन्मजन्मांतरे च आत्मनः राम
अवैधव्यप्राप्तये आचरितवटसावित्रीव्रतस्य तत्संपूर्णतायै तदुद्यापनं करि १
ष्ये ॥ वृताचार्यः वटमूले गृहे वा मृद्वावेदिं निधाय तत्र सर्वतोभद्रे विरच्य तत्र ब्रह्मादि

देवताः संपूज्य तत्र कलशाद्वयं प्रतिष्ठाप्य एकस्मिन् कलशे हैमं ब्रह्मजितानमि
निमंत्रेण ब्रह्माणं गायित्रीमंत्रेण हैमीं सावित्रीं च प्रतिष्ठाप्य तदुत्तरतः द्वितीय
कुंभे पलादधिकरजतस्य पर्यंके हैमे सत्यवंतं सावित्री॰ यम॰ नारदं॰ प्रतिमाः
नाममंत्रेरावाह्य पुरतः काष्ठभारं कुठारं च हैमे राजतं वा निधाय पूजयेत् ॥ अ
शक्तौ एकस्मिन् कलशे सर्वेषां पूजनं ॥ पुष्पोत्तरं अंगपूजा ॥ सावित्रीनमः पा
दौ पूजयामि ॥ प्रसावित्र्यै॰ जानुनी॰ कमलपत्राक्ष्यै॰ कटिं॰ भूतधारिण्यै॰
उदरं॰ गायत्र्यै॰ कंठं॰ ब्रह्मप्रियायै॰ शिरं॰ ॥ अथ ब्रह्मसत्यवतो ॥ धात्रे नमः

पादौ पूजयामि॥ परमेष्ठिने॰ जानुं॰ उग्ररूपाय॰ कटिं॰ वेधसे॰ उदरं॰ हिर
२ ण्यगर्भा॰ कंठं॰ चतुराननाय॰ मुखं॰ ब्रह्मणे॰ शिरः॰ मंत्रपुष्पानंतरं अर्घ्यं दद्या
त्॥ रजतादिपात्रेणहूयोरपि ॐकारपूर्वके देवि वीणापुस्तकधारिणि॥ वेदमाते
नमस्तुभ्यं अवैधव्यं प्रयच्छ मे॥ पतिव्रते महाभागे भर्तुश्च प्रियवादिनी॥ अवै
धव्यं च सौभाग्यं देहि त्वं मम सुव्रते॥ पुत्रान्पौत्रान् च सौख्यं च गृहाणार्घ्यं नमो राम
नमः॥ अथ ब्रह्मसत्यव्रतो॥ त्वया सृष्टं जगत्सर्वं सदेवासुरमानुषं॥ सत्यव्रतधरो २
देवब्रह्मरूप नमोस्तु ते॥ इत्यर्घ्यं॥ अथ यमाय॥ त्वं कर्मसाक्षि लोकानां शुभा
शुभविवेककृत्॥ वैवस्वत गृहाणार्घ्यं धर्मराज नमोस्तु ते॥ नारदायन मस्तुभ्यं
सुरेशाद्यभिवंदित॥ गृहाणार्घ्यं मया दत्तं अवैधव्यं प्रयच्छ मे॥ १॥ ततः प्रार्थये
त्॥ सावित्री ब्रह्मगायित्री सर्वदा प्रियभाषिणी॥ तेन सत्येन मां पाहि दुःखसं
सारसागरात्॥ मया कृतं महाघोरं जन्मांतरशतैरपि॥ भस्मीभवतु तत्सर्वं अ
वैधव्यं च देहि मे॥ सत्यव्रतः॥ अवियोगो यथा देव सावित्र्या सहितस्तव॥ अ
वियोगस्तथास्माकं भूयाज्जन्मनि जन्मनि॥ २॥ यमस्य सावित्र्या॥ सावित्री त्वं य
था देवी चतुर्वर्षशतायुषं॥ पतिः प्राप्तासि गुणितं मम देवि तथा कुरु॥ य

सा॰वित्री॰ ३ मस्य॥ कर्मसाक्षी जगत्पूज्य सर्ववेद प्रसीद मे॥ संवत्सरं व्रतं सर्वं परिपूर्णं
तदस्तु मे॥ ततः सुवासिनीः संपूज्य वायनादि दत्वा॥ कथाश्रवणादीना रात्रिं
निनयेत्॥ प्रातरग्निं प्रतिष्ठाप्याज्यो दध्यात्पश्चात् सावित्री गायत्री मंत्रेण पाय
स घृत दूर्वा तिल व्रीहि द्रव्यैः प्रत्येकमष्टोत्तरशत संख्याका हुतिभिर्ब्रह्माणं च
मेराजं नारदं च व्याहृति मंत्रेण तिल व्रीहि यव द्रव्यैः प्रत्येकमष्टोत्तरशत संख्या राम
काहुतिभिर्ब्रह्मादि देवताश्च एकैकयाज्याहुत्या सत्यवत्सावित्र्योः ब्रह्मसा ३
वित्र्यो ऐक्यत्वात्पृथक् होमादिकं नास्ति॰ पूजादौ तन्मंत्राभ्यामेव तयोः पू

जां कृत्वा॥ एवं होमं समाप्य ततः चतुर्विंशति द्वादश अष्टौ चत्वारि वा मि
थुनानि वस्त्रादि संपूज्य पूरिका मंडकादि नारिकेल मातुलिंग दाडिम बीजपू
रादि फल हरिद्रा कुंकुम केशर विचूर्ण कज्जल कंठसूत्र कंकण मौक्तिक पाद
भूषण वस्त्र कंचुकी आदर्श पात्रादि दक्षिणा तांबूलादि युत सूर्पस्थं न
व सूर्पादि विहितं वायनं दद्यात्॥ तत्र मंत्रः॥ सौभाग्यकर द्विजश्रेष्ठ व्रतसंपूर्तिका
रक॥ वायनं ते प्रयच्छामि सावित्री प्रीयतामिति॥ ततः पीठं व्रतपूर्तये गां च दत्वा
ब्राह्मणान् संतर्प्य आशिषो गृहीत्वा स्वयं भुंजीत अत्र विशेषः॥ रात्रौ अरुं

सं॰च॰
४

पती हृष्टा संपूज्यार्घ्यं दद्यात्॥ अरुंधती नमस्तेस्तु वसिष्ठस्य प्रिये शुभे॥ पु
त्रान्देहि सुखं देहि गृहाणार्घ्यं नमोस्तु ते॥ इति दत्वा भुंजीत इति वटसावित्रीव्र
तं संपूर्णं॥ श्रीः॥ कृष्णपक्षे चतुर्थ्यां संकष्टचतुर्थीव्रतं चंद्रोदयव्यापिन्यां का
र्यं॥ दिनद्वये तद्व्याप्तौ अव्याप्तौ वा पूर्वा॥ मासपक्षाद्युल्लिख्य विद्याधनपुत्रा
रोग्यमुक्तिसंकष्टनाशकामेन स्त्री भर्त्रादिकामनया आचरितसंकष्टच राम ४
तुर्थीव्रतोद्यापनं करिष्ये॥ व्रताचार्यः॥ उक्तप्रकारेण सर्वतोभद्रस्थक
लशोहेमं गणेशं प्रतिष्ठाप्य पूजयेत्॥ अथ ध्यानं॥ लंबोदरं चतुर्बाहुं त्रि

नेत्रं रक्तवर्णकं॥ नानारत्नैः सुवेषाढ्यं प्रसन्नास्यं विचिंतयेत्॥ सुमुखाय
ध्यानं॥ कपिलाय॰ आवाहनं॰ गणेशाय॰ आसनं॰ विघ्ननाशिने॰ पाद्यं॰
लंबोदराय॰ अर्घ्यं॰ चंद्रार्घधारिणे॰ आचमनीयं॰ गणपतये॰ पंचा
मृतं॰ विश्वप्रियाय॰ स्नानं॰ शूर्पकर्णाय॰ वस्त्रं॰॥ कुब्जाय॰ उपवीतं॰ रु
द्रपुत्राय॰ चंदनं॰ ब्रह्मचारिणे॰ अक्षतां॰ गुणशालिने॰ पुष्पं॰ विकटाय॰
धूपं॰ रुद्रप्रियाय॰ दीपं॰ विघ्ननाशाय॰ नैवेद्यं॰ सिद्धिदाय फलं॰ संक
नाशाय॰ तांबूलं॰ एकदंताय॰ दक्षिणां॰ वामनाय॰ नीराजनं॰ हरसून

सं. व. ५

वे॰ प्रदक्षिणां॰ कुमाराय॰ मंत्रपुष्पांजलिं॰ विद्याधराय॰ नमस्कारान्॰ सम्पू
र्णपायसान्नं चरक्तवस्त्रेणवेष्टितं॥ दक्षिणांसहितं चैव गणेशायनिवेदये
त्॥ वायनं॥ ततः चंद्रार्घ्यं॰ क्षीरोदार्णवसंभूतलक्ष्मी बंधोनिशाकर॥ गृ
हाणार्घ्यं मया दत्तं रोहिण्यासहितः शशी॥ इदमर्घ्यं॥ तदानीं पंचम्या वाहो
मं कुर्यात्॥ प्रधानं॰ गणपतिर्गणानांत्वेतिमंत्रेण तद्दापञ्च्या वा हूनारक्ताश्व रामं
तोज्यमोदकपायसद्रव्यैः प्रतिद्रव्यं अष्टोत्तरसहस्रमष्टोत्तरशतंमष्टाविंश ४
तिवातत्संख्याकाहुतिभिः यष्टव्यं॥ ब्रह्मादिदेवता अश्वै केकयाज्याहुत्यायष्टव्ये॥

केवलं मोदकैर्वा॥ होमं समाप्य॥ एकविंशतिर्ब्राह्मणान्॥ एकविंशतिनाम
भिः वस्त्रादिना संपूज्य॥ एकविंशतिपक्वान्नैः संतर्पयेत्॥ स्कमुखाय॰ गणंज
य॰ गणपतिः॰ हेरंब॰ धरणीधर॰ महागणपतिः॰ यक्षेश्वर॰ क्षिप्रप्रसादन॰
अमोघसिद्धिः अमृतमंत्रः। चिंतामणि॰ निधिः॥ सुमंगलः। बीजं॰ आ
शापूरकः। वरदः। शिवः। कश्यपनंदनः। वाचासिद्धिः। ढुंढी॰ विनायकः
ततः आचार्यायसम्पूर्णस्वैकविंशतिमोदकवायनं रक्तवस्त्रेणवेष्टितं दद्यात्॥
॥मंत्रः॥ विप्रवर्यनमस्तुभ्यं मोदकान्वेददाम्यहं॥ आपदुद्धारणार्थायगं

ए.व. दाणाद्विजसत्तम॥ गणेशं प्रार्थयेत्॥ अनुध्याम निरिकं वा यदि हीनं मया कृतं॥
६ तत्सर्वं पूर्णतां यातु विप्रराजन् नमोस्तु ते॥ ततः गोसोपस्करं पीठं चैव आचार्याय
दत्वा शिष्टां गृहीत्वा रक्तैः सह भुंजीत॥ संकष्टचतुर्थीव्रतसमाप्तं॥ अथ अन
न्तव्रतं॥ आदौ एकसूत्रवर्तिकाव्रतं॥ वायुपुराणे श्रावणे शुक्लप्रतिप
दारभ्य कार्त्तिकी पौर्णमासी पर्यंतं प्रत्यहं एकसूत्रवर्तिकादीपनं कार्यं॥ राम
अंते उद्यापनं कुर्यात्॥ अथवा माघे वैशाखे पौर्णमास्यां एतेषामारंभः॥ अ ६
भावे शुक्लमासे शुभकाले कार्यं॥ तिथ्यादि संकीर्त्य आत्मनः रजः संपर्कादि

विविधपातकक्षयागम्यागमकोटिनाशविविधैहिकपुत्रादिसुखपूर्वकविष्णु
लोकप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं आचरितं यत् लक्षवर्तिज्वालितं तत्संपू
र्णफलावाप्तये तदुद्यापनं करिष्ये॥ वृताचार्यः॥ सर्वतोभद्रे कलशं प्रतिष्ठाप्य तन्म
ध्यदेशे इदं विष्णुरिति मंत्रेण हेमंश्रिया सहितं विष्णुं तद्दक्षिणे सावित्र्यादि सहितं
ब्रह्माणं ब्रह्मजज्ञानमिति मंत्रेण विष्णोरुत्तरे उमया सहितं शंभुं नमः शंभवे च म
योभवे चेति मंत्रेण देवतात्रयं संस्थाप्य पुरतः राजत गरुडं प्रतिष्ठाप्य पूजयेत्॥
पुष्पांतरं अंगपूजा॥ कालाय नमः शिरः पूजयामि॥ विश्वाय नमः ललाटं०

चन्द्रपेनमः नेत्रौ॰ रवयेनमः कर्णौ॰ दीप्राय॰ नासिकां॰ निशाकराय॰ मुखं॰ रु
द्राय॰ कंठं॰ शेषाय॰ स्कंधौ॰ जगद्व्यापिने॰ बाहू॰ तेजोरूपाय॰ स्तनौ॰ महेश्व
राय॰ वक्षः॰ निरंजनाय॰ उदरं॰ फलाध्यक्षाय॰ नाभिं॰ विश्वरूपिणे॰ कटिं॰
जगत्प्रभवे॰ गुह्यं॰ स्वप्रकाशाय॰ ऊरू॰ स्वयंज्योतिषे॰ जानौ॰ चतुर्व्यूहाय॰
गुल्फौ॰ जनाधिपाय॰ पादौ॰ परब्रह्मणे॰ सर्वांगं॰॥ विशेषोपहारादिसम
र्प्य॥ तच्चिंतितयेत॥ ततः सतिलैर्यवैः अग्नेनयसुपथेतिऋचावर्त्यादशां
शतर्पणं कृत्वा तर्पणदशांशेन होमं कुर्यात्॥ ततरग्निं प्रतिष्ठाप्य अन्वाद

ध्यात्॥ अत्रप्रधानं॥ लक्ष्मीसहितं विष्णुं घृताक्तेन पायसपलाशसमित्य
तद्रव्यैः सहस्रसंख्याकाहुतिभिः तथा ब्रह्माणं शंभुं अष्टाविंशतिसंख्यातिला
हुतिभिः मंडलदेवताश्च एकैकयाज्याहुत्या॥ अत्रेनमः॥ अनेन वऋचा
पायसं॥ इदं विष्णुरितिमंत्रेण पलाशसमित्॥ विष्णुगायत्र्या घृतं चहुनेत्॥
ततः पीठस्थदेवं संपूज्य गोघृतलोडितसहस्रवर्त्तिभिः आरार्त्तिकं कृत्वा॥ त
तः आचार्यं संपूज्य पीठं घृतपूरितत्रिंशत्पलपरिमितं कांस्यपात्रं यथाशक्ति
या तथा सुवर्णवर्त्तिं पुष्करौप्यप्रणीतां च देयात्॥ तत्र मंत्रः॥ रौप्यपात्रस्थितं

री पंचरैमवर्त्तिसमन्वितं॥ कांस्यपात्रेण सहितं ददामि प्रतिगृह्यतां॥ ततो गोचरस्था
दशाधिकान् द्विजान् रसरन्नेन भोजयेदिति॥ एवमेव माणिक्यं च नवितं॥ श्रे
यस्कैक॥ श्री॥ अथ व्यतीपातयोगव्रतं वाराहोक्तं गृह्णविधिः मार्गशी
र्षादि शुभे मासे यदा व्यतीपातयोगस्तद्दिने नद्यादौ प्रातःस्नात्वा पादमानीजा
त्वा संकल्पं कुर्यात्॥ तद्यथा॥ तिथ्यादि संकीर्त्य आत्मनां निरातिशयैहिकसु
खप्राप्तिसकलपापक्षयपूर्वकदिव्यविमानारूढगीतनृत्यविलासी अप्स
रोगणवीज्यमानसकलभोगयुतकल्पकोटिसूर्यलोकनिवासोत्तरपुत्रपौ

त्रादिसकलसंपत्सहितमहैश्वर्यादिगुणयुक्तराजत्वकामः॥ अमुककामो
व्यतीपातयोगव्रतं करिष्ये॥ इति संकल्प्य गणेशपूजनादि निवर्त्य शुद्ध
भूमौ पंचरंगोपेतकमले कलशस्थापनप्रकारेण शर्करापूरितताम्रकल
श प्रतिष्ठाप्य तत्र ताम्रमये पूर्णपात्रे कांचनारूढ अष्टादश भुजं कांचनं व्यती
पातविग्रहेण नाममंत्रेण प्रतिष्ठाप्य पूजयेत् ततः पंचरत्नान्वितपुष्पांजलिं
दद्यात्॥ तत्र मंत्रः॥ नमस्तेस्तु व्यतीपात सोमसूर्यसुत प्रभो॥ यदा नार्कि
कृतं किंचिन्न दत्तं तु मिहास्तु मे॥ इति दत्वा यथाशक्ति सुवर्णादि दत्वा॥ पु

व्य. राणपद्मनादीनां रात्रिं निनयेत्॥ तद्दिने उपवासः॥ प्रातः देवं संपूज्य स
९ पत्नीकं द्विजं च संपूज्य॥ तस्मै वस्त्रसुवर्णसहितं तस्मै दत्त्वा ब्राह्मणभोजन
पुरःसरं स्वयं भुंजीत॥ कुर्यादेवं मासि मासि॥ व्यतीपातान्त्रयोदश॥ च
तुर्दशे व्यतीपाते उद्यापनं कुर्यात्॥ तद्यथा॥ पूर्वोक्तसंकल्पांते भो चरि
तस्य व्यतीपातव्रतस्य सांगतासिद्ध्यर्थं तदुद्यापनं करिष्ये॥ इत्याचार्यः॥ स राम
र्वतोभद्रस्य शर्करापूरितं कलशं ताम्रमयं पूर्णपात्रं निधाय॥ तत्र सुव ९
र्णप्रतिमे अष्टादशभुजं व्यतीपातं विग्रहं सौवर्णं पूज्य पूर्ववत्पुष्पांजलिं दत्त्वा

रात्रिं निनयेत्॥ प्रातरग्निं प्रतिष्ठाप्य॥ अन्वारभ्यात्॥ प्रधानं देवं व्यतीपा
तस्मै रक्तसमिदाज्यं पयः फलद्रव्यं च तुष्टये न प्रत्येकं अष्टोत्तरशतसंख्या
काहुतिभिः ब्रह्मादिदेवताभ्यो एकैकयाज्याहुत्या पश्येत्॥ ततः आचार्यं संपूज्य॥
सोपस्करां शय्यां पीठं च दद्यात् तत्र मंत्रः॥ वेदे व्यतीपात महं महांतं सर्वादु
मतं सकलेश्वलब्धेः॥ समस्तपापस्य नमस्ते यो तु पुण्यस्य वरूहि मे मंस वे
दास्तु॥ इति दत्त्वा व्रतपूर्णतये गां च दत्त्वा ब्राह्मणान् भोजयेत्॥ इति व्यतीपात
व्रतं॥ अथ प्रकारांतरेण नारदीयोक्तं व्यतीपातव्रतं तिथ्यादिसंकीर्त्य॥ स

व्य. कल्पापक्षस्यपूर्वकामिश्चसिध्यनंतरंविष्णुसायुज्यकामः व्यतीपातदिने
१० प्रातः पंचगव्येनपयोगोक्षीरपूरितकांस्यपात्रभोजनेचतुर्भुजं चक्राद्यायु
धोपेतं सौवर्णप्रतिमहस्तं लक्ष्म्यान्वितं विष्णुं विष्णोरराडमसीति मंत्रेण संस्था
प्यजातिपुष्पादीनापुरुषसूक्तेन संपूज्य शर्करोपेतेनपायसोपहारेनैवेद्यं दे
वंप्रार्थयेत् ॥ व्यतीपातदिनेदेवतवसर्वसमर्पितं ॥ भवत्वनंतफलदं मम जन्म राम
निजन्मनि ॥ ततः द्विजं संपूज्य ॥ क्षीरपूर्णशरावं सगुडं ससुवर्णं दत्वासोप १०
स्करोयांपीठेचगांचदत्वा ब्राह्मणान्भोजयेत् ॥ इतिप्रकारांतरं व्यती

पातव्रतं संपूर्णं ॥ श्री ॥ अथैकादशीव्रतोद्यापनं चिकीर्षुः दशम्यां एकाशनः
उक्तनियमवान् ॥ द्वितीयेप्रातः नद्यादौ भस्मगोमयमृत्तिकास्नानपुरःसरंस्ना
त्वास्नानांगतर्पणं कृत्वा ॥ अहतंवाससीपरिधायतिलकादिधृत्वा शरीरशु
ध्यर्थंब्रह्मकूर्चपुरःसरंपंचगव्यप्राश्यस्वगृह्यविधिनानित्यकर्मनिर्वर्त्यकूष्मां
डहोमादिना आत्मानंपापयित्वा मध्याह्ने द्वितियाधिकान्प्रमुचीन् अध्यात्मवि
दः उक्तगुणसंपन्नान्द्विजानुपवेश्यस्वयंदर्भेषासीनोदर्भान्धारयमाणः दे
वब्राह्मणवंदनपुरःसरंसपत्नीकः प्रधानसंकल्पं कुर्यात् ॥ तद्यथा ॥ देशका

लौल्यं कीर्त्यं मम अखिलपापक्षयपूर्वकधर्मार्थकाममोक्षचतुर्विधपुरुषार्थसि
११ द्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अमुककामनया वा अमुकया आचरितैतन्मुख्यैका
दशीव्रतं तथा कुस्यैकादशीव्रतं तत्संपूर्णफलावाप्तये अमुककुस्यैकादशीव्र
तोद्यापनं करिष्ये॥ इत्यकृत्य कृत्वा मुख्यकुस्यैकादश्योः संकल्पः कार्यः॥
पित्रादीनां चेत्तर्हि तेषां आहः कार्यः॥ ततरंगविहितं गणेशपूजनं पुण्याह राम
वाचनं मातृकापूजनं नांदीश्राद्धं आचार्यब्रह्मसदस्यर्त्विक्वरणं च करिष्ये॥ ११
स्वगृह्यविधिना कुर्यात् केचन गणेशपूजनपूर्वकं पुण्याहवाचनमेवेच्छंति

अथाचार्यवरणं॥ यजमानः स्वगोत्राद्युच्चार्य अमुकगोत्र अमुकशर्माणं ब्रा
ह्मणं एकादशीव्रतोद्यापनाख्ये कर्मणि विहितकर्मकर्तुं आचार्यत्वामहं वृणे
वृतोस्मीति ब्रूयात्॥ आचार्यस्तु॰ व्रतेति प्राश्य मधुपर्कादिना पूजयेत् सदे
वं पूर्ववत् ब्रह्माणं॥ यथा चतुर्मुखो ब्रह्म॰ इति संप्राश्य॥ पूर्ववत्पूजयेत्॥
ततः सदस्यं॥ त्वन्नो गुरुः पिता माता त्वं प्रभुस्त्वं परायणं॥ आपद्भ्यो मोक्षणार्थं
प्रसादस्य त्वामहं वृणे॥ वृत्वा पूर्ववत्पूजयेत्॥ भगवन्सर्वधर्मज्ञ सर्वकर्मभृ
तां वर॥ वितते मम यज्ञेस्मिन्नृत्विक् त्वं भव सुव्रतेति॥ अस्य यागस्य निष्प

रा. ९२ तोभवंतोभ्यर्थिता मया॥ सुप्रसन्नैः स्थकर्तव्यं कर्मेदं विधिपूर्वकं॥ ततः आचा
र्यः संकल्पं कृत्वा पूजासामग्रीं गृहीत्वा यजमानदेशं गत्वा पूर्वोक्तप्रकारेण स
र्वतोभद्रं विरिंच्यब्रह्मादि देवता आवाह्य संपूज्य तदुपरि अक्षतपंकजशतादि
द्वादशनामांकितं अक्षतमयं तंदूलपूर्णरक्तेन पूर्णपात्रसहितं कलशं प्रति
ष्ठाप्य तत्राष्टदलपद्मे देवता आवाहयेत् यथा प्रणवस्य परब्रह्म ऋषिः परमात्मा दे राम
वता देवी गायत्री छंदः व्याहृतीनां क्रमेण जमदग्निभरद्वाजभृगव ऋषयः अ ९२
ग्निर्वायुः सूर्यो देवताः देवी गायत्री देव्युष्णिक् देवी बृहत्यश्छंदांसि पुरुषावा०

तत्र कर्णिकायां भूः पुरुषं आवाहयामि ॐ भुवः पुरुषं आ० ॐ स्वः पुरुष० ॐ
भूर्भुवः स्वः पुरुषं आवाहयामि सौवर्णप्रतिमायां सहस्रशीर्षा नारायण पुरु
षोनुष्टुप् पुरुषावा० सहस्रशीर्षा० लक्ष्मीयुतपुरुषमध्ये आवाहयामि स्थाप
यामि॥ परितः पूर्वादिक्रमेण अग्निं० इंद्रं० यमं० प्रजापतिं० विश्वाच देवान्०
श्रेयाणं० रामं० श्रियं० आवाह्य नाममंत्रेण पूर्वे स्त्री चतुःसहस्रसहितं रुक्मि
णीं आवाह्य॥ दक्षिणे स्त्री चतुःसहस्रसहितं सत्यभामा आवाह्य॥ पश्चिमे स्त्री
चतुःसहस्रसहितां जांबवतीं आवाह्य॥ उत्तरे स्त्री चतुःसहस्रसहितां कालिं

ऐ.का. दीं आवाह्य॥ ततः आग्नेये० शंखं वावाह्य॥ नैऋत्ये॥ चक्रं०॥ वायव्ये॥ गदां आ०
५५ ॥ ईशान्ये॥ पद्मं आवाह्य॥ आग्नेये पुरतः सामध्वजी शरीरस्त्वकाहवंपरमे
ष्ठिनः॥ विष्णपापहरोनित्य मनः शांतिं प्रयच्छतु मे॥ इति गरुडं आवाह्य॥ प
रितः पूर्वादिक्रमेण इंद्राद्यष्टौ लोकपालान् ततन्नमंत्रै नाममंत्रैर्वा आवाह्य॥
तदसुमित्रा वरुणा० महादेवं० इति प्रतिष्ठाप्य पूर्वोक्त प्रकारेण पूजयेत्॥ पुष्पा राम
नंतरं अंगपूजां कुर्यात्॥ दामोदराय नमः पादौ पूजयामि॥ माधवाय० जानु १२
नि०॥ कामपतये० गुह्यं०॥ वामनाय० कटिं०॥ पद्मनाभ० नाभिं०॥ वि

श्वमूर्तये० उदरं॥ ज्ञानगम्याय० हृदयं०॥ श्रीकंठसंगिने० कंठं०॥ सहस्रबा
हवे० बाहुं०॥ योगयोगिने०॥ चक्षुषि०॥ उरगउरगाय० ललाटं०॥ नाकसु
रेशाय० नासां०॥ श्रवणेशाय० श्रवणौ०॥ सर्वकर्मदाय० शिखां०॥ सहस्र
शीर्षे० [illegible]रः०॥ सर्वरूपिणे० सर्वांगं०॥ धूपं नैवेद्यां चतुर्विंशत्युत्कमा
न्॥ भक्त्या चतुर्विंशति सुतिथि स्वापिपरंतप॥ मोदकान् लड्डुकान् चूर्णान् घृ
घृतपूरकमंडकान्॥ सोपालिकादिकं सारः सेवाखंडफलानि च॥ वटकां
पायसं दुग्धं शालिदध्योदनं तथा॥ इंडिरिकाः पूरिकाश्च अपूपान् गुडमो

ए. दकान्॥तिलपिष्टंखंडवेष्टंलाजादुग्धंसशर्करं॥रंभाफलंचसघृतंमधुहैयं
१४ नगुडोदनं॥विशेषतस्तुचूर्माद्यावरमाडेपुरणाच्यापोळयादुधाचीसायशेवी
याम्रफलघृतपिष्टपोहेसेवाइक्षुकुसुमरवःइत्यादिएवंक्रमेणनैवेद्यंदद्यात्॥दे
वस्यचतुष्टयेनमस्कारानंतरंविशेषार्घ्यंदद्यात्॥तैजसपात्रेनारिकेलंबीज
पूरमस्तत्पुष्पचंदनादिहिरण्यंनिक्षिप्यजानुभ्यांधरणींधृत्वाइमंमंत्रमुदी राम
रयेत्॥नारायणजगन्नाथलक्ष्मीकांतदयानिधे॥गृहाणार्घ्यंमयादत्तंव्र १४
तसंपूर्णहेतवे॥इत्यर्घ्यंदत्त्वामूलमंत्रेणपूजयेदिति॥ततःब्राह्मणान्संपूज्य

वीनशास्त्रपुराणकथाश्रवणादीनाजागरपूर्वकंरात्रिंनिनयेत्॥ततःप्रातः
आचार्यःनित्यकर्मनिर्वर्त्यमंडलस्थदेवताःपंचोपचारैःसंपूज्यहोममारभे
त्॥तद्यथा॥देशकालौसंकीर्त्यमुकैकादशीव्रतोद्यापनांगभूतंविहितह
वनंकरिष्ये॥तदंगस्थंडिलादिसर्वं॥अग्निप्रणयनादिकंविधायअन्वाद
ध्यात्॥तद्यथा॥एकादशीव्रतोद्यापनहवनेदेवतापरिग्रहार्थमन्वाधानंक
रिष्ये॥अत्रेहीत्यादियजुःशाखिनाअस्मिन्नन्वाहितेग्नावित्यादिचक्षुषी
आज्येनेत्यंतमुक्त्वा॥अत्रप्रधानंपुरुषसूक्तेनप्रत्यृचंआज्येनअमुकाव

ऐका० तेसंख्यया अग्निं प्रजापतिं विश्वान्देवान्ब्रह्माणं चाज्येनएकवारं वासुदेवं
१५ रामं श्रियं विष्णुं नाममंत्रेण घृताक्तपायसद्रव्येण अग्निं वायुं सूर्यं प्रजापतिं
सुएकवारं घृताक्तपा एकवारं पुनः विष्णुं विष्णोर्नुकमिति षण्मंत्रैः प्रत्यृचं
च घृताक्तपायसद्रव्येण अग्निं वायुं सूर्यं प्रजापतिं च एकवारं घृताक्तपाय
सद्रव्येण केशवादिदामोदरांतद्वादशदेवताः नाममंत्रैः एकवारं पायसद्रव्ये राम
ण स्त्रिचतुःसहस्रसहितां रुक्मिणीं स्त्रिचतुःसहस्रसहितां सत्यभामां स्त्रि १५
चतुःसहस्रसहितां जांबवतीं स्त्रिचतुःसहस्रसहितां कालिंदीं शंखं चक्रं ग

दां पद्मं गरुडं इंद्रादीन् लोकपालान् ब्रह्मादिमंडलदेवताश्चैकैकमाज्याहु
त्येन०॥ पश्चात्स्थालीपाकविधिना चरुं श्रपयित्वा पवित्रेणोविनन्नमिति
प्रोक्षणो उद्धरेत्॥ आज्यभागांते कृत्वा प्रधानदेवताहोमयेत्॥ ॐ सह
स्रशीर्षा० नारायणायेदं॥१६॥ ॐ अग्नयेस्वाहा यथालिंगं त्यागः इंद्रा
य० ॐ प्रजापतये० विश्वेभ्योदेवेभ्यः० ब्रह्मणेस्वाहा० इत्याज्येन॥ अथ
घृताक्तपायसेन॥ ॐ वासुदेवाय० ॐ रामाय० श्रियै० विष्णवे० विष्णो
र्नुकमिति षण्णां दीर्घतमा विष्णुस्त्रिष्टुप् हवने विनियोगः ॐ विष्णोर्नु

ए.
१९ कं०॥ ॐ तदस्यप्रिय० ॐ प्रतद्विष्णो० ॐ परोमात्रया० ॐ विचक्रमे०
ॐ त्रिर्देवः० ॐ भूःस्वाहा० भुवःस्वा० स्वस्वाहा० भूर्भुवःस्वःस्वाहा॥ अ
थकेवलपायसेन॥ ॐ केशवायनमस्वाहा॥ ॐ नारायणाय० ॐ माध
वाय० ॐ गोविंदाय० ॐ विष्णवे० ॐ मधुसूदनाय० ॐ त्रिविक्रमा
य० ॐ वामनाय० ॐ श्रीधराय० ॐ हृषीकेशाय० ॐ पद्मनाभाय० ॐ राम
दामोदराय०॥ केवलाज्येन॥ ॐ त्रिचतुसहस्रसहितायैरुक्मिण्यैनमः १९
स्वाहा॥ त्रिचतुःसहस्रसहितावैसत्यभामायैनमस्वाहा॥ ॐ त्रिश्च

तुःसहस्रसहितावैजांबवतीं नमस्वाहा॥ ॐ त्रिश्चतुःसहस्रसहितायैकालिंदी
नमःस्वाहा॥ ॐ शंखाय० ॐ चक्राय० ॐ गदायै० ॐ पद्माय० ॐ गरुडाय०
इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायव्ये० सोमाय० ईशाना
य०॥ ततः ब्रह्मादिदेवताभ्यश्च एकैकयाज्याहुत्या॥ ततो यजमानः देवाय प्राणांनि
वेदयेत्० अनेनमंत्रेण॥ त्वामेकमाद्यंपुरुषंपुराणंनारायणंविश्वसृजंय
जामः॥ त्वंवैषभागोविहितोविधेयागृहाणहव्यंजगतामधीशः॥ १॥ इति
निवेद्यतिष्ठेद्॥ ततः अग्निंत्रिवारंचतुर्वारंवाप्रदक्षिणीकृत्य॥ भिंदिवि

ष्वा अवइति धरणीं जानुनी निपात्य ॥ ध्रुवं सकं पुरुषसूक्तं च जप्त्वा ॥ अ
१७ ष्टौ पादानि प्रति दिशं गच्छेत् ॥ एभिर्मंत्रैः कृष्णाय वासुदेवाय हरये परमा
त्मने ॥ शरण्यायाप्रमेयाय गोविंदाय नमो नमः ॥१॥ अनंताय जगद्धात्रे ब्र
ह्मणेनंतमूर्त्तये ॥ अव्यक्तायाखिलेशाय चिद्रूपाय गुणात्मने ॥२॥ नमो
मूर्त्ताय सिध्धाय पापाय परमात्मने ॥ देवदेवाय वंद्याय पराय परमेष्टिने ॥ राम
कर्त्रे विश्वस्य गोत्रे च नतं संहर्त्रे च ते नमः ॥४॥ अथ देवाय निवेदिते मापणं १७
आनीय मूर्ध्नि धृत्वा घोषयेत् ॥ के वैष्णवाः के वैष्णवाः उच्चैर्वदेत् ॥ ततः

समानाः प्रतिवदेयुः ॥ वयं वैष्णवाः वयं वैष्णवाः इति ॥ ततः तेभ्यः समानेभ्यो
हविर्दत्वा स्वयं ॥ ॐ नमो भगवते वासुदेवायेति मंत्रेणेदं अमृतं अहं प्रा
श्नामीति ॥ इति प्राश्याचम्य प्राणानायम्य ॥ यजमानः आचार्यो वा सिद्ध
येस्वाहेत्यग्नौ आज्यं जुहुयात् ॥ ततः यतइंद्रभयामहे इत्यनेन आत्मानम
भिमंत्रयेत् ॥ आचार्यः अभ्युपहरणं तं कृत्वा प्रायश्चित्तादि होमशेषं समाप
येत् ॥ ततः यजमानः तिथ्यादि संकीर्त्य कृतस्य एकादशीव्रतोद्यापनस्य सां
गतासिध्यर्थं आचार्यादीन् वस्त्रतांबूलदक्षिणादिभिः पूजयिष्ये ॥ वि

ए॰का॰ उक्तप्रकारेण संपूज्य आचार्याय श्वेतां सवत्सां सालंकारां गां दद्यात्॥ तत्र

१८ श्लो॥ यजमानः एकादशीव्रतोद्यापनपूर्तिकामः नारायणप्रीतये आचार्य

याय गोप्रदानमहं करिष्ये॥ आचार्यं संपूज्य पूर्ववत् गां दद्यात्॥ ततः यजमा

नः द्वादशसंख्याकान् ब्राह्मणान् केशवादिद्वादशदेवतास्वरूपान् विभाव्य

केशवादिद्वादशनामभिः यथाविभवं संपूज्य तेभ्यः पक्वान्नपूरितान् वस्त्र राम

तांबूलदक्षिणाः सहितान् द्वादशकलशान् केशवादिद्वादशनामांकितान् १८

दद्यात्॥ तत्र मंत्रः॥ पक्वान्नपूरितं कुंभं दक्षिणावस्त्रसंयुतं॥ ददामि द्विज

वर्याय देवो नः प्रीयतामिति॥ देवप्रदस्थाने॥ केशवादिनाम्ना ऊहः कार्यः॥

ततः पीठदानं॥ दंपीठं सोपस्करं लक्ष्मीनारायणप्रतिमायुतं महाविष्णुप्री

तये तुभ्यमहं संप्रददे आचार्याय दद्यात्॥ आचार्यः उत्तिष्ठ॰॥ पीठदेवता उ

त्थाप्य॥ पात्रांतरे उद्धृतकलशोदकेन सपत्नीकं यजमानं समुद्रज्येष्ठा रत्या

दि वैदिकमंत्रैः सुरास्त्वामित्यादि पौराणिकैर्मंत्रैः वेस्नवस्तुकैः अभिषिंचेत्॥ त

तः स्नात्वा यजमानः अग्निं संपूज्य यस्य स्मृत्या॰ यांतु देव इति विसर्जयेत्॥ कृत

स्य कर्मणः सांगतासिध्यर्थं यथाशक्ति ब्राह्मणान् भोजयिष्ये तेभ्यश्च भूयसीं

ऐ. दक्षिणां दत्वानुमुत्सृजेत॥ आशिषो गृहीत्वा व्रतपूर्णतां वाचयेत॥ जपच्छिद्रं तप
१९ च्छिद्रं यत्नच्छिद्रं व्रतकर्मणि॥ सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः॥ इति स
प्रार्थ्य अच्छिद्रं भवतु ब्राह्मणान्नमस्कृत्य इष्टैः सह भुंजीत॥ इति शुक्लैकाद
शीव्रतोद्यापनं समाप्तं॥ अथ कृष्णैकादशीव्रतोद्यापनं॥ यजमानः देश
कालौ संकीर्त्य आत्मनः पापक्षयपूर्वक एकविंशतिपुरुषानुद्धर्तुकाम राम
नया लक्ष्मीनारायणप्रीतये च आचरितस्य कृष्णैकादशीव्रतस्यांगत्वासिध्य १९
र्थं कृष्णैकादशीव्रतोद्यापनाख्यं कर्म करिष्ये॥ पूर्वोक्तप्रकारेण गणेशपू

जनादारभ्य आचार्यवरणांतं कर्म कुर्यात॥ ततः आचार्यः पूर्वोक्तप्रकारेण
सर्वतोभद्रपीठे ब्रह्मादिदेवता आवाह्य संपूज्य तदुपरि कलशं संकर्षणादि
द्वादशनामांकितं पूर्णपात्रयुतं प्रतिष्ठाप्य तत्र अष्टदलं विलिख्य कर्णिकायां भूः
पुरुषमित्यादि आवाह्य मध्ये सहस्रशीर्षं नीलोवर्णां लक्ष्मीनारायणप्रति
मां आवाह्य॥ ततः पूर्वादिदिक्षु प्रत्येकं स्त्रीचतुःसहस्रसहितां रुक्मिणीस
त्यभामां जांबुवतीं कालिंदीं चावाह्य॥ आग्नेयादिविदिक्षु गणपतिं दुर्गां क्षे
त्राधिपतिं वास्तोष्पतिं चावाह्य॥ पुनः पूर्वादिदिक्षु ब्रह्मजज्ञानमिति ब्रह्मा

दे.का. णं विष्णोर्नुकमिति विष्णुं बलभद्रं प्रद्युम्नं त्र्यंबकमिति मंत्रेण त्र्यंबकं वसुदेवं रा
२० मं अनिरुद्धं दैत्यघ्नं दिक्ष्वर्वाग्भागे श्रियं पुरतः राजतं गरुडं पुनः आग्नेयादि
कोणेषु शंखं चक्रं गदां पद्मं पुनः पूर्वादिक्रमेण विमलां उत्कर्षिणीं ज्ञानां क्रि
यां योगां प्रह्वां सत्यां ईशानां पृष्ठभागे अनुग्रहां पुनः पूर्वादिक्रमेण इंद्राद्यष्ट
लोकपालान्तत्तन्मंत्रैर्नाममंत्रैर्वा आवाह्य ॥ पूर्वोक्तप्रकारेण षोडशोप राम
चारैः संपूज्य पुराणपठनादिना रात्रिं निनयेत् ॥ प्रातः पुनः पीतदेवताः संपू २०
ज्य पूर्वोक्तप्रकारेण अग्निं प्रतिष्ठाप्य ॥ अत्र प्रधानं संकर्षणादिकृष्णांतद्वाद

शदेवताः घृताक्तपायसेन एकैकयाज्याहुत्या यक्ष्ये पुरुषं विष्णुं अष्टोत्तर
सहस्रसंख्याकघृताक्ततिलाहुतिभिः अष्टोत्तरशतसंख्याभिर्वा अग्निं वा
युं सूर्यं प्रजापतिं प्रत्येकं त्रिचतुःसहस्रसहितां रुक्मिणीं सत्यभामां जां
बवतीं कालिंदीं एकवारं पायसेन वसुदेवरामश्रियं विष्णुं विष्णोर्नुकमिति
षण्मंत्रैः प्रत्येकं पायसेन गणपतिं वास्तोष्पतिं ब्रह्माणं बलभद्रं प्रद्युम्नं
त्र्यंबकं अनिरुद्धं गरुडं शंखं चक्रं गदां पद्मं विमलाद्याः अनुग्रहांता देवताः
इंद्राद्यष्टौ लोकपालान् ब्रह्मादिमंडलदेवताश्च एकैकयाज्याहुत्या यक्ष्ये ॥

तो॰ पयसि स्थालीपाकविधिना चरुं श्रपयित्वा प्रविष्टं तं विनतं मित्रिमं त्रेणप्राप
णमुद्धृत्य आज्यभागांतं कृत्वा प्रधानदेवता होमयेत्॥ ॐ संकर्षणाय नमः
२५ स्वाहा वासुदेवाय॰ प्रद्युम्नाय॰ अनिरुद्धाय॰ संकर्षणाय॰ अधोक्षजाय॰ ना
रसिंहाय॰ जनार्दनाय॰ उपेंद्राय॰ हरये॰ कृष्णाय॰ घृताक्तपायसेन एक
वारं सहस्रशीर्षा पुरुष॰ घृताक्ततिलै भूः स्वाहा भुवः स्वाहा भूर्भुवस्स्वः स्वाहा॥ राम
मूर्त्ये कं स्विद्गुः सहस्रसंहिता ये रुक्मिण्यै सत्यभामायै जांबुवत्यै का २१
लिंद्यै॰ वासुदेवाय॰ रामाय॰ श्रियै॰ विष्णोर्नुकं॰ तदस्यप्रियं॰ अनद्धिमो॰

परोमात्रया॰ विचक्रमे॰ त्रिर्देवः॰ केवलं पायसेन अथाज्येन गणपतये॰ दुर्गा
यै॰ क्षेत्राधिपतये॰ वास्तोष्पतये॰ नतन्मंत्रैर्वा ब्रह्मणे॰ बलभद्राय॰ प्रद्युम्ना
य॰ त्र्यंबकाय॰ अनिरुद्धाय॰ गरुडाय॰ शंखाय॰ चक्राय॰ गदायै॰ पद्मा
य॰ विमलायै॰ उत्कर्षिण्यै॰ ज्ञानायै॰ क्रियायै॰ योगायै॰ प्रह्व्यै॰ सत्यायै॰
ईशानायै॰ अनुग्रहाय॰ इंद्राद्यष्टौ लोकपालान् ब्रह्मादिमंडलदेवतांश्च
हुत्वा ततः स्विष्टकृतं हुत्वा ततः पूर्वोक्तप्रकारेण देवाग्न्युपस्थापनानि वेदनमार
भ्य प्रायश्चित्तहोमांतं कर्म निवर्त्य आचार्याय कृष्णां गां दत्वा द्वादश ब्राह्मणा

वे. नसंकर्षणादिरूपस्थांतद्वादशनामभिः संपूज्य तेभ्यः दक्षिणादिषु मान्तिल
२२ पूर्णान्संकर्षणान्द्वादशनामांकितान्कलशान्दद्यात् पीठं दत्वा सद
न्येन ब्राह्मणान् यथाविभवं संपूज्य द्वादश ब्राह्मणान्प्रतोष्य व्रतं संपूर्णतां
वाचयित्वा आशिषो गृहीत्वा इष्टैः जनैः सह भुंजीत इति कूर्मैकादशीव्रतंस
माप्तं ॥ इदं भुक्तिकूर्मैकादशीव्रतोद्यापनं बौधायनसूत्रानुसारेण लिखि राम
तं ॥ पु[illegible]कुमसर्वतोभद्रे ब्रह्मादिदेवतास्थापनपूर्वकं कलशप्रतिष्ठाप्य २२
अष्टदलपद्मे सुवर्णघटितलक्ष्मीनारायणप्रतिमां इदं विष्णुरिति मंत्रेण

प्रतिष्ठाप्य पुरतः राजतं गरुडं परितः लोकपालाष्टकं स्थाप्य पुरुषसूक्तेन
षोडशोपचारैः संपूज्य पुराणपठनादिना रात्रिं निनयेत् प्रातरग्निं प्रतिष्ठाप्या
ज्यं दध्यात् इदं विष्णुरिति मंत्रेण घृताक्तपायसेन घृताक्ततिलमिश्रेण प्रत्ये
कं अष्टोत्तरसहस्रं अष्टोत्तरशतं वा हुत्वा कपिलां गां दत्वा चतुर्विंशतिः
ब्राह्मणान् केशवादिनामभिः संपूज्य केशवादिनामांकितान् चतुर्विंशति
कलशान् पक्वान्नपूरितान् वस्त्रदक्षिणायुतान् दद्यादिति ॥ इदं उद्यापनं तु
प्रबोधिन्यां मार्गशीर्षभीमतिथौ माघवैशाखविजयसम्प्रदौ शुभतिथौ वा कुर्या

ए.का.
२२

नरकनिपातये॥ इति कृष्णैकादशीव्रतं॥ तत्र ज्येष्ठशुक्लैकादश्यां निर्जलैकादशी
व्रतं॥ तदुक्तं स्कांदे॥ ज्येष्ठमासि तु पक्षे च यदा शुक्ला एकादशी भवेत्॥ निर्ज
लं समुपोष्यात्र जलं कुंभांतु शर्करान्॥ प्रदाय मनुजो विप्रेभ्यो मोदते विष्णु
सन्निधौ इति॥ तथा भारते॥ भीमसेनं प्रति व्यासवचनं॥ वृषस्थे मिथुनस्थे
वा शुक्ला एकादशी भवेत्॥ ज्येष्ठमासे प्रयत्नेन सोपोष्या जलवर्जिता॥१॥ राम
उदपानादृते यस्या वर्जयित्वा जलं नरः॥ अप्रयत्नादवाप्नोति द्वादशद्वाद २२
शीफलं॥ ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत्॥ अल्पं सुवर्णं दत्वा

च द्विजातिभ्यो यथाविधि॥२॥ भुंजीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी॥ सं
वत्सरस्य या मध्ये एकादश्यो भवंतु ताः॥ तासां फलमवाप्नोति नात्र कार्या विचार
णा॥ इति निर्जलैकादशीव्रतं॥ अथ आषाढशुक्लैकादश्यां शयन्येकादशीव्रतं
ब्रह्मपुराणे॥ एकादश्यां तु शुक्लायां आषाढे भगवान् हरिः॥ भुजंगशयने शे
ते यदा क्षीरार्णवे सदा॥१॥ तदा तस्य तिमा कार्या सर्वलक्षणसंयुता॥ कांचनी राज
ती ताम्री चारूपेण रकेत तथा॥२॥ पीतांबरधरा सौम्या पर्यंके चासने शुभे॥ स्नाप
रत्नादधि क्षीर घृत क्षौद्र जलैस्तथा॥३॥ उपचारैः षोडशकैः पूजयेत् परमेश्वरं॥

पं.चे. २७ ॥तत्रमंत्रः॥ सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदं॥ विबुद्धे त्वयि बुध्येत जगत्स
र्वं चराचरमिति॥४॥ रात्रौ जागरणं कृत्वा प्रभाते देवं संपूज्य ब्राह्मणान् सदस्येन
संतर्प्य किंचिन्निषमान् मौनी भुंजीत॥ एवमेव प्रबोधिन्यां सर्वं कार्यं॥ इति भा
षा दशमुक्ते कादश्यां शयन्येकादशी व्रतं समाप्तं॥ श्री॥ अथाश्विन शुक्ल पंचम्यां
मध्याह्नव्यापिन्यां उपांगललिता व्रतं॥ प्रातः दंतधावन पूर्वकं नद्यादौ स्नात्वा शु राम
क्लवासः परिधाय मंडपिकादिकं कृत्वा तिथ्यादि संकीर्त्य मम पुत्रपौत्र विद्याप्येष २७
करव गोविजय श्रद्धादि कामेन स्त्रीत्व वैधव्य कामनया उपांगललिता प्रीत्यर्थं अद्य

वर्षात्मिकं चरितोपांगललितो द्यापनं करिष्ये॥ इति संकल्प्य॥ वृताचार्यः॥ ए
कलिंगो द्वे वे कलशोपरि सौवर्णीं शनि मां पूजयेत्॥ पौराण मंत्रैः श्री सूक्तेन च॥
ध्यानं॥ नीलकौशेयवसनां हेमाभां कमलासनां॥ भक्तानां वरदां नित्यं ल
लितां चिंतयाम्यहं॥ १॥ आवाहनादि पुष्पांतैः संपूज्य॥ उपांगललितायै न
मः पादौ॰ भवान्यै॰ गुल्फौ॰ सिद्धेश्वर्यै॰ जंघौ॰ श्रियै नमः ऊरू॰ विश्व
रूपिण्यै॰ कटिं॰ देव्यै॰ नाभिं॰ वरदायै॰ कुक्षिं॰ शिवायै॰ हृदयं॰ वागेश्वर्यै॰
स्कंधौ॰ महादेव्यै॰ बाहो॰ प्रकृतिभद्रायै॰ करौ॰ पद्मिन्यै॰ कंठं॰ सरस्व

त्यै॰ मुखं॰ पद्मकेसरवासिन्यै॰ नासिकं॰ महिषमर्दिन्यै॰ नेत्रौ॰ लक्ष्म्यै॰ कर्णौ
२५ ॰ भवान्यै॰ ललाटं॰ विंध्यवासिन्यै॰ शिरः॰ सिंहवासिन्यै॰ सर्वांगं॰॥ ततो
धूपादिकं पुष्पांजल्यंते साग्रान्यष्टचत्वारिंशत्परिमितान् दूर्वांकुरान् ह
स्तेनादाय गावहुप्ररोहा सततम्मम ताहरितालिका॥ यथे ललिते मातस्तथामे
स्युर्मनोरथाः॥ इति मंत्रेणार्पयेत्॥ पुनः एवमेवाष्टचत्वारिंशत्वारं सम उ म
र्पितः प्रदक्षिणान्नमस्कारः कथादिश्रवणं रात्रौ जागरणं कृत्वा॥ प्रातः २५
नित्यकर्म निर्वर्त्य पुनः संपूज्य॥ देव्यै अष्टौ वटकान् समर्प्य॥ अग्निं प्रतिष्ठा

प्याचारध्यात्॥ प्रधानं उपांगललितां गौरीर्मिमायेति मंत्रेण अष्टोत्तरशतं
दूर्वात्रिकाहुतिभिः नमो देव्या इति मंत्रेणाष्टोत्तरशतं तिलसर्पिः पंचखाद्यंपु
तपायसाहुतिभिः ब्रह्मादिदेवताभ्यः एकैकपाज्याहुत्या यस्ये॥ होमं संपाद्य॥ अ
ष्टौ ब्राह्मणान् वस्त्रादिभिः संपूज्य तेभ्यः पक्वान्नपूरितान् अष्टौ कलशान् द
क्षिणासहितान् दद्यात्॥ ततः आचार्याय वस्त्रालंकारान्पूजयित्वा विंशति
वटकान् सहितान् वायनं दक्षिणासहितान्दद्यात्॥ तत्र मंत्रः॥ पक्वान्नंष फ
लसंयुक्तं सघृतं दक्षिणान्वितं॥ उपांगललिताप्रीत्यै ब्राह्मणाय ददाम्यहं

सो॰ प॰ ततः देवीं विसर्जयेत्॥ सा वाहनाशक्तियुता वरदा पूजिता मया॥ मातर्मामनुगृ-
२६ ह्याथ गम्यतां निजमंदिरे॥ एवं विसृज्य सोपस्करपीठं गां च आचार्याय दत्वा ब्राह्म-
णान्नदंनेन भोजयित्वा आशिषो गृहीत्वा स्वयं विरागतिवंधुकानू भुंजीत॥ इती-
त्युक्तं देवलिना व्रतोद्यापनं संपूर्णं॥ श्रीसोमवत्यामावास्याव्रतं॥ तत्र शौनकः
अमावास्या तु सोमेन सप्तमी भानुना सह॥ चतुर्थी भूमिपुत्रेण सोमपुत्रेण
चाष्टमी॥ चतस्रस्तिथयस्त्वेता सूर्यग्रहणसन्निभा इति तिथ्यादि संकी- राम
र्त्य आत्मनः अवैधव्यपुत्रपौत्रप्राप्तिपूर्वक अतुलसौभाग्यसिद्धिद्वारा २६

अश्वत्थरूपी नारायणप्रीत्यर्थं आचरितस्य सोमवत्यामावास्याव्रतस्य
सांगतासिद्ध्यर्थं तदुद्यापनाख्यं कर्म करिष्ये॥ ततः वृताचार्यः सर्वतोभद्र
कलशोपरि पद्ममयपीठस्य सौवर्णाः श्वत्थाधः हेमं लक्ष्मीनारायणं इदं
विष्णुरिति मंत्रेण संस्थाप्य मूलतो ब्रह्मरूपेति पुरुषसूक्तेन पूजयेत् कथा
श्रवणादिना रात्रिं निनयेत् प्रातरग्निं प्रतिष्ठाप्यान्वाद्ध्यान् लक्ष्मीनारा
यणं अश्वत्थसमित्पायसतिलद्रव्येण प्रत्येकं अष्टोत्तरशतसंख्याका
हुतिभिः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये ततः द्वादश ब्राह्मणा

सो॰म॰ २७

न्नवस्त्रादिना संपूज्य लड्डु पायस घृत मंडकादि पक्वान्नैः संतर्प्य आशिषो गृ
हीत्वा स्वयं भुंजीत ॥ इति सोमवत्या मावास्याव्रतं समाप्तं ॥ श्रावण अमा
यां पिठोराव्रतं ॥ प्रातस्नात्वा नित्यकर्म निर्वर्त्य वार्षिक वस्तूजा उद्यापन
संकल्पं कुर्यात ॥ तिथ्यादि संकीर्त्य आत्मनः स्वकुलस्य च संतति विच्छे
दाभाव पूर्वक पुत्र पौत्र लक्ष्मी सुखा द्यभिवृद्धि द्वारा सुतवर्षावधि आ
चरितस्य पिठोराव्रतस्य संपूर्णता सिद्ध्यर्थं चतुः षष्ठी योगिनी स्वरूपी
सप्तमातृका प्रीत्यर्थं तदुद्यापनाख्यं कर्म करिष्ये इत्याचार्यः उक्तप्रका

राम २७

रेण सर्वतो भद्रे अष्टौ कलशान्प्रतिष्ठाप्य सप्तकलशोपरि क्रमेण हेमीः सप्त
प्रतिमाः नाममंत्रेण ब्राह्मी॰ माहेश्वरी॰ कौमारी॰ वैष्णवी॰ वाराही॰ इ
न्द्राणी॰ चामुंडा॰ इत्यावाहनब्रह्मजिज्ञाने सप्तमातरः ॥ ॰ इत्यनेन पूजयेत
तदुपरि सुवर्णादि सुपूर्ण पात्रयुते कलशे चतुःषष्ठी योगिनीः हैमीप्र
तिमासु अक्षतपुंजेषु वा आवाहयेत दिव्ययोगिनीं॰ सत्ययोगिनी॰
सिद्धियो॰ गणेश्वरी॰ प्रेताक्षी॰ डाकिनी॰ कालि॰ कालरात्रिं॰ निशा
चरी॰ ॐकारीं॰ १० रुद्रवेतालीं॰ ह्रींकारीं॰ भूतडांबरीं॰ ऊर्ध्वकेशीं

विरूपाक्षी॰ शुष्कांगी॰ नरभोजनी॰ भेरौंडी॰ वीरभद्रा॰ धूम्राक्षी॰ २॰
२८ कलहप्रिया॰ राक्षसी॰ घोररक्ताक्षी॰ विरूपा॰ भयंकरी॰ भासुरी॰ ऐं
द्रवेताली॰ श्रीपरणी॰ त्रिपुरान्तकी॰ भैरवी॰ ३॰॥ ध्वंसिनी॰ क्रोधिनी॰
दुर्मुखी॰ प्रेतवाही॰ कंटकी॰ त्राटिकी॰ यमदूती॰ करालिनी॰ खड्गी॰
दीर्घलंबोष्ठी॰ ४॰ मालिनी॰ मंत्रयोगिनी॰ कालाग्निग्रहाणी॰ चक्री राम
॰ कंकाली॰ भुवनेश्वरी॰ स्फीताक्षी॰ कामुकी॰ कोली॰ काकदृष्टी॰ ५॰ २८
अधोमुखी॰ भक्षणी॰ भैरवी॰ व्याघ्री॰ कंकणी॰ प्रेतभक्षणी॰ वीरकौ

मारिकां॰ चंडिका॰ वाराही॰ मुंडधारिणी॰ ६०॰ कामाक्षी॰ उग्राणी॰ ज्वा
लंधरी॰ महालक्ष्मी ६४ नमः सुवर्णादिपात्रेण फलपुष्पजलयुतं अक्ष
तायुक्तं अर्घ्यनाममंत्रेण प्रत्येकं दद्यात् कस्याश्च वर्णादिना रात्रिं निनयेत्
प्रातः पीठदेवताः संपूज्य अग्निं प्रतिष्ठाप्य ध्यात्वा ध्यात् सप्तमातृः अष्टोत्त
रशतं आज्याहुत्या पूजामंत्रेण योगिनीभ्यः एकैकयाज्याहुत्या नाममंत्रे
ण ब्रह्मादिदेवताभ्यः एकैकयाज्याहुत्या यजेत्॥ होमं सुकृता कृताः ततः
सप्तमिथुनानि वस्त्रादिना संपूज्य वस्त्रदक्षिणा प्रतिमायुता सप्तकेल

शान्तेभ्यो दद्यात्॥ तत्र मंत्रः सोपस्करं च कलशं गृहाण द्विजसत्तम॥ प्रीय
तां मा नरो मर्त्यलोकानां स्थितिहेतवे॥ ततः योगिनीपीठे आवाहयेत् दत्त्वा प्र
तपूजयेत् ६४ श्रेगृः तेभ्यो दत्त्वा सदक्षिणं तर्पयेत् आशिषो गृहीत्वा स्वयं भुंजीत
इति पिठोरात्रत समाप्तं॥ अथ स्वस्तिकव्रतं॥ भविष्ये॥ आषाढादि आश्वि
नांतं तत्र विधिः देवालये गोष्ठे तु तुलस्यालये गृहे वा गोमयेन लिप्य शुद्ध
भूमौ पंचरंगकैर्वर्णैः प्रत्यहं स्वस्तिकान् लिखित्वा तत्र गोपालं संपूजये
त् एवं चरित्वा अंते उद्यापनं कुर्यात्॥ तद्यथा तिथ्यादि संकीर्त्य आत्मनः

शत्रुजयपापक्षयार्थं धे वे ध्यादि निरसनपूर्वक पुत्रपौत्र सौभाग्य आरोग्य
वाप्ति द्वारा आचरितस्य स्वस्तिकव्रतस्य पूर्णतासिद्ध्यर्थं श्रीगोपालप्रीत्यर्थं
च तदुद्यापनाख्यं कर्म करिष्ये॥ इत्याचार्यः सर्वतोभद्रे कलशे हेमगोपालं
इदं विष्णुरिति मंत्रेण संस्थाप्य पूजयेत् कृत्वा श्रवणादिना रात्रिं निनयेत्
प्रातरग्निं प्रतिष्ठाप्य चरुं दद्यात्॥ गोपालं स्वस्तिकं दशांशो नरा तोषेण
वा घृतां कपायसं द्रव्येण ब्रह्मादिदेवताभ्य एकैकया आज्याहुत्या पश्चा
दो मंत्रः स्वस्त्ययनं तार्क्ष्यं। अथ पौराणमंत्रस्तु॥ स्वस्ति नाम परं दैवं स्व

स्तिकारणकारणात्॥ स्वस्त्यये पायसं पक्त्वा संयुक्तं च समाज्यं स्वस्तये स्वाहेति॥ होम
३० दशांशेन तर्पणं तद्दशांशेन मार्जनं। तद्दशांशेन ब्राह्मण भोजनं ततः
विशिष्टान् दश ब्राह्मणान् वस्त्रादिना संपूज्य तेभ्यः पंचरंगयुतानि औ
र्णानि अभावे दर्भजन्यान्यपि आसनादि दक्षिणा पुरःसरं दत्वा सोपस्क
रे आचार्याय दत्वा व्रतपूर्त्तये गोमिथुनं प्रदत्वा अधिकफलकामश्चेत्
वानांशेन तदभावे आढकानां द्रोणं दत्वा पक्वान्नैः ब्राह्मणान् संतर्प्य आ राम
शिषो गृहीत्वा भुंजीत॥ इति स्वस्तिकव्रतं संपूर्णं॥ श्री॥ लक्ष प्रदक्षि ३०

णा विधानं॥ विसुध मेंतरे आषाढ शुक्ल पौर्णमास्यां प्रारंभः॥ कार्तिक्यां
समापनं॥ अथवा शुभमासे वा प्रारंभ समापने॥ सुरालये ऽश्वत्थमूले
तुलस्यां गोव्रजे अथवा कुर्यात् प्रदक्षिणाः सर्वा पूजयित्वा यथाविधि॥
तिथ्यादि संकीर्त्य आत्मनः अखिल पापरोग पीडा निरसन पूर्वक अभी
ष्ट सिद्धि द्वारा श्री परमेश्वर प्रीत्यर्थं विष्णोः अमुकस्येति वा लक्ष प्रदक्षि
णाव्रतं करिष्ये॥ गणेशादि संपूज्य सामग्रीं गृहीत्वा अश्वत्थादि समी
पं गत्वा पुरुषसूक्तेन संपूज्य सहस्त्रनामादि पठन् करस्थालनादि रहि

तः एकाग्रचित्तः प्रदक्षिणाः एकरूपतया समाप्तिपर्यंतं कुर्यात् ॥ समाप्तौ
२१ अमुककामनया कृता या प्रदक्षिणा तत्साद्गुण्यार्थं तदुद्यापनं करिष्ये ॥
सर्वतोभद्रे कलशोपरि हैमकृतप्रदक्षिणादेवं तत्तन्मंत्रेण संपूज्य सा
ष्टांगप्रणमेत् ॥ प्रातरग्निं प्रतिष्ठाप्यान्वाद्ध्यात् प्रधानं विष्णुं विष्णुगायत्र्याः
अष्टोत्तरशतचर्वाहुतिभिः ब्रह्मादिदेवताश्च एकैकयाज्याहुत्या यक्ष्ये राम
॥ ततः पीठं कपिलां गां च दत्वा यथाशक्ति द्विजान् भोजयेत् ॥ अत्र यद्देव २१
ताकप्रदक्षिणाः तत्तद्देवताप्रकाशकैर्मंत्रैः पूजादौ ग्राह्यः इति लक्षप्रदक्षि

णाविधानं ॥ अथ प्रकारांतरेणाश्वत्थप्रदक्षिणाविधिः तानविष्ये संकल्पा
दि पूर्ववत् यात्र विशेषः ॥ आदौ आराधयेद्विष्णुं ध्यानावाहनपूर्ववत् ॥
यान्नविशेषः ॥ आदौ आराधयेद्विष्णुं ध्यानावाहनपूर्वकं ॥ तथैव पिप्प
लं तरुं नारायणस्वरूपिणं ॥ अर्चयेत् पुरुषसूक्तेन षोडशोपचारैः पू
जयेत् ॥ ततः प्रदक्षिणं कुर्यात् सर्वं सफलं भवेत् ॥ लक्षमेकं द्विलक्षं
कार्यास्य गौरवात्तेयं द्वादश्यां तं समाचरेत् ॥ ब्रह्मचारी हविष्याशी स्य
धः शाई जितेंद्रियः ॥ मौनी ध्यानपरो भूत्वा पिप्पलस्य स्तुतिं पठेत् ॥ वि

स्मो नीमसहस्रं च पौरुषं वैष्णवं तथा ॥ ततो लक्षदशांशेन सघृतं पाय
३२ सं हुनेत् ॥ तर्पणं तद्दशांशेन भोजनं तद्दशांशतः हेमाद्रौ विष्णुगायत्री
नामसहस्रं वा अष्टहोमान्ते द्रोणपरिमिततिलपुंजो पुरिपलाधिकरौ
प्यपीठे परिसुवर्णाधिकहेममत्स्यं त्स्यं अश्वत्थनलसस्या पार्श्वेन व
स्त्रेण संछाद्य संपूज्य च द्विजाय दद्यात् ॥ तत्र मंत्रः पिप्पलोरक्षराजेंद्रो राम
ह्यग्निगर्भस्त्वमेव हि ॥ अस्मुर्वनस्पतीनां च पूर्वजन्मनि यत्कृतं ॥ अघौघ ३२
नाशयात् क्षिप्रं तव रूपप्रदानतः ततः द्विजं प्रार्थयेत् ॥ अमुं तसं गृहा

यात्वं विष्णुरूपद्विजोत्तम ॥ स्वीकृत्य दुष्कृतं योरक्षिप्रं शांतिं प्रयच्छ मे ॥ व्रत
पूर्तये सुरभी गां च दद्यात् ॥ इत्यश्वत्थप्रदक्षिणाविधानं समाप्तं ॥ श्रीः ॥ अ
थ भविष्ये हस्तर्क्षस्थगते सूर्ये त्रियोदशवर्षात्मकं हस्तगौरीव्रतं ॥ तिथ्या
दि संकीर्त्य आत्मनः सकलदुःखनाशसौभाग्यसुखप्राप्तिद्वारा गौरीप्रीत्य
र्थं आचरित हस्तगौरीव्रतपूर्णतासिद्ध्यर्थं तदुद्यापनाख्यं कर्म करिष्ये ॥
वृताचार्यः ॥ लिंगतोभद्रे उक्तप्रकारेण कलशे कांचनगजे गौरीं हरं गणेशं
च सुवर्णपुष्पादिना तत्तन्मंत्रैः संपूज्य ॥ सुवासिनीः संपूज्य रात्रिं निनयेत् ॥

प्रातः आचार्यः अग्निं प्रतिष्ठाप्यान्वादध्यात्॥ गौरीं हरं गणेशं च गौरीर्मिमा
३३ य॥ तत्पुरुषाय । गणानां त्वेति॥ प्रतिमंत्रेण प्रतिदेवतं अष्टोत्तरशततिला
हुतिभिः ब्रह्मादिदेवता एकैकयाज्याहुत्या यक्ष्ये॥ शेषेण स्विष्टकृतमि
त्यादिहोमशेषं समाप्य॥ वायनत्रयोदशविधं त्रयोदशसंख्याकपक्वान्न
पूरितं सौवर्णपात्रेण वैणवेन वा कृत्वा त्रयोदशदंपतीः सुवासिनीर्वा सं राम
पूज्य तेभ्यो दद्यात्॥ तत्र मंत्रः॥ पक्वान्नपूरितं विप्र व्रतसंपूर्तिहेतवे॥ वा ३३
यनं ते प्रयच्छामि गौरी गिरिशा तुष्टये॥ आचार्याय गोदानं॥ सांगं दद्या

त्॥ इति हरगौरीव्रतोद्यापनं संपूर्णं॥ अथानंतचतुर्दशीव्रतं॥ चतुर्द
शवर्षात्मकं यावज्जीवं वानंतचतुर्दशीमुहूर्तोदयव्यापिन्यां कार्यं तिथ्यादि
संकीर्त्य आत्मनः अखिलपापनिर्मुक्तिपूर्वक उत्तमसिद्धिपुत्रपौत्र
पूरितविविधभोगधनधान्यपरमगतिप्रीतिकामनया चतुर्दशवर्ष
ओ चरित अनंतव्रतोद्यापनं करिष्ये॥ नित्यवत्स्वयं देवं संपूजयेत्॥
ततः वृताचार्यः सर्वतोभद्रे ब्रह्मादिदेवता आवाह्य तदुपरि कलशं प्र
तिष्ठाप्य तत्र यमुनां आवाह्य श्रीसूक्तेन नाममंत्रेण वा संपूज्य तदुप

१७ रिकलशं प्रतिष्ठाप्य तत्र यमुनां आवाह्य श्रीसूक्तेन नाममंत्रेण वा संपूज्य
तदुपरि अक्षतपूरित पूर्णपात्रं निधाय तत्र अष्टदलं विलिख्य तत्र स्वर्णनि
र्मितं चतुर्दशग्रंथियुतानन्तं सहस्रशीर्षेति मंत्रेण स्थापयेत् तदुपरितः
सप्तधान्योपरि सविस्तरशय्यां स्वर्णनिर्मितं लक्ष्मीसहितं हलमुसला
युतं अनन्तं देवं अनो देवेति इदं विष्णुरिति वा नाममंत्रेण स्थापयेत्॥ स्वर्ण
दोरकप्रतिमयोः पुरुषसूक्तेन श्रीमदनंतायनमः इति नाममंत्रेण वा पू राम
जा वार्षिकावत्कार्या अथ ग्रंथिदेवताः पूजयेत्॥ क्रमेण॥ विष्णुः अ ३४

ग्निः आदित्याः सहस्राक्षः पितामहाः इंद्रः पिनाकी विघ्नेशः स्कंदः सोमः
वरुणः पवनः पृथ्वी वसवः॥ ततः शय्याप्रतिमायाः परितः शंखचक्रगदा
पद्मं॥ तद्बहिः नाममंत्रेण अनन्तं कपिलं॰ दक्षं॰ मनुं॰ प्रजापतिं॰ संकर्षणं
कालं॰ वनमालिनं॰ त्रिविक्रमं॰ अहोरात्रं॰ अर्धमासं॰ मासं॰ ऋतुं॰
अयनं॰ संवत्सरं॰ इद्वत्सरं॰ अनुवत्सरं॰ संवत्सरं॰ प्रजाध्यक्षं॰ अ
जितं॰ सर्वभूतं॰ प्रद्युम्नं॰ अनिरुद्धं॰ श्रीधरं॰ पुरुषोत्तमं॰ वामनं॰ पद्मनाभं॰
विश्वरूपं॰ त्रिविक्रमं॰ कूर्मं॰ अच्युतं॰॥ तद्बहिः इंद्रादीन्॰ तद्बहिः अ

षो वसून्॰ तदूर्ध्वं एकादशरुद्रान्॰ तदूर्ध्वं द्वादशादित्यान्॥ तदूर्ध्वं आ
३५ दित्यादिनवग्रहदेवतान्। तदूर्ध्वं अष्टभैरवान्॥ तदूर्ध्वं मेषादिद्वादशा
दित्यान्॥ तदूर्ध्वं अश्विन्यादिसप्तविंशतिनक्षत्राणि॥ तदूर्ध्वं प्रात्या
दिसप्तमातॄः तदूर्ध्वं चैत्रादिद्वादशमासान तदूर्ध्वं दीप्तादिशक्तिः त
दूर्ध्वं विष्कंभादियोगान् आवास्यपीठपरितः फलपक्वान्नपूरितान् च अनन्त
तुर्दशकुंभान चतुर्दशनाममिः स्थापयेत्॥ पूजयेत्तेच मंत्राः॥ अ ३५
नंतायनमः संकर्षणाय॰ कालाय॰ शेषाय॰ वासुदेवाय॰ विश्वना

याय॰ विश्वरूपाय॰ पद्मनाभाय॰ दामोदराय॰ जगन्नाथाय॰ चतुर्भु
जाय॰ श्रीकंठाय॰ केशवाय॰ सर्वात्मनेनमः ततःपुष्पोपरं कलशस्था
पनोक्त चतुर्दशनाममिः अंगानिपूजयेत्॥ अनंताय॰ पादौ पूजयामि सं
कर्षणाय॰ गुल्फौ पू॰ कालाय॰ जंघे॰ शेषाय॰ जानुनी॰ वासुदेवाय॰
ऊरू पू॰ विश्वाय॰ गुह्यं॰ विश्वरूपाय॰ कटिं॰ पद्मनाभाय॰ नाभिं॰ दामो
दराय॰ उदरं॰ जगन्नाथाय॰ हृदयं॰ चतुर्भुजाय॰ बाहू॰ श्रीकंठाय॰
कंठं॰ केशवाय॰ ललाटं॰ सर्वात्मनेनमः शिरः पूजयामि अनंताय

नमः सर्वांगं पूजयामि धूपदीपनैवेद्यफलतांबूलदक्षिणा महानीरां
३६ जनमंत्रपुष्पं प्रदक्षिणां ॥ ततः नमस्ते देवदेवेशो नमस्ते धरणीधर
नमस्ते सर्वनागेंद्र अनंताय नमो नमः ॥ इति नमस्कारः ततः प्रार्थयेत्
अनंत कामान्देहि सर्वकामफलप्रद ॥ अनंताय नमस्तुभ्यं पुत्रपौत्रान्
प्रवर्द्धय ॥ अनेनानंतसुप्रीतो भव त्वं हि सदा मम ॥ ततः पुराणपठना राम
दिना रात्रिं निनयेत् ॥ प्रातः नित्यकर्म निर्वर्त्य अग्निं प्रतिष्ठाप्यान्वाद् ३६
ध्यात् ॥ प्रधानं अनंतं अष्टोत्तरशतसमित्तिलव्रीहियवघृतपायसद्रव्यैः

प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः पीठदेवता आवरणदेवताश्च ए
केकयाज्याहुत्या यक्ष्ये ॥ पयसा हुत्वा वा ॥ ब्रह्मादिदेवताश्च एकैकया
ज्याहुत्या । स्थापनमंत्रैर्होमः केचिद्विवेचहोमच्छिति ब्राह्मणभोजनमा
त्रेणैवा सर्वं ॥ ततः पीठसंपूज्य ॥ कुंभादिना आचार्यं संपूज्य पीठं द
द्यात् ॥ तत्र मंत्रः प्रतिगृण्हन्तु द्विजश्रेष्ठ समस्तफलदायक ॥ त्वत्प्रसादा
दहं विप्र विमुच्येय भवबंधनात् ॥ अनंतः प्रतिगृण्हातु अनंतो वै ददाति
च ॥ अनंतस्तारको भाभ्यां अनंताय नमो नमः ॥ ततः पूर्वेद्युः निमंत्रि

तानचतुर्दशविप्रानवस्त्रादिनासंपूज्यस्थापितचतुर्दशकलशानुप
३१ कान्नादिपूरितान्दक्षिणादिसहितानतेभ्यः प्रतिगृह्णन्तु द्विजश्रेष्ठे
तिमंत्राभ्यां दद्यात् अनंतपूर्णयेच गां दद्यात् क्षमापयेत्॥ क्रियाहीनं भ
क्तिहीनं द्रव्यहीनं तथैव च॥ मंत्रहीनं कृतं यच्च परिपूर्णं तदस्तु मे॥
ब्राह्मणैः सह स्वयं भुंजीत अनंतचतुर्दशीव्रतोद्यापनसमाप्त राम
म्॥ श्रीमदनंतार्पणमस्तु॥ श्रीरस्तु॥ श्रीगणेशायनमः॥ भाद्रपद ३१
शुक्लपंचम्यां ऋषिपंचमीव्रतं॥ मध्याह्नव्यापिन्यां दिनद्वये तथाव्या

प्तौ अव्याप्तौ वा पूर्वविद्धायां कार्यं नद्यादौ दंतधावनपूर्वकं स्नात्वा मम
ज्ञानतोऽज्ञानतो वा रजस्वलावस्थायां कृतसंपर्कजनित[illegible]
दोषपरिहारार्थं शुभफलप्राप्त्यर्थं आचरित ऋषिपंचमीव्रतोद्यापनं
करिष्ये तत्रादौ आचार्यः सर्वतोभद्रे सप्तकलशेषु एकस्मिन् वा हेमीः अरु
धतीसहितसप्तऋषीः प्रतिमाः पूजयेत्॥ कश्यपोत्रिर्भरद्वाजो वि
श्वामित्रोथ गौतमः॥ जमदग्निर्वसिष्ठश्च साध्वी चैवाप्यरुंधती देवा
एतस्याः अथवा सहस्रशीर्षाः सहस्त्रंदृश॰ नाममंत्रेण वा पूजयेत्॥

[illegible] कश्यपस्य॥ अत्रिर्[illegible]॥ एवानः [illegible] भरद्वाजस्य॥ [illegible] विश्वामित्रस्य
[illegible] गौतमस्य॥ [illegible] जमदग्नेः॥ [illegible] वसिष्ठस्य [illegible]

ऋषि॰ ततः पायसं दत्वा समापयेत्॥ न्यूनातिरिक्तकर्माणि मया यानि कृता
३९ नि च॥ क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः॥ ततः कश्यपादि
नारात्रिं निनयेत्॥ प्रातरग्निं प्रतिष्ठाप्यान्वादध्यात् प्रधानं अरुन्धतीस
हितकश्यपादिसप्तऋषीन् पूजामंत्रेण तिलव्रीहियवसर्पिर्द्रव्यैः प्र
तिद्रव्यं अष्टोत्तरसहस्रं अष्टोत्तरशतं अष्टाविंशतिर्वा तत्संख्याकाहु राम
तिभिः ब्रह्मादिदेवताभ्य एकैकयाज्याहुत्या स्विष्टे शेषेण॰ होमं समाप ३९
य ततः पुनः प्रतिमां पूजां कृत्वा सपत्नीकान् सप्तब्राह्मणांश्च वस्त्रादि

ना संपूज्य तेभ्यः क्रमेण दक्षिणा प्रतिमायुतकलशान् दद्यात्। मंत्रः प्रतिग
ृह्णन्तु द्विजश्रेष्ठाः प्रतिमादिसमन्वितं कलशं ऋषिसंप्रीत्यै येन संपूर्णि
तं वै॥ यद्येककुंभे सर्वप्रतिमानां संपूजनं तदा सर्वप्रतिमायुतं कलशमा
चार्याय दद्यात् अन्येभ्यः दक्षिणा वस्त्रयुतान् पूर्णपात्रपूरितान् कलशा
न्दद्यात् ततः सप्तभ्यः सप्तगाः एकपक्षे आचार्याय एकां गां दत्वा प्रार्थ
येत् सप्तर्षयः शुभाः श्रेष्ठाः सर्वेषां च शुभप्रदाः सर्वपापं च मे घ्नंतु शा
न्ता दान्ता ऽशान्ता एते सप्तर्षयः सर्वे भक्त्या संपूजिता मया॥ यद्योक्त

फलदाः संतु व्रतस्य फलदायकाः आशिषो गृहीत्वा ब्राह्मणान् संतर्प्य
३९ स्वयं भुंजीत ॥ इति ऋषिपंचमीव्रतोद्यापनं संपूर्णं ॥ ॥श्री॰॥ अथ शि
वरात्रीव्रतं ॥ स्कांदे ॥ चतुर्दशाव्दपर्यात्मकं यावज्जीवं वा माघे कृष्णचतुर्दश्यां निशी
थेव्यापिन्यां कार्यं ॥ तिथ्यादि संकीर्त्य आत्मनः सर्वपापक्षयपूर्वक अक्षय्यभोग
मोक्षप्राप्त्यर्थं आचरित शिवरात्रीव्रतोद्यापनं करिष्ये ॥ व्रताचार्यः ॥ अन्येद्युर्द्वाद राम
शब्राह्मणैः सह पूजामारभेत ॥ द्वादशलिंगोद्भवपीठे उक्तविधिना ब्रह्मादिदेव ३९
ताः संपूज्य द्वादशलिंगेषु द्वादशकलशान्मध्ये एकं वा तदुपरि पूर्णपात्राणि निधा

यतत्र मां हैमीं पूजयेत् ॥ तत्र मध्यमध्यकुंभे उमामहेश्वरं त्र्यंबकमिति मंत्रेण
प्रतिष्ठाप्य पुरतः राजतं वृषभं च प्रतिष्ठापयेत् ॥ ततः द्वादशब्राह्मणान् द्वादश
लिंग ~~कलश~~ कलशेषु द्वादश प्रतिमाः पूजयेत् ॥ तत्र प्राच्यां महेशं अघोरं प
शुपतिं दक्षिणस्यां पश्चिमे ॰ उग्रं रुद्रं ॥ पश्चिमायां ॰ भवं शर्वं शंभुं ॰ उत्तरे ॥ शिवभी
मं भीमपराक्रमं ॥ प्रतिकलशं परितः पूर्वादिन् इंद्रादिलोकपालान् प्रतिष्ठाप्य रु
द्राभिषेकपूर्वकं षोडशोपचारैः पूजयेत् ॥ प्रतियामपूजा कार्या ॥ पुष्पानंतरं ॥
आद्यांगपूजा ॥ शर्वायनमः ॥ पादौ पूजयामि ॥ पशुपतये ॰ गुल्फं पू॰ ॥ रुद्राय ॰ कटिं ॥

शर्वाय० बाहुं०॥सद्योजाताय० कंठं०॥शंभवे० मुखं०॥वामदेवाय० नेत्रे०॥भी
माय० भ्रुवौ०॥उमापतये० ललाटं०॥सर्वव्यापिने० मूर्धानं०॥धूपदीपनैवेद्य
फलतांबूलदक्षिणामहानीराजनकर्पूरदीपप्रज्वलनमंत्रपुष्पप्रदक्षिणानं
मस्कारान्प्रार्थयेत्॥पुराणपठनादि रात्रिं निनयेत्॥प्रातरग्निं प्रतिष्ठाप्य
अन्वादध्यात्॥अत्र प्रधानउमामहेश्वरं॥पायसं बिल्वपत्रदलदूर्वाघृतद्र
व्यैः प्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिः द्वादशकलशस्थद्वादशदेवताः
अष्टसंख्याकआहुतिभिः तैरेव द्रव्यैः परिवारदेवताः ब्रह्मादिदेवताश्च एके

कया ज्याहुत्या यक्ष्ये॥एवं होमं संपाद्य ततः आचार्यं द्वादश ब्राह्मणान् वस्त्रादी
नां संपूज्य तेभ्यः प्रतिमाकलशान् सहितान् दद्यात्॥तत्र मंत्रः॥शंभो प्रसीद दे
वेश सर्वलोकेश्वर प्रभो॥तव रूपप्रदानेन मम संतु मनोरथाः॥ततः प्रतिपूर्ते
येत्रयोदश गाः अथवा एकां गां च आचार्याय अन्येभ्यो दक्षिणां दद्यात्॥ब्रा
ह्मणान् संतर्प्य स्वयं भुंजीत॥लिंगपुराणे प्रकारांतरेण उक्तमंडले उमामहे
श्वरं संपूज्य प्रातः पूर्वोक्तविध्यादि तिलव्रीहियवैः अष्टोत्तरशतहोमं कृत्वा
चतुर्दश ब्राह्मणान् चतुर्दश नामभिः संपूज्य जलपूरितचतुर्दशकलशान् व

४१ स्वरक्षिणासहितानुद्ध्यात्॥ चतुर्दशनामानि॥ अनेकपाद्धिर्बुध्न्यो भवः शर्वः
उमापतिः॥ रुद्रः पशुपतिः शंभुर्वरदः शिव ईश्वरः॥ महादेवो हरो भीमो नामान्येव
चतुर्दश॥ एते होमः प्रकुर्वीत कुंभदाने च तान् स्मरेत्॥ सप्ताकृतिसंख्याका बि
ल्वपत्रे होमः॥ व्रन्यसमाप्तं॥ इति शिवरात्रिव्रतं॥ अथ वैकुंठचतुर्दशीव्रतं॥
कार्तिकशुक्लचतुर्दश्यां अरुणोदयव्यापिन्यां कार्यं॥ तिथ्यादि संकीर्त्य आत्मनः
अशेषपापक्षयपूर्वक शिवपदप्राप्तिकामनया आचरित वैकुंठचतुर्दशीव्रत
स्य तत्संपूर्णफलावाप्तये तदुद्यापनं करिष्ये॥ वृताचार्यः॥ लिंगतोभद्रस्थक ४१

लशे हेमं विश्वेश्वरं संपूजयेत्॥ ततः प्रातः अग्निं प्रतिष्ठाप्यान्वारब्ध्यात्॥ विश्वेश्वरं तिलैः
यवैः प्रत्येकं अष्टोत्तरशतं अष्टाविंशतिर्वा होमं कृत्वा अष्टौ ब्राह्मणान् भोजयित्वा आपी
पोशं गृहीत्वा स्वयं भुंजीत इति वैकुंठचतुर्दशीव्रतं संपूर्णं॥ ॥श्री॥ ॥अथ कार्तिकमा
सेषु त्रयोदश्यां प्रदोषव्रतं वर्षात्मकं यावज्जीवं वा प्रतियोगे महाफलं भौमयोगे ऋणमोच
नं॥ तिथ्यादि संकीर्त्य आत्मनः अखिलपापक्षयशत्रुपराजयपूर्वक आयुरारोग्यैश्वर्य
पुत्रपौत्राद्यभिवृद्धिद्वारा श्रीउमामहेश्वरप्रीत्यर्थं आचरित प्रदोषव्रतोद्यापनं करि
ष्ये॥ वृताचार्यः॥ उक्तप्रकारेण लिंगतोभद्रस्थकलशे रौप्यपूर्णपात्रयुते सौवर्णं सांब
सदाशिवं पुरतः रजतं वृषभं तत्तन्मंत्रैः प्रतिष्ठाप्य परितः पूर्वे॥ असितांगभैरवाय नमः॥

४२ रुरुभैरं॰ चंडभै॰ क्रोधभै॰ उन्मत्तभै॰ भीषणभै॰ संहारभै॰ कपालभै॰ कालभैरं॰
इति प्रतिष्ठाप्य पूजयेत्॥ मूलमंत्रेण न्यासं कृत्वा॥ पंचब्रह्ममंत्रैः पूजयेत्॥ सद्यो
जातादि प्रकारांतरेण पूजयेत्॥ अथ प्रथमावरणं॥ पूर्वादिक्रमेण विष्णुं॰ ब्रह्मा
णं॰ भास्करं॰ सोमं॰ इति प्रथमावरणं॥ जयं॰ विजयं॰ गणपतिं॰ दुर्गां॰ इति द्वि॰ नं
दीशं॰ क्षेत्रपालं॰ वास्तोष्पतिं॰ वायुं॰ तृतीय॥ सप्तर्षीन्॥ चतुर्थे॥ भूतनाथं॰ पं
चमे॥ रुद्रादीन्॰ षष्ठे॥ कपालिनं॰ सप्तमे॥ गंधर्वान्॰ अष्टमे॥ सद्योजातेति आ
सनं॥ वामदेवायेति पाद्यं॥ अघोरेति अर्घ्यं॥ तत्पुरुषायेति आचमनं॥ ईशानायेति स्ना
नं॥ त्र्यंबकायेति वस्त्रं॥ यज्ञोपवीतमित्युपवीतं॥ नमः सोमायेति गंधं॥ नमः शंभवे ४२

च मयोभवे चेति अक्षतान्॥ इमा रुद्रायेति पुष्पाणि॥ एवा पित्रेति बिल्वदलानि॥ मानस्तो
केति धूपं॥ आतेपितरिति दीपं॥ वाद्यन्तेति नैवेद्यं॥ कद्रुद्रायेति तांबूलं॥ सहस्रयेणेति
मंत्रपुष्पं॥ यातेदिद्युदवसृष्टेति नमस्कारान्॥ पुनः नाममंत्रेणाष्टौ प्रदक्षिणा पुनर्ना
ममंत्रेण नमस्कारांश्च कुर्यात्॥ भवाय नमः॥ महादेवाय॰ रुद्राय॰ नीलकंठाय॰ शशि
मौलिने॰ उग्राय॰ भीमाय॰ ईशानाय॰ इति नमस्काराः॥ अथार्घ्यं॥ रजतादिपात्रे क्षी
रकुशदधितंदुलाक्षिद्रार्थगंधपुष्पाणि क्षिप्त्वा सजलैर्दद्यात्॥ भयरोगादिदारिद्र्य
पापक्षुदपमृत्यवः॥ ऋणशोकमनस्तापा नश्यंतु मम सर्वदा॥ अनेन त्रिवारमर्घ्यं
दद्यात्॥ ततः प्रार्थयेत्॥ प्रसीद देवदेवेश प्रसीद परमेश्वर॥ प्रसीद सोम सर्वज्ञ प्र

मीद करुणाकर॥ततः ब्राह्मणान् संपूज्य रात्रिं निनयेत्॥ प्रातरग्निं प्रतिष्ठाप्यन्वादध्यात्॥
४२ अत्रप्रधानं॥ उमामहेश्वरं॥ तत्पुरुषायेतिमंत्रेण पलाशासमित् बिल्वपत्रपायसआ
ज्यद्रव्यैः प्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिः पीठदेवताश्च ब्रह्मादिमंडलदेवता
एकैकयाज्याहुत्यायक्ष्ये॥ ततः पीठं गां च दत्वा ब्राह्मणान् भोजयेत्॥ प्रदोषव्रतस
माप्तः॥ ॥अथ सोमवारव्रतं स्कांदे॥ तत्रग्रहणविधिः॥ श्रावणे चैत्रे वैशाखे ज्ये
ष्ठे मार्गशीर्षके एतेषां अन्यतमे मासि शुक्लपक्षे इंदुवासरयुतं अष्टम्यां ग्राह्यं॥ अथ
वा प्रतिपथमसोमवासरे यावज्जीवं कर्तव्यं॥ अथवा अर्धवर्षपर्यंतं कर्तव्यं॥ अंते
उद्यापनं कुर्यात्॥ तिथ्यादि संकीर्त्य॥ आत्मनः अशेषपापक्षयपूर्वकसत्पुत्रप्राप्तिधन ४२

संपूज्य तावता फलपक्वान्नैः अभावे तंदुलैर्वा पूरितान् घटान् सदक्षिणायुतान् दद्यात्॥ अ
थ षोडश नामानि॥ सोमेश्वरः॥ ईशानः॥ शंकरः॥ गिरिजाधवः॥ महेशः॥ सर्वभूतेशः॥ स्मरशत्रु
नुः॥ त्रिपुरांतकः॥ शिवः॥ पशुपतिः॥ शंभुः॥ त्र्यंबकः॥ चंद्रशेखरः॥ गंगाधरः॥ महादेवः॥ वामदेवः
अथ त्रयोदश [illegible] पक्षे॥ भवः॥ शर्वः॥ रुद्रः॥ पशुपतिः॥ उग्रः॥ महान्॥ भीमः॥ ईशानः॥ सद्यो
जातः॥ वामदेवः॥ अघोरः॥ तत्पुरुषः॥ ईशानः॥ १३॥ ततः पीठं व्रतपूर्तये धवलां गां च द
त्वा आचार्याय आशिषो गृहीत्वा स्वयं भुंजीत॥ इति सोमवारव्रतं समाप्तः॥ ६॥ ॥६
॥श्री॥ ॥अथ रुद्रलक्षवर्तिव्रतं स्कांदे॥ तिथ्यादि संकीर्त्य अखिलदुरितनाशाभिष्टसिद्धि
पूर्वक शिवलोकप्राप्तिद्वारा सांबसदाशिवप्रीत्यर्थं आचरितं रुद्रलक्षवर्तिव्रतोद्यापनं क
रिष्ये॥ इत्याचार्यः लिंगतोभद्रे ताम्रकलशोपरि हैमं सांबं रुद्रं कद्रुद्रायेति मंत्रेण प्रतिष्ठा
प्य पुरतः राजतं वृषभं संपूज्य पुराणपठनादीना रात्रिं निनयेत्॥ प्रातरग्निं प्रतिष्ठाप्यन्वा

४५ दध्यात् ॥ प्रधानं सांबं रुद्रं रुद्रसूक्तेन ॐ नमः शिवायेति मंत्रेण वा घृतपायसबिल्वदलैः सहस्र
संख्याकाहुतिभिः अंगदेवताश्चैकैकयाज्याहुत्या यक्ष्ये ॥ ततः पीठं च गां दीपं च दत्त्वा ॥ ए
कादशाधिकद्विजान् भोजयेदिति ॥ अत्र वर्तीदशांशतः तर्पणं तद्दशांशतः हवनं तद्दशां
शतः द्विजभोजनं च प्रतिपदोक्तं नास्ति होमे दशांशतः साधारणतर्पणं कांस्यपात्रसहितं
दीपदानं च पूर्ववत् कर्तव्यं ॥ एवमेव स्कंदभविष्ययोः ॥ बिल्वलक्षवर्तीव्रतोद्यापनं तु तेः ॥
रुद्रलक्षवर्तीवत् सर्वं अनुष्ठानं ज्ञेयं ॥ इति बिल्वलक्षवर्तीव्रतोद्यापनं संपूर्णं ॥ ॥ छ ॥
अथ कर्पूरलक्षदीपदानं तत्र शैवागमे तिथ्यादि संकीर्त्य अखिलपापक्षयपूर्वक शिवलोककामे
नया आचरितलक्षकर्पूरदीपसांगतासिद्ध्यर्थं तदुद्यापनाख्यं कर्म करिष्ये ॥ इत्याचार्यः ॥ पीठे
लिंगतोभद्रे कलशे सांबं भवं वा नमो भवाय च रुद्राय चेति मंत्रेण संस्थाप्य पूजयेत् ॥ प्रा ४५
तरग्निं प्रतिष्ठाप्यान्वादध्यात् ॥ प्रधानं भवं सहस्रतिलाहुतिभिः अंगदेवताश्चैकैकया

ज्याहुत्या ० ॥ ततः पीठं गां च द्विजान् भोजयेत् ॥ होममंत्रः स्थापनोक्तः ॥ इति कर्पूरलक्षदीपं समाप्तं ॥
॥ लक्षदीपविधानं ॥ विष्णुधर्मोत्तरे ॥ पंचायतनदेवानां आराध्यस्यैव चायतः ॥ चातुर्मास्येष्व सं
प्राप्तेषु भो राजसि भूमिप ॥ प्रत्येकं चैव दीपं च दीपितं गोघृतेन च ॥ तिलतैलेन वा कुर्यात् क
र्पूरेण समन्वितं ॥ दीपं प्रज्वाल्य विधिवत् वर्त्या कार्पाससंभवा ॥ एकसूत्या त्रिरावर्त्या वाबि
ल्वाख्या मणिकान्विता ॥ एवं प्रकारेण लक्षदीपदानं ॥ देवाग्रे कृत्वा कार्तिकपौर्णिमास्यामुद्या
पनं कुर्यात् ॥ तद्यथा ॥ तिथ्यादि संकीर्त्य आत्मनः त्रिविधपापक्षयपूर्वकं अभीष्टकामसिद्धि
द्वारा श्रीपरमेश्वरप्रीत्यर्थं आचरितलक्षदीपदानसांगतासिद्ध्यर्थं तदुद्यापनं करिष्ये ॥ इत्या
चार्यः ॥ सर्वतोभद्रे सकलशे इ मंदेवं तन्नमंत्रेण संस्थाप्य संपूज्य रात्रौ जागरणं कृत्वा प्रात
रग्निं प्रतिष्ठाप्यान्वादध्यात् ॥ ० ॥ प्रधानं ॥ पूज्यदेवं घृताक्तं तिलद्रव्येण सहस्राहुतिभिः मं
डलदेवताश्चैकैकयाज्याहुत्या ० ॥ ततः पीठं सुवर्णवर्तियुक्तं रौप्यपात्रस्थदीपं घृतपूरितकां
स्यपात्रसहितं ब्राह्मणाय दत्त्वा गां च प्रतिपाद्य द्विजान् भोजयेत् ॥ इति श्रीमत्त्रिवित्तपावनकुला

५६ ब्धि संभवघोरोपनामक॥ इति व्रतोद्यापनकौमुद्यां चतुर्विधलक्षवर्त्तीव्रतोद्यापनं कोटिदीपदान
कृष्णवृत्तलक्षदीपविधानं च समाप्तः॥ श्री ॥ शाके १७५९ हेमलंब नाम संवत्सरे अश्वीन शुक्ल च
तुर्दश्यां रविवासरे तद्दिनि समाप्तं॥ ॥ श्रीरवळनाथार्पणमस्तु॥ बुधकरस्येदं पुस्तकं॥ छ॥

५६